यत्तु नो दृश्यते किञ्चिद्यन्नु किञ्चि-
दिव स्थितम्। मनः षष्ठेन्द्रिया-
तीतं तन्मयो भव वै मुने अ. पू. १।२१
यत्तु पौरुषयत्नेन कृतं तन्मध्यमं
भवेत् (रुद्राक्षछिद्रं) रु. जा. १३
यत्तु प्रत्युपकारार्थं भ. गी. १७।२१
यत्तुर्योङ्काराग्रपरास्थिरभूमिवरा-
सनम्। प्रतियोगिविनिर्मुक्तं
तुर्यतुर्यमहं महः नृ. पू. शीर्षकं
यत्तु होतर्गायत्रीं कथं इलीभूतो
वहसीति गायत्र्यु. ५
(अथ) यत्तृतीयममृतं तदादित्या
उपजीवन्ति वरुणेन मुखेन न
वै देवा अश्नन्ति छांदो. ३।८।१
यत्तृतीयं तच्छिखायां, यच्चतुर्थं
तत्सर्वेष्वङ्गेषु नृ. षट्च. ७
यत्तृतीयं तद्बाह्यं वलयं भवति नृ. षट्च. ३
यत्ते कश्चिदब्रवीत्तच्छृणवामेति बृह. ४।१।२
यत्ते रूपं कल्याणतमं तत्ते पश्यामि बृह. ५।१५।१
यत्तेसुसीमंहृदयमधिचंद्रमसिश्रितम् कौ. त. २।८
यत्ते सुसीमे हृदये हितमन्तः
प्रजापतौ। मन्येऽहंमांतद्विद्वांसं
माहं पौत्रमघं रुदम् कौ. त. २।१०
यत्तेऽहं प्रीयमाणाय भ. गी. १०।१
यत्त्वयोक्तं वचस्तेन भ. गी. ११।१
यत्पञ्चमं तत्सर्वेषु... यत् षष्ठं
तत्सर्वेषु देशेषु नृ. षट्च. ७
(अथ) यत्पञ्चमममृतं तत्साध्या
उपजीवन्ति ब्रह्मणा मुखेन न
वै देवा अश्नन्ति छांदो. ३।१०।१

यत्पदं विमलमद्वयं शिवं तत्सदा-
हमिति मौनमाश्रय वराहो. ३।६
यत्परं तेजस्त्रेधाऽभिहितमग्ना
आदित्ये प्राण एतद्भाव त-
त्स्वरूपं नभसः खेऽन्तर्भूतस्य
यदोमित्येवदक्षरम् मैत्रा. ७।११
यत्परं नापरं त्यजति स
जाग्रदभिधीयते ब्रह्मो. १
यत्परं ब्रह्म स एकः, य एकः स
रुद्रः, यो रुद्रः स ईशानः...स
भगवान्महेश्वरः [अ.शिरः.३।४+ बटुको. १९
यत्परं ब्रह्म सर्वात्मा विश्वस्यायतनं
महत् । सूक्ष्मात्सूक्ष्मतरं नित्यं
स त्वमेव त्वमेव तत् कैव. १६
यत्परात्परतो ज्ञेयं तन्मे मनः शिव-
सङ्कल्पमस्तु २ शिवसं. १७
(अथ) यत्पशुभ्यस्तृणोदकं
विन्दति तेन पशूनां (लोकः) बृह. १।४।१६
यत्पश्यति तु तत्सर्वं ब्रह्म पश्यन्स-
माहितः । प्रत्याहारो भवेदेष
ब्रह्मविद्भिः पुरोदितः जा. द. ७।३
यत्पश्यमानमात्माभिजुषाणमन्तः..
सुषुप्त्यानभिगम्यमानाय स्वाहा पारमा. १।८
यत्पादाम्बुरुहद्वंद्वं मृग्यते विष्णुना
सह । स्तुत्वा स्तुत्यं महेशान-
मवाङ्मनसगोचरम् शरभो. १७
यत्पितृभ्यो निपृणाति यत्प्रजा-
मिच्छते तेन पितृणां (लोकः) बृह. १।४।१६
यत्पितृभ्यः स्वधा करोत्यप्यपस्त-
त्पितृयज्ञः सन्तिष्ठते सहवै. १४
यत्पिबति तदस्य सोमपानम्
(शारीरयज्ञस्य) महाना. १८।१
यत्पुण्डरीकं पुरमध्यसंस्थम् ।
तत्रापि दहं गगनं विशोकस्त-
स्मिन्यदन्तस्तदुपासितव्यम् महाना. ८।१६
यत्पुरुषं व्यदधुः कतिधा व्यक-
ल्पयन् [ऋ.अ.८।४।१९ =मं. १०।९०।११+
[वा. सं. ३१।१०+पु.सू.११ चित्त्यु. १२।५

यत्पुरुषेण हविषा देवा यज्ञमतन्वत
[ऋ. अ. ८।४।१८।६= मं. १०।९०।६+
[वा. सं. ३१।१४+पु.सू.१६ चित्त्यु. १२।२
यत्पुरुषेणेत्यनया सृष्टियज्ञः समी-
रितः । अनेनैव च मन्त्रेण
मोक्षश्च समुदाहृतः मुद्गलो. १।६
यत्पूर्णानन्दैकबोधस्तद्ब्रह्मैवाहम-
स्मीति कृतकृत्यो भवति प. हं. ९
यत्पृथिव्याᳬ रजस्वमान्तरिक्षे
विरोदसी । इमाᳬस्तदापो
वरुणः पुनात्वघमर्षणः महाना. ६।४
यत्पौर्णमास्ये तत्पौर्णमास्यम् कठरु. ३
यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्यो-
तिरन्तरमृतं प्रजासु । यस्मान्न
ऋते किञ्चन कर्म क्रियते तन्मे
मनः... [१ शिवसं. ३+ २ शि. सं. ४
यत्प्रत्यक्षं तद्धे इति शौनको. ४।७
यत्प्रथमं तच्चतुरं यद्द्वितीयं तच्चतु-
रं यत्तृतीयं तदष्टारं यच्चतुर्थं
तत्पञ्चारं यत्पञ्चमं तत्पञ्चारं
यच्छष्ठंतदष्टारं तदेतानि षडेव
नारसिंहानि चक्राणि भवन्ति नृ. षट्च. १
यत्प्रथमं तदाचक्रं यद्द्वितीयं तत्सु-
चक्रं यत्तृतीयं तन्महाचक्रं
...तदेतानि षडेव नार-
सिंहानि चक्राणि भवन्ति नृ. षट्च. २
यत्प्रथमं तदान्तरवलयं भवति ।
यद्द्वितीयं तन्मध्यमं वलयं
...तदेतानि त्रीण्येव वलयानि
भवन्ति नृ. षट्च. ३
यत्प्रथमं तद्धृदये, यद्द्वितीयं
तच्छिरसि, यत्तृतीयं तच्छि-
खायां, यच्चतुर्थं तत्सर्वेष्वङ्गेषु
यत्पञ्चमं तत्सर्वेषु यत् षष्ठं
तत्सर्वेषु देशेषु नृ. षट्च. ७
(सहोवाच-) यत्प्रथमं नाभ्यकीर्तयो
नामग्राहमथ नानुवत्स्य इति शौनको. १।५
(अथ) यत्प्रथमास्तमिते
तन्निधनम् छांदो. २।९।८

(अथ) यत्प्रथमोदिते स प्रस्तावः छान्दो. २।९।२
यत्प्रदक्षिणं प्रक्रमन्ति तेन पाप्मानमवधुन्वंति सहवै. २
यत्प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं तस्मात्प्रपदे... १ ऐत. १।४।१
यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व, तद्ब्रह्मेति तैत्ति. ३।१
यत्प्रयन्त्यभिसंविशन्ति, तं मामेव विदित्वोपासीत भस्मजा. २।५
(अथ) यत्प्रशश्ःसतुः कर्म हैव तत्प्रशश्ःसतुः पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन बृह. ३।२।१३
यत्प्राक्सवनेभ्यः सैकाविधा त्रीणि सवनानि यदूर्ध्वं सा पञ्चमी १ ऐत. ३।३।४
यत्प्राक्तृचाशीतिभ्यः सैकविधा १ऐत. ३।४।३
यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते केनो. १।९
यत्प्राणैः प्रतितिष्ठसि (मा.पा.) प्रश्नो. २।७
यत्प्रातरनुवाको यत्प्रउगं यदाज्यं यन्मरुत्वतीयमिति छाग. २।२
यत्प्रातर्मध्यन्दिनं सायं च तानि सवनानि महाना. १८।१
यत्प्रातः सोऽयं प्रातः (होमः) कठरु. ३
यत्प्रियमानन्दं तदेतत्सर्वाकारा महात्रिपुरसुन्दरी बह्वृचो. ३
यत्र कालमकालं वा निश्चयः संशयो नहि ते. बिं. ५।१४
यत्र काले त्वनावृत्तिः भ. गी. ८।२३
यत्र कुण्डलिनी नाम पराशक्तिः प्रतिष्ठिता [यो. शि.१।६+ वराहो. ५।५१
यत्र कुत्र स्थितस्य शिरसि व्योमज्योतिर्दृष्टं चेत्स तु योगी भवति अद्वयता. ३
यत्र कुत्रापि म्रियते देहान्ते देवः परमं ब्रह्म तारकं व्याचष्टे नृ. पू. १।७
यत्र कुत्रापि वा काश्यां मरणे स महेश्वरः । जन्तोर्दक्षिणकर्णे तु मत्तारं समुपादिशेत मुक्तिको. १।२०
यत्र कुत्रापि वा नादे लगति प्रथमं मनः । तत्रतत्र स्थिरीभूत्वा तेन सार्धं विलीयते ना. बि. ३८
यत्र क चार्या वाचो भाषन्ते विदुरेनं तत्र ३ ऐत. २।५।३
यत्र क चैति तदेव प्रतितिष्ठत्येवं विद्वान् बृह. १।२।३
यत्र कापि स्थितं च यत्तत्रद्धि धार्यं संस्कारसहितं धार्यम् (भस्म) बृ. जा. ३।१
यत्र गत्वा धाम्नि लयं यान्ति योगीन्द्राः सामर. ५५
यत्र गत्वा न निवर्तन्ते योगिनः (तत्परमं पदं) [नृ.पू.५।१६+ ना. प. ९।२२
यत्र गुरुस्तत्र शिवः । शिवगुरुस्वरूपो महेश्वरः रुद्रोप. ३
यत्र चतुर्धा मुक्तयः सेव्यमाना आसते सामर. ९२
यत्र चन्द्रस्तन्नक्षत्राणि यत्र वा नक्षत्राणि स चन्द्रमास्ते द्वे योनिस्तदेकं मिथुनम् सावित्र्यु. ७
यत्र च मथुरा गोकुलं द्वारका वैकुण्ठपुरी श्वेतपुरी रामपुरी यमपुरी नरसिंहपुरी नरनारायणपुरी कुबेरपुरी गणेशपुरी शक्रपुरी एता देवतास्तिष्ठन्ति राधोप. ४।१
यत्र चिन्मात्रकलना यात्यपह्नवमञ्जसा । तच्चिन्मात्रमखण्डैकरसं ब्रह्म भवाम्यहम् ते. बिं. शीर्षकं
यत्रैवात्मनाऽऽत्मानं [यो.शि.३।१४+ भ.गी.६।२०
यत्र जाग्रति शुभाशुभं निरुक्तमस्य देवस्य...परापरं ब्रह्म ब्रह्मो. १
यत्र जीवन्ति मूढास्तु तत्रासौ मृत एव वै (योगी) यो. शि.१।४६
यत्र ज्योतिरजस्रं यस्मिंल्लोकेऽभ्यर्हितं आ. प्र. १
यत्र तु व्यञ्जनवन्तः प्रयुञ्ज्येरन् क्षोधुकास्तव्या इनावप्रजसावुद्वातृयजमानौ स्याताम् संहितो. २।४

(अथ) यत्रिगुणं चतुरशीति-
लक्षयोनिपरिणतं भूतत्रिगुण-
मेतद्वै नानात्वस्य रूपम् मैत्रे. ३।२
यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन
कं पश्येत्... बृह. ४।५।१५
(अथ) यत्र देव इव राजेवाह-
मेवेद९ सर्वोऽस्मीति मन्येत
सोऽस्य परमो लोकः बृह. ४।३।२०
यत्र देवा अमृतमानशानास्तृतीये
धामान्यभ्यैरयन्त महाना. २।५
(अथ) यत्र द्वैतीभूतं विज्ञानं
तत्र हि शृणोति पश्यति
जिघ्रति रसयते चैव स्पर्शयति
सर्वमात्मा जानीतेति मैत्रा. ६।७
यत्र धर्ममधर्मं वा शुद्धं वाऽशुद्ध-
मण्वपि ते. बिं. ५।१३
यत्र धर्मा न वर्तन्ते विवेकस्तत्र
नोच्यते अ. शां. ६०
यत्र न चन्द्रमा भाति, यत्र न
नक्षत्राणि भान्ति, यत्र नाग्नि-
र्दहति, यत्र न मृत्युः प्रविशति,
यत्र न दुःखं...परमं पदं.. नृ. पू. ५।१६
यत्र न जरा न मृत्युर्न कालो न
भङ्गो न जयो न विवादो न
हिंसा न शान्तिर्न स्वप्न एवं
लीलाकामशरीरी स्वविनो-
दार्थं भक्तैः सहोत्कण्ठितैस्तत्र
क्रीडति कृष्णः राधोप. ४।२
यत्र न मोहो न दुःखं ग. शो. ५।६
यत्र न सूर्यस्तपति, यत्रनवायुर्वाति नृ. पू. ५।१६
यत्र नान्यत्पश्यति नान्यच्छृणोति
नान्यद्विजानाति स भूमा छांदो. ७।२४।१
यत्र नाभ्युदितं चित्तं तद्वै सुख-
मकृत्रिमम् अ. पू. ५।४५
यत्र नासन्न सद्रूपो नाहं नाप्यन-
हङ्कृतिः । केवलं क्षीणमनन
आस्तेऽद्वैतेऽतिनिर्भयः
[अक्ष्युप. ४१+ वराहो. ४।१७

यत्र निशितासिशतपातनमुत्पल-
ताडनवत्सोढव्यं... नावहेल-
नया भवितव्यमेवं दृढवैराग्या-
द्बोधो भवति महो. ४।२६
(अथापि) यत्र नील इवाग्निर्दृश्यते
यथा मयूरग्रीवा ३ ऐत. २।४।६
यत्र नृसिंहादयो देवताआवरणानि राधोप. ४।२
यत्र पुरुषस्तत्स्त्री यत्र वा स्त्री
स पुरुषस्ते द्वे योनिस्तदेकं
मिथुनम् सावित्र्यु. ९
यत्र पार्थो धनुर्धरः भ. गी. १८।७८
यत्र पूर्वे साध्याः सन्ति देवाः चित्त्यु. १२।७
[+महावा.४+पु.सू.१६+ ऋ.अ. ८।४।१९=
[मं. १०।९०।१६+ वा. सं. ३१।१६
यत्र बिन्दुश्च नादश्च सोमसूर्याग्नि-
वायवः । इन्द्रियाणि च सर्वाणि
लयं गच्छंति सुव्रत यो. शि. ३।११
यत्र (विद्यायां) ब्रह्म प्रतिष्ठितम्,
विश्वेदेवाः प्रतिष्ठिताः, यस्तां
न वेद किमन्यैर्वेदैः करिष्यति अव्यक्तो. ३
यत्र ब्रह्माण्डानि कोटिशो विराज-
मानानि राजन्ते सामर. ५५
यत्र ब्रह्माण्डान्युत्पद्यन्ते लीयन्ते सामर. ५
यत्र ब्रह्मा पवमानेति षट् ३ ऐत. २।४।४
यत्र भार्गवी यमुना समुद्रममृत-
मयं वृन्दावनानि नीलपर्वत-
गोवर्धनसिंहासनं प्रासादो
मणिमण्टपो विमलादिषोडश-
चण्डिकागोप्यः राधोप. ४।२
(अथापि) यत्र भूमिं ज्वलंतीमिव
पश्येत तदप्येवमेव विद्यादिति
प्रत्यक्षदर्शनानि ३ ऐत. २।४।६
यत्र मनस्तद्वाग्यत्र वा वाक् तन्म-
नस्ते द्वे योनिस्तदेकं मिथुनम् सावित्र्यु. ८
यत्र मन्त्रममन्त्रं वा विद्याऽविद्या न.. ते. बिं. ५।१४
यत्र यज्ञस्तत्र छन्दांसि यत्र वा
छन्दांसि स यज्ञस्ते द्वे योनि-
स्तदेकं मिथुनम् सावित्र्यु. ४

यत्र यत्र धृतो वायुरङ्गे रोगादिदूषिते । धारणादेव मरुतस्तत्तदारोग्यमश्नुते त्रि. ब्रा. १२०

यत्र यत्र मनो याति तत्र तत्र परं पदम् [पैङ्गलो. ४।२१+ सौभाग्य. २३

यत्र यत्र मनो याति ब्राह्मणस्तत्र दर्शनात् । मनसा धारणं चैव धारणा सा परा मता ते. बिं. १।३५

यत्र यत्र मनो याति न निवार्य मनस्तदा । अवारितं क्षयं याति वार्यमाणं तु वर्तते (वर्धते) अमन. २।७०

यत्र यत्र मृतो ज्ञानी येन वा केन मृत्युना । यथा सर्वगतं व्योम तत्र तत्र लयं गतः पैङ्गलो. ४।१३

यत्र योगेश्वरः कृष्णः भ. गी. १८।७८

यत्र रविसोमौ न तपतः ग. शो. ५।६

यत्र रसावात्मानमुपसंहृत्याजूगुपत् शौनको. ४।५

यत्र लक्ष्मीर्जाम्बवती राधिका विमला चन्द्रावली सरस्वती ललितादिरिति राधोप. ४।१

यत्र लोका न लोका देवा न देवा वेदा न वेदा यज्ञा न यज्ञा माता न माता...एकमेव तत्परं ब्रह्म विभाति निर्वाणम् ब्रह्मो. ३

यत्र वरुणस्तदापो यत्र वा आपस्तद्वरुणस्ते द्वे योनिस्तदेकं मिथुनम् सावित्र्यु. २

यत्र वर्णा न वर्तन्ते विवेकस्तत्र नोच्यते अ.शां. ६०

यत्र वा अस्य सर्वमात्मैवाभूत्.. बृह. २।४।१४

(अथ) यत्र वागुच्चारयत्युपैव तत्र न्येतीत्येवमेवैतत् बृह. ४।३।५

यत्र वाऽन्यदिव स्यात्तत्रान्योऽन्यत् पश्येत् बृह. ४।३।३१

यत्र वा पितुस्तत्पुत्रस्यैतत्तदुक्तं भवंति १ ऐत. १।८।१

यत्र वायुर्नेश्चराणिनवाति(न)भान्ति ग. शो. ५।६

यत्र वायुस्तदाकाशो यत्र वा आकाशस्तद्वायुस्ते द्वे योनिस्तदेकं मिथुनम् सावित्र्यु. ३

यत्र विद्याविद्ये न विदामः गोपालो. १।१२

यत्र विराण्नृसिंहोऽवभासते तत्र खलूपासते अव्यक्तो. ९

यत्र विश्वं भवत्येकनीडम् । यस्मिन्निदꣳ संचाविचैति सर्वꣳ स ओतः प्रोतश्च विभुः प्रजासु महाना. २।३

यत्र वृक्षा आधिदैविका देवा एव भवन्ति सामर. ६

यत्र वैकुंठेऽनेकशो भक्ता जयन्तकुमुदजयविजयगरुडाद्याः शतशः पार्षदाः राजमाना भवन्ति सामर. ९२

यत्र सङ्कल्पनं तत्र मतोऽस्तीत्यवगम्यताम् महो. ४।५२

यत्र सप्तावरणानि तेजोमयानि सामर. ५

यत्र समुद्रतीरे च निरन्तरं कामधेनुवृन्दम् राधोप. ४।२

यत्र सर्वमात्मैवाभूत्तत्र कुत्र वा मनुते । कथं वा गच्छतीति गोपालो. १।१०

यत्र सुप्ता जना नित्यं प्रबुद्धस्तत्र संयमी । प्रबुद्धा यत्र ते विद्वान्सुषुप्तिं याति योगिराट् याज्ञव. २९

यत्र सुप्तो न कञ्चन कामयते तत्सुषुप्तम् श्री. वि. ता. ३।१

यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति बृह. ४।३।१९

यत्र सुप्तो न कञ्चन कामं कामयते ... स्वप्नं (स्वप्ने) पश्यति तत्सुषुप्तम् मांडू. ५ [गणेशो. १।३+नृ. पू. ४।२ रामो. २।३

यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति न तत्र देवा न देवलोका यज्ञा न.. सुबालो. ४।४

यत्र सुहार्दः सुकृतो मदन्ते विहाय

यत्र रोगं तन्वाꣳ स्वायाम् सह्वै. १०

यत्र स्तनयित्नुस्तद्विद्युद्यत्र वा विद्युत्तत्र स्तनयित्नुस्ते द्वे योनिस्तदेकं मिथुनम् सावित्र्यु. ५

यत्र ह क्च पुत्रस्य तत्पितुः, यत्र वा पितुस्तत्पुत्रस्य	१ ऐत. १।८।१
यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति	बृह. २।४।१४
यत्राग्निर्मृत्युर्न दहति (न) प्रविशति	ग. शो. ९।६
यत्राग्निस्तत्र पृथिवी यत्र वै पृथिवी तत्राग्निस्ते द्वे योनिस्तदेकं मिथुनम्	साविञ्यु. १
यत्रात्मना सृष्टिलयौ जीवन्मुक्तिदशागतः । सहजः कुरुते योगं सेयं निष्पत्तिभूमिका..	वराहो. ५।७५
यत्रादित्यस्तद्द्यौ यत्र वा द्यौस्तदादित्यस्तेद्वेयोनिस्तदेकंमिथुनम्	सावित्र्यु. ६
यत्राद्वैतीभूतं विज्ञानं कार्यकारणकर्मनिर्मुक्तं निर्वचनमनौपम्यं निरुपाख्यं किं तदङ्गवाच्यम्	मैत्रा. ६।७
यत्रान्तर्याम्यादिभेदस्तत्त्वतो नहि युज्यते । निर्भेदं परमाद्वैतं स्वमात्रमवशिष्यते	अध्यात्मो.शीर्षकं
यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पम्	छांदो. ७।२४।१
यत्रापह्नवतां याति स्वाविद्यापदविभ्रमः । तन्त्रिपाज्ञारायणाख्यं स्वमात्रमवशिष्यते	त्रि.म.ना. शीर्षकं
यत्रामृतः स पुरुषो ह्यव्ययात्मा	मुण्ड. १।२।११
यत्रायं पुरुषो म्रियते उदस्मात् प्राणाः क्रामन्त्याहो ३ नेति..	बृह. ३।२।११
यत्रायं पुरुषो म्रियते किमेनं न जहातीति नामेत्यनन्तं वै नामानन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति	बृह. ३।२।१२
यत्रायं पुरुषो रमते तत्रायं रसो व्रजति	सामर. ५
यत्रायं मणिमानं न्येति	बृ. उ. ४।३।३६
यत्रारे ब्राह्मणस्यान्वेषणा तदेनमच्छेति	छांदो. ४।१।७
यत्रालम्बालम्बिभावो विद्यते न कदाचन । ज्ञाविज्ञसम्यग्ज्ञालम्बं निरालम्बं हरिं भजे	निरा.शीर्षकं
यत्रासंभिन्नतां याति स्वाविरिक्तभिदावतिः । संविन्मात्रं परं ब्रह्म तत्स्वमात्रं विजृम्भते	स्कन्दो. शीर्षकं
यत्रासां दिशामन्तस्तद्भ्रमयाञ्चकार	बृह. १।३।१०
यत्रासौ केशान्तो विवर्तते	तैत्ति. १।६।१
यत्रासौ संस्थितः कृष्णः स्त्रीभिः शक्त्या समाहितः	गोपालो. २।२
यत्रास्तमितशायी स्यान्निरग्निरनिकेतनः । यथालब्धोपजीवी स्यान्मुनिर्दान्तो जितेन्द्रियः	ना. प. ५।२६
यत्रास्ति वासना लीना तत्सुषुप्तं न सिद्धये	अ. पू. ९।१६
यत्रास्ते च गुरुर्ब्रह्मन्दिव्ययोगप्रदायकः ।... तेनोक्तः सम्यगभ्यासंकुर्यादग्नावतन्द्रितः	योगकुं. २।१४
यत्रास्य पुरुषस्य मृतस्याग्नि वागप्येति	बृह. ३।२।१३
यत्रिवृत् पञ्चदशः सप्तदश एकत्रिंश इति कास्य तद्गात्	छाग. २।२+४।२
यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपशृणोति तदेतदृष्टं च श्रुतं चेत्युपासीत, चक्षुष्यः श्रुतो भवति	छांदो. ३।१३।८
यत्रैतत्पुरुष आर्तो मरिष्यन्नाबल्यं न्येत्यसंमोहं नैति तदाहुरुदक्रमीच्चित्तम्	कौ. त. ३।३
(अथ) यत्रैतत्पुरुषः पिपासति तेज एव तत्पीतं नयते	छान्दो. ६।८।५
यत्रैतत्पुरुषः सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवति	कौ. त. ३।३
यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य नाम तदा सम्पन्नो भवति	छांदो. ६।८।१
यत्रैतत्पुरुषोऽशिशिष्यति नामाप एव तदशितं नयन्ते	छांदो. ६।८।३
(अथ) यत्रैतदबलिमानं नीतो भवति तमभित आसीना आहुर्जानासि मां जानासिमामिति	छांदो. ८।६।४
यत्रैतदभूयत प्रबदागात्	कौ. त. ४।१८

(अथ) यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्व-माक्रमते — छांदो. ८।६।५
यत्रैतदस्मिञ्छरीरे संस्पर्शेनोष्णिमानं विजानाति तस्यैषा श्रुतिः — छांदो. ३।१३।८
यत्रैतदित्थेत्थेत्यभिपश्यति — आर्षे. ९।१
यत्रैतदूर्ध्वोच्छ्वासी भवति — बृह.४।३।३५,३८
यत्रैतद्देवास्तत्प्राप्य तदमृतो भवति, यदमृता देवाः — कौ. त. २।१४
(अथ) यत्रैतदाकाशमनु विषण्णं चक्षुः स चाक्षुषः पुरुषः — छांदो. ८।१२।४
(अथ) यत्रैनं घ्नन्तीव जिनंतीव हस्तीव विच्छाययति — बृह. ४।३।२०
यत्रैव जातं सकलेवरं मनस्तत्रैव लीनं कुरुते स योगात् । स एव मुक्तो हि निरहङ्कृतिःसुखी.. — यो. शि. १।१२३
यत्रैवंविदꣳहब्राह्मणा ब्रह्माणा (मा.) — छां. उ.४।१७।९
यत्रैवंविद्ब्रह्मा भवति — छांदो.४।१७।८,९
यत्रैष एतद्वालाके पुरुषोऽशयिष्ट यत्रैतदभूयत एतद्गाद्धिता नाम हृदयस्य नाड्यः — कौ. त. ४।१९
यत्रैष जगदाभासो दर्पणान्तः पुरं यथा । तद्ब्रह्माहमिति ज्ञात्वा कृतकृत्यो भवानघ — अध्यात्मो. १०
यत्रोपरमते चित्तं निरुद्धं योगसेवया । यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति [यो. शि. ३।१४+ — भ. गी. ६।२०
यत्रोपाकृते प्रातरनुवाकेन पुरा — छां. उ. ४।१६।४
यत्सकललोकरक्षणचक्रं यन्मायात्मा तच्चतुर्थस्य — नृ. षट्च. ६
यत्सकृदुपस्पृशति तेन सामानि... प्रीणाति — सह्वै. १५
(अथ) यत्सङ्गववेलायाꣳ स आदित्यस्तदस्य वयाꣳस्यन्वायत्तानि — छान्दो. २।९।४
यत्सञ्चरति स वायुः [गर्भो. ६+ — शारीरको. १
यत्सञ्चरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यः — महाना. १८।१
यत्सत्यं ब्रह्म तद्विस्मृतं नृणाम् — महो. ४।१३२
यत्सत्यं तदुपास्यताम् — पैङ्गलो. ४।१७

यत्सत्यं वा विष्णुरुद्योगः सूर्यो गौर्वा विष्णुर्विशत् विश्वं, विश्वं सन्दधानः तद्विश्वं विष्णवे विश्वरूपाय स्वाहा — पारमा. ५।५
यत्सत्यं विज्ञानमानन्दं निष्क्रियं निरञ्जनं सर्वगतं सुसूक्ष्मं सर्वतोमुखमनिर्देश्यममृतमस्ति तदिदं निष्कलं रूपम् — शांडिल्यो. ३।२
यत्सत्त्वमुभयोरनुगोप्ता तत्सत्यं सत्यपदाय सत्याय स्वाहा — पारमा. ४।९
(अथ) यत्सत्रायणमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येव सत आत्मनस्त्राणं विन्दते — छान्दो. ८।५।२
यत्सप्तभूमिकाविद्यावेद्यानन्दकलेवरम् । विकलेवरकैवल्यं रामचन्द्रपदं भजे — अक्ष्यु. शीर्षकं
यत्सप्तान्नानि मेधया तपसाऽजनयत्पितेति मेधया हि तपसा जनयत्पितैकमस्य साधारणमितीदमेवास्य तत्साधारणमन्नं यदिदमद्यते — बृह. १।५।२
यत्सप्तान्नानि मेधया तपसाऽजनयत्पिता । एकमस्य साधारणं द्वे देवानभाजयत् । त्रीण्यात्मनेऽकुरुत पशुभ्य एकं प्रायच्छत् — बृह. १।५।१
यत्समत्वं तयोरत्र जीवात्मपरमात्मनोः...समाधिरभिधीयते — सौभाग्य. २०
यत्समाधौ परं ज्योतिरनन्तं विश्वतोमुखम् । तस्मिन्दृष्टे क्रियाकर्म यातायातो न विद्यते — यो. चू. ११३
यत्समूलमावृहेयुर्वृक्षं न पुनराभवत् — बृह. ३।९।३३
(अथ) यत्समृद्धमिदं तस्यान्नं — मैत्रा. ६।३६
(अथ) यत्सम्प्रति मध्यन्दिने स उद्गीथस्तदस्य देवा अन्वायत्ताः — छान्दो. २।९।५
यत्सम्मितमनु संयन्ति प्राणिनस्तन्मे मनः शिवसङ्कल्पमस्तु — २ शिवसं. २
यत्सर्वनिष्ठमजरं समस्तं — पारमा. १।८
यत्सर्वस्य सोमोऽहमेव जनिता विश्वाधिको रुद्रो महर्षिः — भस्मजा. २।५

यत्सर्वहृदयागारं यत्र सर्वं प्रतिष्ठितम् । वस्तुनो यन्निराधारं वासुदेवपदं भजे वासुदे. शीर्षकं

यत्सर्वशास्त्रसिद्धान्तं यत्सर्वहृदयानुगम् अ. पू. ३।२१

यत्सर्वं चाप्यसर्वं च यत्तत्त्वं तदसौ स्थितः अ. पू. ३।२३

यत्सर्वं तद्ब्रह्म पं. ब्र. १

यत्सर्वं परिपश्यतीति सौक्ष्म्यात् सूर्यता. १।२

यत्सर्वं सर्वगं वस्तु यत्तत्त्वं तदसौ स्थितः अ. पू. ३।२२

यत्सङ्करमभिधावाम्याशाम् सहवै. ९

यत्संवत्सरं वत्स्यथ अथ वेदिष्यथेति । ते ह संवत्सरमूषुः छाग. ४।३

यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्व बृह. ३।४।१

यत्सांख्यैः प्राप्यते स्थानं भ. गी. ५।५

यत्साधुभवतिसाधुबतेत्येवतदाहुः छान्दो. २।१।३

यत्साम्पराये महति ब्रूहिनस्तत्... कठो. १।२९

यत्सामानि सोम एभ्यः पवते... तद्देवांस्तर्पयति सहवै. १४

यत्सामानि सोमाहुतिभिः... तद्देवास्तर्पयति सहवै. १४

यत्साम्यज्ञानकालाग्निस्त्वातिरिक्तास्तिताभ्रमम् । करोति भस्म निश्शेषं तद्ब्रह्मैवास्मि केवलम् भस्मजा.शीर्षकं

यत्सायं प्रातरत्ति तत्समिधम् महाना. १८।१

यत्सारभूतं सकलं धरित्री मोदप्रायेणानुभूतमनुविधं सूक्ष्मः पारमा. ८।१

यत्सारस्वतं तत्तृतीयस्य, यस्य यत्कामं देवं तच्चतुर्थस्य नृ. षट्च. ४

यत्सीमिन्द्रो अकरोदनीकैः बा. मं. १०

यत्सुचक्रं यत्प्रियात्मा तद्द्वितीयस्य नृ. षट्च. ६

यत्सुवर्णꣳ सा द्यौः छान्दो. ३।१९।२

(शरीरे) यत्सुषिरं तदाकाशम् [गर्भो. १+ शारीरको. १

यत्सुषुप्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा महाना. १४।२

यत्सूक्ष्मं तच्छुक्लं [बटुको. १९+ अ. शिरः. ३।४

यत्स्वपन्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा महाना. १४।२

यत्स्वयं प्राक्तनं कर्म पितामातेति तत्स्मृतम् शिवो. ७।१०९

यत्स्वरूपज्ञानिनः सर्वमविदितं विदितं भवति । तत्सर्वं परमरहस्यं कथितम् त्रि. म. ना. ८।६

यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः सन्तिष्ठते सहवै. १४

यथा कटकशब्दार्थः पृथग्भावो न काञ्चनात् । न हेमकटकात्तद्वद्दृच्छच्छब्दार्थता परा महो. ४।४६

यथा करी करेणैव पानीयं प्रपिबेत् सदा । सुषुम्ना वज्रजालेन पवमानं ग्रसेत्तथा यो. शि. १।११७

(ते होचतुः) यथाऽकला अवदन्तो वाचा प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाꣳसः बृह. ६।१।८

यथाकर्म यथाविद्यं (स...प्रत्याजायते) कौ. त. १।२

यथा कला अवदन्तः प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह वाक् छां. ५।१।८

यथाकामं प्रश्नान्पृच्छथ यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति प्रश्नो. १।२

(अतः) यथाकामं जपित्वा पश्येम शरदः शतमिन्द्र जीवेत्याशिषः प्रार्थयते सन्ध्यो. ३

यथा कायस्तथा सर्वं चित्तदृश्यमवस्तुकम् अ. शां. ३६

यथाकारी यथाचारी तथा भवति, साधुकारी साधुर्भवति, पापकारी पापो भवति बृह. ४।४।५

यथाऽऽकाशस्तथा देह आकाशादपि निर्मलः यो. शि. १।४२

यथाऽऽकाशस्थितो नित्यं भ. गी. ९।६
यथाकाशं समुद्दिश्य गच्छाद्भिः
पथिकैः पथि । नानातीर्थानि
दृश्यन्ते नानामार्गास्तु सिद्धयः यो. शि. १।१५७
यथाऽऽकाशे द्विचन्द्रत्वं तद्वत्सत्ये
जगत्स्थितिः यो. शि. ४।१६
यथाऽऽकाशो घटाकाशो महाकाश
इतीरितः । तथा भ्रान्तेः(न्तै-)
र्द्विधा प्रोक्तो ह्यात्माजीवेश्वरा-
त्मना [ब्र. पू. ५।७७+ मा. द. १०।३
यथा काश्यो वा वैदेहो वोग्रपुत्रं
उज्यं धनुरधिज्यं कृत्वा द्वौ
बाणवन्तौ सपत्नातिव्याधितौ
हस्ते कृत्वोपोत्तिष्ठेदेवमेवाहं
त्वाद्वाभ्यां प्रश्नाभ्यामुपोदस्थां बृह. ३।८।२
यथा कुमारको निष्काम आनन्द-
मभियाति । तथैव दैवः स्वप्न
आनन्दमभियाति परब्र. २
यथा कुमारो निष्काम आनन्द-
मुपयाति.. ब्रह्मो. १
यथा कुर्वति भारत भ. गी. ३।२५
यथा कूपःशतधारःसहस्रधारोऽक्षितः महाना. १५।५
यथा कृताय विजितायाधरेयाः
संयन्त्येवमेनं९ सर्वं
तदभिसमेति छां. ४।१।४,६
यथा केशः सहस्रधाभिन्न एव-
मस्यैताहिता नामनाड्योऽन्त-
र्हृदये प्रतिष्ठिता भवन्ति बृह. ४।२।३
यथा केशः सहस्रधा भिन्नस्तथा
हिता नाम नाड्यो भवन्ति सुबालो. ४।४
यथा केशः सहस्रधा भिन्नस्तावता-
ऽणिम्ना तिष्ठन्ति
(हिता नाम नाड्यः) बृह. ४।३।२०
यथा कोशस्तथा जीवो यथा
जीवस्तथा शिवः त्रि. ब्रा. १९
यथा क्रतुरस्मिँल्लोके पुरुषो भवति
तथेतः प्रेत्य भवति स क्रतुं
कुर्वीत छान्दो. ३।१४।१

यथाक्रमोऽयं परलोकस्थाने भवति
तमाक्रममाक्रम्योभयान्पाप्मन
आनन्दांश्च पश्यति बृह. ४।३।९
(ते होचतुः) यथा क्लीबा
अप्रजायमाना रेतसा.. बृह. ६।१।१२
यथाक्षणं यथाशास्त्रं यथादेशं
यथासुखम् । यथासम्भवस-
त्सङ्गमिमं मोक्षपथक्रमम् ॥
तावद्विचारयेत् प्राज्ञो
यावद्विश्रान्तिमात्मनि महो. ४।३९
यथा क्षारमयत्नेन प्राप्यते लवणं
स्वयम् । ब्रह्मज्ञान्यप्ययत्नेन
निर्वाणं मनसस्तथा अमन. १।३०
यथा क्षुरः क्षुरधानेऽवहितः
स्याद्विश्वम्भरो वा विश्वम्भर-
कुलाये तं न पश्यन्ति बृ. उ. १।४।७
यथा खलु सोम्येमास्तिस्रो
देवताः...(मा. पा.) छां. उ. ६।८।६
यथा खं श्येनमाश्रित्य याति
स्वमालयमेवं सुषुप्तो ब्रूते ब्रह्मो. १
यथा गङ्गा शिवसङ्गात्तथैव न सूतकं
वा नाप्यशुचित्वमेषाम् शि. शि. १०
यथागन्धर्वनगरंयथावारिमरुस्थले ब्र. पू. १।२०
यथा गुरुस्तथैवेशो यथैवेशस्तथा
गुरुः । पूजनीयो महाभक्त्या
न भेदो विद्यतेऽनयोः यो. शि. ५।५८
यथाऽग्निगर्भा पृथिवी यथा द्यौ-
रिन्द्रेण गर्भिणी । वायुर्दिशां
यथा गर्भ एवं गर्भं दधामि ते बृह. ६।४.२२
यथाऽग्निनाऽयःपिण्डो वाऽभिभूतः
कर्तृभिर्हन्यमानो नानात्व-
मुपैत्येवं वाव खल्वसौ भूतात्मा-
न्तःपुरुषेणाभिभूतो गुणै-
र्हन्यमानो नानात्वमुपैति मैत्रा. ३।३
यथाऽग्निर्दारुमध्यस्थो नोत्तिष्ठेन्मथनं
विना। विना चाभ्यासयोगेन
ज्ञानदीपस्तथा नहि
[यो. शि. ६।७६+ योगकुं. ३।१४

यथाऽग्निर्देवानां ब्राह्मणो मनुष्याणां वसन्त ऋतूनामेवं गायत्री छन्दसाम् सन्ध्यो. १८
यथाऽग्निर्वै देवानामन्नादः सोमो-ऽन्नमग्निनैवान्नमित्येवंवित्... मैत्रा. ६।१०
यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणा...व्युच्चरंति बृह. २।१।२०
यथाऽग्नेर्ज्वलतो सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते [कौ. त. ३।३+ ४।१९
यथा घटघटमध्ये बहुचन्द्रोऽपि दृश्यते अद्वैतो. ९
यथाङ्गारानपोह्य भस्मनि जुहुयात्तादृक्तत्स्यात् छांदो. ५।२४।१
यथा च मरणंप्राप्य आत्माभवति.. कठो. ५।६
यथाऽचिरात् सर्वपापं व्यपोह्य परात्परं पुरुषं याति विद्वान् कैव. १
यथा वायुः पुष्करिणीᳲ समिङ्गयति सर्वतः बृ. उ. ६।४।२३
यथा जपाकुसुमसान्निध्याद्रक्तस्फटिकप्रतीतिस्तदभावे शुद्धस्फटिकप्रतीतिः त्रि. म. ना. ३।७
यथा जले जलं क्षिप्तं क्षीरे क्षीरं घृते घृतम् । अविशेषो भवेत्तद्वजीवात्मपरमात्मनोः पैङ्गलो. ४।१०
यथा जलौकाऽममं नयत्यात्मानं नयति परं सन्धय ब्रह्मो. १
यथा जातरूपधरो निर्ग्रन्थोनिष्परिग्रहः... सन्न्यासेन देहत्यागं करोति स परमहंसो नाम जाबालो. ६
यथा जातरूपधरो निर्द्वन्द्वो निष्परिग्रहस्तत्त्वब्रह्ममार्गे सम्यक्संपन्नः ...सन्न्यासेनैव देहत्यागं करोति स कृतकृत्यो भवति ना. प. ३।८७
यथा जात्यन्धस्य रूपज्ञानं न विद्यते तथा गुरूपदेशेन विना कल्पकोटिभिस्तत्त्वज्ञानं न विद्यते त्रि. म. ना. ५।४
यथा ज्ञास्यसि तच्छृणु भ. गी. ७।१
यथा तथा वा भवतु ह्युपनायनकर्मणि । उपदिष्टे मम सुते ब्रह्मणि त्वत्प्रसादतः शु. र. १।५
(अथ) यथा तन्नोर्विसर्पिस्तृणकाष्ठसंस्पर्शेनोज्ज्वलतीत्येवं वाव खल्वसावप्राणाख्यः प्राणसंस्पर्शेनोज्ज्वलति मैत्रा. ६।२६
यथा तमः सवितानुज्ञकरसो ह्ययमात्मा चिद्रूप एव नृसिंहो. २।७
यथा तरङ्गकल्लोलैर्जलमेव स्फुरत्यलम् । घटनाम्ना यथा पृथ्वी पटनाम्ना हि तन्तवः यो. शि. ४।१७
यथा तु कथा च ब्रुवन वा ब्रुवन्तं वा ब्रूयादभ्याशमेव यत्तथा स्यात् [३ऐत.१।३।४+ १।४।२
यथा तु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति छांदो. ६।८।६
यथा तु खलु सोम्येमास्तिस्रो देवताः...(मा. पा.) छां. उ.६।४।७
यथा तूली तुलाधारां... मनोवृत्तिस्तथाऽऽत्मनि अमन. २।७४
यथा तृणाशिनो विवेकहीनाः परप्रेष्याः... तथा तत्स्वामिन इव सर्वज्ञ ईशः पशुपतिः जाबाल्यु. ४
यथा तृतीयकाले तु रविः प्रत्याहरेत्प्रभाम् । तृतीयाङ्गस्थितो योगी विकारं मानसं हरेत् यो. चू. १२१
यथाऽऽदर्शे तथाऽऽत्मनि यथा स्वप्ने तथा पितृलोके कठो. ६।५
यथाऽऽदर्शो मलेन च भ. गी. ३।३८
यथा दाह्यं दग्ध्वोऽग्निरविकल्पो ह्ययमात्मा नृसिंहो. २।७
यथाऽसौ दिव्यादित्य एवमिदं शिरसि चक्षुः ३ ऐत. १।२।२
यथा दीपो निवातस्थः भ. गी. ६।१९
यथा दुन्दुभेः खं, तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छति बृह. ५।१०।१

यथा देहान्तरप्राप्तेः कारणं भावना नृणाम् । विषयं ध्यायतः पुंसो विषये रमते मनः यो. शि. ३।२४
यथा द्यौरिन्द्रेण गर्भिणी, वायुर्दिशां यथा गर्भ एवं गर्भं दधामि ते बृह. ६।४।२२
यथाधिकारवाञ्च्यसेत्पूर्णदीक्षांल्लभेत् गुह्यषोढा. १
यथाऽधीमहे स्वर्ग्या देवस॰ हिता भवति संहितो. १।१
यथा ध्यानेन वैराग्यमैश्वर्य स्वस्य पूजनात रा. पू. १।५
यथा न जायते किञ्चिज्जायमानं समन्ततः अद्वैत. २
यथा नदी जायते सागर एकोऽपि सागरप्रतिभासितः । तथा ब्रह्म सर्वान्तरात्मा मध्ये प्रकाशितम् अद्वैतो. ३
यथा नदीनां बह्वोऽम्बुवेगाः भ. गी. ११।२८
यथा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं...(मा.) मुण्डको. ३।२।८
यथा नद्यः स्यन्दमानाः समुद्रे गच्छन्त्यस्तं नामरूपे विहाय । तथा विद्वान्नामरूपाद्विमुक्तः परात्परं जगदम्बामुपैति गुह्यका. ३८
यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् मुण्ड. ३।२।८
यथा नद्यः किङ्किणी कांस्यचक्रकमेकविः कुन्थिका वृष्टिनिवाते.. मैत्रा. ६।२२
(सहोवाच) यथा नस्त्वं गौतम मापराधास्तव च पितामहाः बृह. ६।२।८
यथाऽनादिसर्वप्रपञ्चो दृश्यते, नित्योऽनित्यो वेति संशय्येते त्रि. म. ना. ३।२
यथाऽनादिससिद्धोऽयं जीवसङ्घः, तथा मायाऽप्यनादिसिद्धा भवति, सा त्रिविधा... सामर. ९८
यथा नामी वाचकेन नाम्ना योऽभिमुखो भवेत् । तथा बीजात्मको मन्त्रो मन्त्रिणोऽभिमुखो भवेत् रा. पू. ४।३
यथा नास्ति नभोवृक्षस्तथा नास्ति जगत्स्थितिः यो. शि. ४।१९
यथा निरंकुशो हस्ती कामान्प्राप्य निवर्तते । अवारितं मनस्तद्वत् स्वयमेव विलीयते अमन. २।७१
यथा निरिन्धनो वह्निः स्वयमेव प्रशाम्यति । ग्राह्याभावे मनः- प्राणो निश्चलज्ञानसंयुतः.. २ अवधू. ६
यथा निरिन्धनो वह्निः स्वयमेव प्रशाम्यति । ग्राह्यभावे... त्रि. ब्रा. २।१६३
यथा निरिन्धनो वह्निः स्वयोनावुपशाम्यति । तथा वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यति [मैत्रा. ६।३४+ मैत्रे. १।७
यथा निर्मितको जीवो जायते म्रियतेऽपि वा । तथा जीवा अमी सर्वे भवंति न भवंति च म. शां. ७०
यथा निर्वाणकाले तु दीपो दग्ध्वा लयं व्रजेत् । तथा सर्वाणि कर्माणि योगी दग्ध्वा लयं व्रजेत् क्षुरिको. २३
यथा नु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति छांदो. ६।४।७
यथा नु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहि छांदो. ६।३।४
यथाऽनुशासनं यं यमन्तमभिकामा भवन्ति यं जनपदं यं क्षेत्रभागं तं तमेवोपजीवन्ति छांदो. ८।१।५
यथान्तरं न भेदाःस्युः शिवकेशवयोस्तथा । देहो देवालयः प्रोक्तः स जीवः केवलः शिवः स्कन्दो. १०
(ते होचुः) यथा अन्धा अपश्यन्तश्चक्षुषा प्राणन्तः प्राणेन..विद्वांसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह चक्षुः बृह. ६।१।९
यथाऽन्धा अपश्यन्तः प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः

श्रोत्रेण ध्यायन्तो मनसैवमिति
प्रविवेश ह चक्षुः छांदो. ५।१।९
यथान्नमन्नादश्चेत्यस्योपव्याख्यानम् मैत्रा. ६।१०
यथाऽपकृष्टं शैवालं क्षणमात्रं न
तिष्ठति। आवृणोति तथा माया
प्राज्ञं वापि पराङ्मुखम् अध्यात्मो. १५
यथा पक्षिगणो रात्रौ तरुमाश्रित्य
तिष्ठति। विश्रम्य च पुनर्गच्छे-
त्तद्वद्भूतसमागमः भवसं. १।२२
यथा परमतेजःपारावारतरङ्गाः
परमतेजःपारावारे प्रविशन्ति
तथैव सच्चिदानन्दात्मोपासकः
...परब्रह्मणि...प्रविवेश त्रि. म. ना. ८।३
यथा परमतेजोमहानदीप्रवाहः
परमतेजःपारावारे प्रविशति.. त्रि. म. ना. ८।३
यथा पर्वतधातूनां दह्यन्ते धमना-
न्मलाः ब्र. ना. ७
यथा पर्वतमादीप्तं नाश्रयन्ति
मृगद्विजाः। तद्वद्ब्रह्मविदो
दोषान्नाश्रयन्ति कदाचन मैत्रा. ६।१८
यथाऽपः प्रवता यन्ति, यथा मासा
अहर्जरम्। एवं मां ब्रह्मचा-
रिणः। धातरायान्तु सर्वतः स्वाहा तैत्ति. १।४।७
यथा पाण्ड्वाविकं यथेन्द्रगोपो
यथाऽग्न्यर्चिर्यथा पुण्डरीकं
यथा सकृद्विद्युत्तꣳ सकृद्वि-
द्युत्तेव या वा अस्य श्रीर्भवति बृह. २।३।६
यथा पादोदरस्त्वचा विनिर्मुच्यत
एवं ह वै स पाप्मना विनिर्मुक्तः प्रश्नो. ५।५
यथा पुत्रकामेष्टिना पुत्रं वाणिज्या-
दिना वित्तं ज्योतिष्टोमेन स्वर्ग
तथा...जीवन्मुक्त्यादिलाभः मुक्तिको. २।१
यथा पुरस्ताद्भविता प्रतीत
औद्दालकिरारुणिर्मत्प्रसृष्टः।
सुखꣳ रात्रीः शयिता वीत-
मन्युस्त्वां ददृशिवान्मृत्यु-
मुखात्प्रमुक्तम् कठो. १।११

यथा पुष्करपलाश आपो न
श्लिष्यन्त एवमेवंविदि पापं
कर्म न श्लिष्यते छांदो. ४।१४।३
यथापूर्वमविद्याकार्याणि जायन्ते।
कार्यकारणोपाधिभेदाज्जीवे-
श्वरभेदोऽपि दृश्यते त्रि. म. ना. ४।७
यथा पृथिव्यादीनां व्यापक-
शरीराणां देवविशेषाणां...
निजमूर्त्याकारदेवताः श्रूयन्ते
सर्वत्र तद्वत्परब्रह्मणः सर्वा-
त्मकस्य साकारनिराकारभेद-
विरोधो नास्त्येव त्रि. म. ना. २।३
यथा पृथिव्यामोषधयः सम्भवन्ति..
तथाऽक्षरात्सम्भवतीह विश्वम् मुण्ड. १।१।७
यथा पृथिव्यामोषध्यः सम्भवन्ति
गिलन्त्यपि..तथा तस्यां जगत् गुह्यका. २६
यथा प्रकाशयत्येकः भ. गी. १३।३४
(अथ खलु) यथा प्रज्ञायां
सर्वाणि भूतान्येकीभवन्ति
तद्व्याख्यास्यामः कौ. व. ३।४
यथा प्रदीप्तं ज्वलनं पतङ्गाः भ. गी. ११।२९
यथाप्राप्तानुभवतः सर्वत्रानभिवा-
ञ्छनात्..विज्वरो भव.. महो. ६।१४
यथाप्लुतो विरादप्लुतः ना. प. ८।४
यथाऽप्सु परीव ददृशे तथा गन्धर्व-
लोके छायातपयोरिव ब्रह्मलोके कठो. ६।५
यथाऽप्सु परीव दृश्यते (मा.पा.) कठो. ६।५
यथा फेनतरङ्गादि समुद्रादुत्थितं
पुनः। समुद्रे लीयते तद्वज्जगन्म-
य्यनुलीयते जा. द. १०।६।७
यथा बधिरा अशृण्वन्तः प्राणन्तः
प्राणेन वदन्तो वाचा पश्यन्त-
श्चक्षुषा ध्यायन्तो मनसैवमिति
प्रविवेश ह श्रोत्रम् छान्दो. ५।१।१०
(ते होचुः) यथा बधिरा
अशृण्वन्तः श्रोत्रेण...
पश्यन्तश्चक्षुषा विद्वाꣳसो
मनसा प्रजायमानारेतसैवम-
जीविष्मेति प्रविवेश ह श्रोत्रम् बृह. ६।१।१०

यथा वाचा अमनसः प्राणन्तः प्राणेन... प्रविवेश ह्मनः छांदो. ५।१।११

यथा ब्रह्म त्रिविधात्मकं सच्चिदानन्दात्मकम् सामर. ९७

यथा ब्रह्मानन्दोऽयं लोकः सच्चिदानन्दो भवति तथा जीवसङ्घस्त्रिविधो भवति सामर. ९७

यथा भवति बालानां गगनं मलिनं मलैः । तथा भवत्यबुद्धानामात्मापि मलिनो मलैः अद्वैत. ८

यथा भवेदृढासनस्तस्त्वं यावत् प्रकाशते । स्वयं प्रकाशिते तत्त्वे स्वानन्दस्तल्लक्षणाद्भवेत् अमन. २।५१

यथाभागमवस्थिताः भ. गी. १।११

यथाभूतार्थदर्शित्वमेतावद्भुवनत्रये । यदात्मैव जगत्सर्वमिति निश्चित्य पूर्णता अ. पू. २।३५

यथा भूमेः पर्वतवृक्षतृणगुल्मलतायनन्तवस्तुभेदः तथैव... मम सर्वाद्वैतमुपपन्नं भवत्येव त्रि. म. ना. ८।१

यथा मञ्जिष्ठाव्यस्तः पायुः काककुलायगन्धिकमस्यशिरो वायति ३ ऐत. २।४।४

यथा महान्सुहयः सैन्धवः (मा.पा.) बृ. उ. ६।१।१३

यथा महाफले सर्वे रसाः सर्वप्रवर्तकाः । तथैवान्नमये कोशे कोशास्तिष्ठन्ति चान्तरे त्रि. ब्रा. ११

यथा महारजनं वासः...या वा अस्य श्रीर्भवति बृह. २।३।६

यथा महासुहयः सैन्धवः पड्वीशशङ्कून् संवृहेदेवꣳ हैवेमान् प्राणान्संववर्ह बृह. ६।१।१३

यथा माक्षीकैकेन तन्तुना जालं विक्षिपति तेनापकर्षति तथैवैष प्राणः ब्रह्मो. १

यथा मातृमान्पितृमानाचार्यवान् ब्रूयात्तच्छैलिनिरब्रवीत् बृह. ४।१।२,३

यथा मा त्वं गोतमाऽवदो यथेयं न प्राक् त्वत्तः पुरा विद्या ब्राह्मणान् गच्छति तस्मादु सर्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूत् छांदो. ५।३।७

यथा मायामयाद्बीजाज्जायते तन्मयोऽङ्कुरः । नासौ नित्यो न चोच्छेदी तद्वद्धर्मेषु योजना अ. शां. ५९

यथा मायामयो जीवो जायते म्रियतेऽपि च । तथा जीवा अमी सर्वे भवन्ति नभवन्तिच अ. शां. ६९

यथा मासमहर्जरम् , एवं मां ब्रह्मचारिणः । धातरायन्तु सर्वतः स्वाहा तैत्ति. १।४।७

यथा मां त्वं तदैतानवदोयथाऽहमेषां नैकञ्चन वेद.. छांदो. ५।३।५

यथा मां त्वं तातैतानवदः..(मा.पा.) छां. उ. ५।२।५

यथा मुग्धा अविद्वाꣳसो मनसा प्राणन्तः प्राणेन...प्रविवेश ह मनः बृह. ६।१।११

यथाऽमुष्मिन्नाकाशे वायुरायत्तः ३ ऐत. १।२।२

यथा मूढो यथा ह्यन्धो यथा बधिर एव वा । तथा वर्तेत लोकस्य स्वसामर्थ्यस्य गुप्तये १ यो. त. ७७

यथाऽमूनि त्रीणि ज्योतींषि, एवमिमानि पुरुषे त्रीणि ज्योतींषि ३ ऐत. १।२।२

यथाऽमृतं विषाद्भिन्नं विषदोषैर्न लिप्यते । न स्पृशामि जडाद्भिन्नो जडदोषाप्रकाशतः आ. प्र. २८

यथा मृदि घटो नाम कनके कुण्डलाभिधा । शुक्तौ हि रजतख्यातिर्जीवशब्दस्तथा परे यो. शि. ४।१४

यथा यथा सदाभ्यासात्सङ्कल्पविलयो भवेत् । योगिनो भवति श्रेयान्कर्मत्यागस्तदातदा अमन. २।१०४

यथा यथा सदाभ्यासान्मनसः स्थिरता भवेत् । वायुवाक्कायदृष्टीनां स्थिरता च तथा तथा अमन. २।६७

यथाऽयमग्निः पृथिव्यां, एवमिदमुपस्थे रेतः ३ ऐत. १।२।२

यथाऽयस्पिण्डे हन्यमाने नाग्निरभिभूयत्येवं नाभिभूयत्यसौ पुरुषः मैत्रा. ३।३

यथा योगी वायुनिरोधनं वक्ता-
चरणगुरुराच्छिनोति किल्बिषम् अद्वैतो. ४

यथा रज्जुं परित्यज्य सर्पं गृह्णाति
वै भ्रमात् । तद्वत्सत्यमविज्ञाय
जगत्पश्यति मूढधीः ना. बिं. २६

यथा रज्जौ निष्क्रियायां सर्पा-
भासविनिर्गमौ । अवृतेः सद्-
सत्त्वाभ्यां वक्तव्ये बन्धमोक्षणे २ आत्मो. २७

यथा रथचक्रस्य खं, तेन स ऊर्ध्व
आक्रमते स आदित्यमागच्छति बृह. ५।१०।१

यथा रविः सर्वरसान्प्रभुङ्क्ते...तथैव
योगी विषयान् भुङ्क्ते १ अवधू. ६

यथा रसाशये फेनं मथनादेव
जायते । मनोनिर्मथनादेव
विकल्पा बहवस्तथा त्रि. ब्रा. २।१४

यथा राज्ञे कुर्वन्नमात्यबुद्धिं देही
बिन्देद्बाधमस्माद्विनष्टम् । सत्या-
दिरूपं शिवमेवंविदानो विष्ण्वादि-
बुद्ध्या हीयतेऽज्ञानसङ्गात् सि. शि. १

यथार्द्रैन्धानाग्नेरभ्याहितस्य
पृथग्धूमा...(मा. पा.) बृ. उ. ४।५।११

(अथ)यथाऽऽर्द्रैधाग्नेरभ्याहितस्य
पृथग्धूमा निश्चरन्त्येवं वा एतस्य
महतो भूतस्य निःश्वसित-
मेतद्यदृग्वेदो..[मैत्रा. ६।३२+ बृह. ४।६।११

यथार्थकथनोमित्युच्चार्याभिमानो-
त्पत्तिप्रणवः तुरीयो. १

यथा लगति कंठात्तु हृदयावधि
सस्वनम् । पूर्ववत्कुम्भयेत्प्राणं
रेचयेदिडया ततः योगकुं. १।२७

यथालब्धोपजीवी स्यान्मुनिर्दान्तो
जितेन्द्रियः (यतिः) ना. प. ५।२६

यथा लम्बरस्य खं, तेन स ऊर्ध्व
आक्रमते स चन्द्रमसमागच्छति बृह. ५।१०।१

यथा लालव्यो गोत्रो ब्राह्मणः २ प्राणवो. १४

यथालाभमश्नीयात् (यतिः) आरुणि. ३

यथालाभमश्नीयात्प्राणसन्धारणार्थं
यथा मेदोवृद्धिर्न जायते
[१ सं. सो. १।२+ कठश्रु. ६

यथावच्छास्त्रवाक्यार्थे मतिमाधाय
निश्चलाम् ।...शिलाशय्या-
समासीनो जरयत्यायुरात्ततम् अक्ष्युप. १५

यथावच्छृणु तान्यपि भ. गी. १८।१९

यथावदखिलं प्रोक्तं जनकेन
महात्मना । तदेव तत्पुरा
प्रोक्तं तस्य पित्रा महाधिया महो. २।३१

यथावदुपचारी कृतकृत्यो
मरुदुत्तरायणं गतः मैत्रा. ६।३०

यथा वन्ध्यासुतो नास्ति यथा
नास्ति मरौ जलम् यो. शि. ४।१८

यथावस्थितज्ञानेन किञ्चिन्नोति
यदस्ति तदस्ति यन्नास्ति
नास्ति तत् स्वसंवे. २

यथा वा अरा नाभौ समर्पिता
एवमस्मिन्प्राणे सर्वं समर्पितम छांदो. ७।१५।१

यथा वा चित्तसामर्थ्यं जायते...
दूरश्रुतिर्दूरदृष्टिः क्षणाद्दूरागमः...
वाक्सिद्धिः कामरूपत्वमदृश्य-
करणी तथा । मलमूत्रप्रलेपेन
लोहादेः स्वर्णता भवेत् १ यो.त. ७३-७४

यथा वातैर्विनिर्मुक्तो निश्चलो
निर्मलः परः । शब्दाद्यैर्विषयै-
स्त्यक्तो लयस्थो दृश्यते तथा अमन. १।२७

यथा वाऽप्सुचारिणः शाकुनिकः
सूत्रयन्त्रेणोद्धृत्योदरेऽग्नौ
जुहोत्येवं वाव खल्विमान्
प्राणानोमित्यनेनोद्धृत्याना-
मयेऽग्नौ जुहोति मैत्रा. ६।२६

यथा वायुः पुष्करिणीं समिङ्गयति
सर्वतः । एवा ते गर्भ एजतु.. बृह. ६।४।२१

यथावायुःपुष्करिणीं समिञ्जति(मा.) बृह. ६।४।२१

यथा वा श्रेष्ठिनं स्वा भुञ्जन्त एवमेवैष
प्राज्ञ आत्मैतैरात्मभिर्भुङ्क्ते कौ. त. ४।२०

यथाविधानं गुरोः कर्मातिशेषेणा-
भिसमावृत्य कुटुम्बे शुचौ
देशे स्वाध्यायमधीयानो,...
ब्रह्मलोकमभिसम्पद्यते छान्दो. ८।१५।१

यथा विन्दति तच्छृणु भ. गी. १८।४५

यथा विपणगा लोका विहरन्तो-
ऽप्यसत्समाः । असम्बन्धास्तथा
ज्ञस्य ग्रामोऽपि विपिनोपमः अ. पू. १।३३
यथा विब्रूयादसौ गौरसावश्वः बृह. ३।४।२
यथा विलीनमेवाङ्गास्यान्तादाचा-
मेति । कथमिति लवणमिति छां. उ. ६।१३।२
यथा वृक्षस्य संपुष्पितस्य दूराद्गन्धो
वात्येवं पुण्यस्य कर्मणो
दूराद्गन्धो वाति महाना. ७।९
यथा वृक्षो वनस्पतिस्तथैव पुरुषो-
ऽमृषा । तस्य लोमानि पर्णानि
त्वगस्योत्पाटिका बहिः बृह. ३।९।२८
यथा वेदो वाऽननूक्तोऽन्यद्वा
कर्माकृतं यदिह वा अप्यनेवं-
विन्महत्पुण्यं करोति बृह. १।४।१५
यथा वेदो वानूक्तोऽन्यद्वा..(मा.पा.) बृह. १।४।१९
यथा वै द्वे वाऽऽमलके द्वे वा कोले
द्वौ वाक्षौ मुष्टिरनुभवत्येवं वाचं
च नाम च मनोऽनुभवति छान्दो. ७।३।१
यथा वै सम्राण्महान्तमध्वानमेष्यन्
रथंवानावंवासमाददीतैवमेवैताभि-
रुपनिषद्भिः समाहितात्मा बृह. ४।२।१
यथा व्रीहिर्वा यवो वा स एष
सर्वस्येशानः सर्वस्याधिपतिः
सर्वमिदं प्रशास्ति बृह. ५।६।१
यथाशास्त्रमनुद्वेगमाचरन्को न
सिद्धिभाक् महो. ५।८८
यथा शिवमयो विष्णुरेवं
विष्णुमयः शिवः स्कन्दो. ९
यथा शुद्धसुवर्णस्यकनककुकुटाङ्ग-
दादिभेदः त्रि. म. ना. ८।१
यथाऽश्मानमाखणमृत्वाविध्व९-
सत एव९ हैव स विध्वंसते छान्दो. १।२।८
(सः) यथाऽश्मानमृत्वा लोष्टो
विध्व९ सेतैव९ हैव विध्व९-
समाना विध्वञ्चो विनेशुः बृह. १।३।७
यथा श्येनः स्वमाभिस्य याति
स्वमालयं कुलायम् , एवं
सुषुप्तं ब्रूत परब्र. १

यथा श्रमो भवेद्देहे तथा सूर्येण
पूरयेत् योगकुं. १।३५
यथा श्रियाभियुक्तोऽहं तथा
भक्तो मम प्रियः गोपालो. २।११
यथा श्रेष्ठैः स्वैर्भुङ्क्ते यथा वा श्रेष्ठिनं
स्वा भुञ्जन्त एवमेवैष प्राज्ञ
आत्मैतैरात्मभिर्भुङ्क्ते कौ. त. ४।२०
यथाऽश्वत्थदलेसूक्ष्मास्थूलाश्च(नाड्यः)त्रि. ब्रा. २।७६
यथाऽश्वत्थादिपत्रं शिराभिर्व्याप्त-
मेवं शरीरं नाडीभिर्व्याप्तम् शांडि. १।४।६
यथाऽश्वलायनो भगवन्तं परमे-
ष्ठिनमुपसमेत्योवाच कैव. १
यथा सकृद्विद्युत्त९ सकृद्विद्युत्तेव
या वा अस्य श्रीर्भवति.. बृह. २।३।६
यथा सङ्कल्पितं लोकं नयति प्रश्नो. ३।१०
यथा सङ्कल्पयेद्योगी...तथा
तत्तदवाप्नोति यो. शि. ५।५९
यथा सतः पुरुषात्केशलोमानि
तथाऽक्षरात्सम्भवतीह विश्वम् मुण्ड. १।१।७
यथा समुद्रसलिलस्य स्थूलसूक्ष्म-
तरङ्गफेनबुद्बुदकरकलवण-
पाषाणाद्यनन्तवस्तुभेदः त्रि. म. ना. ८।१
यथा सम्पन्ना मधुत्वं नाना रसा
इत्येवं ह्याह मैत्रा. ६।२२
यथा सम्राडेवाधिकृतान्विनियुङ्क्ते
एतान्ग्रामानधितिष्ठस्वेत्येवमेवैष
प्राण इतरान्प्राणान्पृथक्पृथगेव
सन्निधत्ते प्रश्नो. ३।४
यथा सर्वगतस्य निराकारस्य महा-
वायोश्च तदात्मकस्य...चाभेद
एव श्रूयते सर्वत्र त्रि. म. ना. २।३
यथा सर्वगतं व्योम तत्र तत्र
लय गतः (ज्ञानी) पैङ्गलो. ४।१३
यथा सर्वगतं सौक्ष्म्यात् भ. गी. १३।३३
यथा संह्रियते सर्वमस्तं गच्छति
भास्करे । कर्मजालं तथा
सर्वममनस्के विलीयते अमन. २।८८
यथाऽसावन्तरिक्षे विद्युदेवमिद-
मात्मनि हृदयम् ३ ऐत. १।२।२

यथा सिद्धरसस्पर्शात्ताम्रं भवति
काञ्चनम् । गुरूपदेशश्रवणा-
च्छिष्यस्तत्त्वमयो भवेत् अमन. २।४६
यथाऽसिधारां कर्तेऽव हितामवक्रामे-
यद्युवेयुवेह वा विह्वयिष्यामि
...एवमनृतात्मानं जुगुप्सेत् महाना. ७।९
यथा सिंहो गजो व्याघ्रो भवेद्वश्यः
शनैः शनैः । तथैव सेवितो
वायुरन्यथा हन्ति साधकम्
[यो. चू. ११८+ शाण्डि. १।७।६
यथा सिंहो मृगो वाऽपि नीयमानो
व्यवस्थितः...परिचीयमानस्य
तथा वायुर्वै विश्वतोमुखः योगो. ११
यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः
सहस्रशः प्रभवन्ते सरूपाः ।
तथाऽक्षराद्विविधाः सोम्य
भावाः प्रजायन्ते मुण्ड. २।१।१
यथा सुनिपुणः सम्यक्परदोषेक्षणे
रतः । तथा चेन्निपुणः स्वेषु
को न मुच्येत बन्धनात् वराहो. ३।२५
यथा सुप्तोत्थितः कश्चिद्विषयान्
प्रतिपद्यते । जागर्त्येव ततो
योगी योगनिद्राक्षये तथा अमन. २।६२
यथा सुहयः पड्वीशशंकून्सङ्खिदे-
देवमितरान्प्राणान्समखिदत् छां. उ. ५।१।१२
यथा सोमꣳराजानमाप्यायस्वा-
पक्षीयस्वेत्येवमेनाꣳस्तत्र
भक्षयन्ति बृह. ६।२।१६
यथा सोम्य पुरुषं गान्धारेभ्योऽभि-
नद्धाक्षमानीय तं ततोऽतिजने
विसृजेत् छांदो. ६।१४।१
यथा सोम्य मधु मधुकृतो
निस्तिष्ठन्ति नानात्ययानां
वृक्षाणाꣳरसान्समवहारमे-
कताꣳरसं गमयन्ति छांदो. ६।९।१
यथा सोम्य महतोऽभ्याहितस्यैक-
मङ्गारं खद्योतमात्रं परिशिष्टं
तं तृणैरुपसमाधाय प्राज्वल-
येत्तेन ततोऽपि बहु दहेत् छांदो. ६।७।५
यथा सोम्यैकेन नखनिकृन्तनेन
सर्वं कार्ष्णायसं विज्ञातꣳ
स्याद्वाचारम्भणं...
कृष्णायसमित्येव सत्यम् छांदो. ६।१।६
यथा सोम्यैकेन लोहमणिना सर्वं
लोहमयं विज्ञातꣳस्याद्वाचा-
रम्भणं...लोहमित्येव सत्यम् छांदो. ६।१।५
यथा सोम्यैकेन मृत्पिण्डेन सर्वं
मृन्मयं विज्ञातꣳस्याद्वाचा-
रम्भणं विकारो नामधेयं
मृत्तिकेत्येव सत्यम् छांदो. ६।१।४
यथा सौक्ष्म्याच्चिदाभास्य आका-
शो नोपलक्ष्यते । तथा निरंश-
श्चिद्भावः सर्वगोऽपि न लक्ष्यते महो. ५।९९
यथाऽसौ दिव्यादिव्यादित्य एव-
मिदं शिरसि चक्षुः ३ ऐतरे. १।२।२
यथाऽसौ द्यावापृथिव्यावन्तरेणा-
काशः, तस्मिन्ह्यास्मिन्नाकाशे
प्राण आयत्तः ३ ऐत. १।२।२
यथा सौम्य महतोऽभ्याहितस्यैको-
ऽङ्गारखद्योतमात्रः परिशिष्टः
स्यात्तेन ततोऽपि न बहु दहेत् छांदो. ६।७।३
यथा स्तेनो यथा भ्रूणहैवमेष भवति सहवै. १२
यथा स्त्रीपुमाꣳसौ सम्परिष्वक्तौ स
इममेवात्मानं द्वेधाऽपातयत्ततः
पतिश्च पत्नी चाभवतां बृह. १।४।३
यथा स्थितमिदं यस्य व्यवहारवतो-
ऽपि च । अस्तं गतं स्थितं व्योम
स जीवन्मुक्त उच्यते वराहो. ४।२१
यथाऽस्या उदरमेवममुष्या अम्भणं ३ ऐत. २।५।२
यथाऽस्यास्तन्त्रय एवममुष्या अङ्गुलयः ३ ऐत. २।५।२
यथाऽस्याःशिर एवममुष्याः शिरः ३ ऐत. २।५।२
यथाऽस्याः स्पर्शा एवममुष्याः स्पर्शाः ३ ऐत. २।५।२
यथाऽस्याः स्वरा एवममुष्याः स्वराः ३ ऐत. २।५।२
यथाऽस्यै जिह्वैवममुष्यै वादनं ३ ऐत. २।५।२
यथा स्वच्छन्दतः प्राणो निपत-
त्याशु गच्छतः ।...परिचीय-
मानस्य तथा वायुर्वै विश्वतोमुखः योगो. ११

यथा स्वप्नमयो जीवः...तथा जीवा अमी सर्वे अ. शां. ६८
यथा स्वप्ने तथा पितृलोके कठो. ६।५
यथा स्वप्ने द्वयाभासं चित्तं चलति मायया। तथा जाग्रद्वयाभासं चित्तं चलति मायया अ. शां. ६१
यथा स्वप्ने द्वयाभासं स्पन्दते मायया मनः। तथा जाग्रद्वयाभासं स्पन्दते मायया मनः अद्वैत.२९
यथाऽहनि तथा रात्रौ। नास्य नक्तं न (वा) दिवा [१सं.सो.१।३+ कठश्रु. १०
यथाऽहमन्धो न स्यां तथा कल्पय कल्पय, कल्याणं कुरु कुरु चाक्षुषो. २
यथाऽहमेषां नैकश्चन वेद छांदो. ५।३।५
यथा ह वै बहवः पशवो मनुष्यं भुञ्ज्युरेवमेवैकः पुरुषो देवान् भुनक्ति बृह. १।४।१०
यथा ह वै पदेनानुविन्देदेवं कीर्तिं श्लोकं विन्दते बृह. १।४।७
यथा हि वै सरसि पद्मं तिष्ठति तथा भूम्यां तिष्ठति गोपालो. १६
यथा ह्यग्निः काष्ठेषु, तिलेषु तैलमिव तं विदित्वा मृत्युमत्येति हंसो. ४
यथा ह्येवेयं शब्दवती तर्घवत्येवमसौ शब्दवती तर्घवती ३ ऐत. २।५।२
यथा ह्येवेयं लोमशेन चर्मणा पिहिता भवत्येवमसौ लोमशेन चर्मणा पिहिता ३ ऐत. २।५।२
यथा ह्येवेह प्रजा अन्वाविशन्ति... तं तमेवोपजीवन्ति छांदो. ८।१।५
यथेक्षुरससंव्याप्ता शर्करा वर्तते तथा। अद्वयब्रह्मरूपेण व्याप्तोऽहं वै जगत्त्रयम् आ. प्र. १४
यथेच्छया वसेद्विद्वानात्मारामः सदा मुनिः कुण्डिको. २८
यथेच्छसि तथा कुरु भ. गी. १८।६३
यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति छांदो. ५।१०।५
यथेतमेत्य जघनेनाग्निमासीनो वंशं जपति बृह. ६।३।६
यथेन्द्रगोपो यथाऽग्न्यर्चिर्यथा पुण्डरीकं...वा अस्य श्रीर्भवति बृह. २।३।६
यथेमे दंशमशकादयस्तृणवन्नश्यतयोद्भूतप्रध्वंसिनः मैत्रा. १।५
यथेयंनप्राक्त्वत्तःपुराविद्या ब्राह्मणान्गच्छति तस्मादु सर्वेषु लोकेषु क्षत्रियस्यैव प्रशासनमभूत् छांदो. ५।३।७
यथेयं न प्राक् त्वत्तु पुरा विद्या ब्राह्मणान्...(मा. पा.) छां. उ. ५।३।७
यथेयं विद्येतः पूर्वं न कस्मिंश्चन ब्राह्मण उवास त्वां त्वहं तुभ्यं वक्ष्यामि बृह. ६।२।८
यथेरिणे बीजमुप्तं नरेन्द्र नास्य वप्ता लभते बीजभागम्। एवं श्राद्धमप्रतिष्ठितं विनश्यति इतिहा. २९
यथेष्टधारणा-(णं वा) द्वायो रनलस्य प्रदीपनम्। नादाभिव्यक्तिरारोग्यं जायते नाडिशोधनात् [यो. चू. ९९+ शाण्डि. १।७।८
यथेष्टधारणाद्वायोः सिद्ध्येत्केवलकुम्भकः। केवले कुम्भके सिद्धे रेचपूरविवर्जिते। न तस्य दुर्लभं किञ्चित्त्रिषु लोकेषु विद्यते १ यो. त. ५०
यथेष्टमेव वर्तेत यद्वा योगी महेश्वरः। अभ्यासभेदतो भेदः फलं तु सममेव हि १ यो. त. १११
यथेह क्षुधिता बाला मातरं पर्युपासते। एवं सर्वाणि भूतान्यग्निहोत्रमुपासते छांदो. ५।२४।५
यथैकस्मिन्घटाकाशे रजोधूमादिभिर्युते। न सर्वे संप्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः अद्वैतो. ५
यथैतत्कूबरस्तक्ष्णापोज्झितो नेङ्गते मनाक्। परित्यक्तोपमात्मानस्तद्वद्देहो विरोचते छाग. ६.४
यथैतं काष्ठभारमानडुमनुपश्यामस्तथैवावशो भूस्थः स्पन्दते छाग. ६।१

यथैतावेदस्याष्टावुपनिषदोभवन्ति ...
यथैधांसि समिद्धोऽग्निः भ. गी. ४।३७
यथैवमवमन्यन्ते जनाः...तथा युक्तश्चरेद्योगी ना. प. ६।१०
यथैव खल्वयं भगवोऽस्मिञ्छरीरे साध्वलङ्कृते साध्वलंकृतो भवति...एवमेवायमस्मिन्नन्धेऽन्धो भवति छांदो. ८।९।१
यथैव तु महासिंहः कुञ्जरो वाऽथदुर्मदः...परिचीयमानः कालेन वशत्वं चैव गच्छति । परिचीयमानयोगस्य वशत्वं याति मारुतः योगो. ८
यथैव तु समोपसन्ना अथानसूयवो यथोपप्रश्निन इति छाग. ३।५
यथैव तेन न गुरुर्भोजनीयस्तथैव चान्नं न भुनक्ति श्रुतं तत् शाट्याय. ३५
यथैव द्विविधा रज्जुर्ज्ञानिनोऽज्ञानिनोऽनिशम् । यथैव मृन्मयः कुम्भस्तद्वद्देहोऽपि चिन्मयः यो. शि. ४।२१
यथैव निश्चितः कालः सूर्यचन्द्रनिबन्धनात् । आपूर्य कुम्भितो वायुर्वह्निर्नो याति साधके यो. शि. १।१२८
यथैव बिम्बं मृदयोपलिप्तं तेजोमयं भ्राजते तत्सुधातम् । तद्वात्मतत्त्वं प्रसमीक्ष्य देही एकः कृतार्थो भवते वीतशोकः श्वेता. २।१४
यथैव लोहकाराणां भस्त्रा वेगेन चाल्यते । तथैव स्वशरीरस्थं चालयेत्पवनं शनैः योगकुं. १।३४
यथैव वटबीजस्थः प्राकृतश्च महाद्रुमः । तथैव रामबीजस्थं जगदेतच्चराचरम् [रामर.५।१०+ रा.पू.ता.२।२
यथैव व्योम्नि नीलत्वं यथा नीरं मरुस्थले । पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि यो. शि. ४।१९
यथैव शून्यो वेतालो गन्धर्वाणां पुरं यथा । यथाऽऽकाशे द्विचन्द्रत्वं तद्वत्सत्ये जगत्स्थितिः यो. शि. ४।१६

यथैवेदं नभः शून्यं जगच्छून्यं तथैव हि वा. र. ४।२०
यथैवापाङ्कतः सेतुः प्रवाहस्य निरोधकः । तथा शरीरगा छाया ज्ञातव्या योगिभिः सदा वराहो. ५।४१
यथैवासावितश्चेतोऽमुतश्चामुतश्च सम्प्रद्रवत इवोपशुष्यत इवोपस्कन्दमभिगृह्णीताभियातयेदेव छाग. ५।२
यथैवासौ प्रतिसृत्वरेण समः समेन क्रीडेदेवं हैष संक्रीडतीति छाग. ५।३
यथैवासौ राजानं वा राजपुरुषं वा निलयनं प्रापयेदेवं हैवैष यन्ता (रं) निलयनं प्रापयतीति छाग. ५।३
यथैवेदमावां भगवः साध्वलङ्कृतौ सुवसनौ परिष्कृतौ स्व एवमेवेमौ भगवः साध्वलंकृतौ सुवसनौ परिष्कृतौ च छांदो. ८।८।३
यथैवेदं नभः शून्यं जगच्छून्यं तथैव हि महो. ५।१८४
यथैवेशस्तथा गुरुः । पूजनीयो महाभक्त्या यो. शि. ५।५८
यथैवेह बीजस्याङ्कुरा वाऽथ धूमार्चिर्विस्फुलिङ्गा इवाग्नेश्चेत्यत्रोदाहरन्ति मैत्रा. ६।३१
यथैवैष कपालाष्टकं सन्नयति तमेव स्तन इव लम्बते वेददेवयोनिः ब्रह्मो. १
यथैवैष देवदत्तो यष्ट्याऽपि ताड्यमानो नयतीत्येवमिष्टापूर्तैः शुभाशुभैर्न लिप्यते ब्रह्मो. १
यथैवैषा वन्ध्यैवैषा रतिमात्रं फलमस्या वृत्तच्युतस्येव मैत्रा. ७।९
यथैवोत्पलनालेन तोयमाकर्षयेन्नरः। तथैवोत्कर्षयेद्वायुं योगी योगपथे स्थितः ध्या. बिं. ३८
यथैवोपकरणवतां जीवितं तथैव ते जीवितꣳस्यात् [बृह.२।४।२ +४।५।३
यथैवोपसृत्वरो वार्धिस्तिर्यगुल्लन्तीभिरिव वीचीभिः शफरीभि-

रेखोपस्कन्दमुत्प्लवेदेवं हैवैषोऽभि-
मृत्वराणामेव धुर्याणां चंक्रम-
णामरीणामुत्प्लवतीति छांग. ५।३
यथैवैष देवदत्तो यष्ट्या च ताड्य-
मानो नयति, एवमिष्टापूर्तकर्मा
शुभाशुभैर्न लिप्यते परब्र. १
यथैषा जन्मदुःखेषु न भूयस्त्वां
नियोक्ष्यति । स्वात्मनि स्व-
परिस्पन्दैः स्फुरत्यच्छैश्चिदर्णवः महो. ५।११७
यथैषा देवतैव५ स यथैतां देवता५
सर्वाणि भूतान्यवन्त्येव५ हैवं-
विद५ सर्वाणि भूतान्यवन्ति बृ. उ. १।५।२०
यथैषा पुरुषे छायैतस्मिन्नेतदाततं
मनोधिकृते नायात्यस्मिञ्छरीरे प्रश्नो. ३।३
यथैषा वन्ध्यैवैषा रतिमात्रं फल-
मस्या वृत्तच्युतस्येव नारम्भ-
णीया मैत्रा. ७।९
यथोक्तं पर्युपासते भ. गी. १२।२०
यथोदकं गिरौ सृष्टं समुद्रेषु विधा-
वति । एवं धर्मान्पृथक्पश्यंस्ता-
मेवानुविधावति गुह्यका. ४३
यथोदकं दुर्गे वृष्टं पर्वतेषु विधा-
वति । एवं धर्मान्पृथक्पश्यं-
स्तानेवानुविधावति कठो. ४।१४
यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव
भवति । एवं मुनेर्विजानत
आत्मा भवति गौतम कठो. ४।१५
यथोदके तोयमनुप्रविष्टं तथा-
त्मरूपो निरुपाधिसंस्थितः पैङ्गलो. ४।११
यथोन्मेषो जायते तथा चिरंतना-
तिसूक्ष्मवासनाबलात् पुनर-
विद्याया उदयो भवति त्रि. म. ना.४।६
यथोपपन्नचातुर्वर्ण्यभैक्षाचर्यं
चरन्त आत्मानं मोक्षयन्त इति आश्रमो. ४
यथोपयातमात्मैवाभिचक्षत इति आर्षे. ५।३
(अथ) यथोर्णनाभिस्तन्तुनोर्ध्व-
मुत्क्रान्तोऽवकाशं लभतीत्येवं
वाव खल्वसावभिध्यातोमित्यने-
नोर्ध्वमुत्क्रान्तः स्वातंत्र्यं लभते मैत्रा. ६।२२
यथोर्णनाभिः सूत्राणि सृजत्यपि
गिलत्यपि...उत्पद्यन्ते विलीयन्ते
तथा तस्यां जगत्यपि गुह्यका. २६
यथोर्णनाभिः सृजते गृह्णते च
यथा पृथिव्यामोषधयः सम्भ-
वन्ति । यथा सतः पुरुषात्केश-
लोमानि तथाऽक्षरात्सम्भवतीह
विश्वम् मुंड. १।१।७
यथोल्बेनाऽऽवृतो गर्भः भ. गी. ३।३८
यदक्षरं नारसिंहमेकाक्षरं तद्भवति नृ. पू. ५।७
यदक्षरं पञ्चविधं समेति युजो
युक्ता अभियत्संवहन्ति १ ऐत. ३।८।१
यदक्षरंपरंब्रह्म तत्सूत्रमितिधारयेत् ब्रह्मो. ६
[परब्र. ७+ ना. प. ३।७८
यदक्षरं प्राजापत्यं सौम्यं सूक्ष्मं
ग्राहं ग्राहेण भावं भावेन सौम्यं
सौम्येन सूक्ष्मं सूक्ष्मेण ग्रसति
तस्मै महाग्रासाय नमः चतुर्वे. ८
यदक्षरं वेदविदो वदन्ति भ. गी. ८।११
यदक्षरादक्षरमेति युक्तं युजो युक्ता
अभियत्संवहन्ति १ ऐत. ३।८।२
यदग्निर्ज्वलत्यथैतन्म्रियते यन्न
ज्वलति तस्यादित्यमेव तेजो
गच्छति कौ. त. २।१२
यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं
पस्पर्शुस्ते ह्येनत्प्रथमो विदां-
चकार ब्रह्मेति केनो. ४।२
यदग्निं न विन्देदप्सु जुहुयादापो
वै सर्वा देवताः सर्वाभ्यो
देवताभ्यो जुहोमि स्वाहा ना. प. ३।७७
यदग्नेरभिवर्तनानि [छाग.२।२+ ४।२
यदग्नौ जुहोत्यपि समिधं तदेत-
यज्ञः सन्तिष्ठते सद्वै. १४
यदग्ने चानुबन्धे च भ. गी. १८।१९
यदग्ने वेदशास्त्राणि तुलसीं तां
नमाम्यहम् तुलस्यु. ९

यदज्ञानाज्जगद्वैतमितरत्तत्प्रणश्यति यो. शि. ४।९
(अथ) यदतः परो दिवा ज्योति-
र्दीप्यते विश्वतः पृष्ठेषु.. छांदो. ३।१३।७
यदत्र षष्ठं त्रिशतं सुवीरं यज्ञस्य
गुह्यं नवनावमाय्यम् । दश-
पञ्च त्रिशतं यत्परं च तन्मे
मनः शिवसङ्कल्पमस्तु २ शिवसं. ७
यदत्रैनो अवतत्सुवामि सहवै. ९
यदथर्वाङ्गिरसो मधोः कूल्या य-
द्ब्राह्मणानितिहासान्पुराणानि
कल्पान्गाथानाराशंसीर्मेदसः
कूल्याअस्यपितॄन्त्स्वधाअभिवहंति सहवै. १४
यदथर्वाङ्गिरसो मध्वाहुतिभिः...
तद्देवांस्तर्पयति, त एनं तृप्ता
आयुषा...ब्रह्मवर्चसान्नाद्येन
च तर्पयन्ति सहवै. १४
यददीव्यं नृणामहं बभूवादित्सन्वा-
संजगरजनेभ्यः । अग्निर्मा तस्मा-
दिन्द्रश्च संविदानौ प्रमुंचताम् सहवै. ५
(अथ) यदनाकाशायनमित्या-
चक्षते ब्रह्मचर्यमेव तत् छांदो. ८।५।३
यदनादि निरामयम् (ब्रह्म) महो. २।६८
यदनादिभूतं यदनन्तरूपं यद्वि-
ज्ञानरूपं यद्देवाः सर्वे ब्रह्म
ज्येष्ठमुपासते गणेशो. ४।१
यदनु कुरुक्षेत्रं देवानां देवयजनं
सर्वेषां भूतानां ब्रह्मसदनम्
[रामो. १।१+तारसा.१।१+ जाबालो. १
यदनुक्तनिष्पन्दंदीपकंतेजसानपि अ. पू. ३।२२
यदनुज्ञा समर्धयिता ह वै कामानां
भवति य एतदेवं विद्वानक्षर-
मुद्गीथमुपास्ते छांदो. १।१।८
(अथ) यदनुब्रूते तेन ऋषीणां
(लोकप्राप्तिः) बृह. १।४।१६
यदनुष्ठुभैव वा एष उपवसभेष हि
सर्वत्रसर्वदासर्वात्मासन्सर्वमत्ति नृसिंहो. ४।२
यदनेकमेकं नानावर्णं नानारूपं
नानाशब्दं... शौनको. १।५

यदन्वरा पितरं मातरं चेति नाहमत
एकं च न वेद बृह. ६।२।२
यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं
पितरंवाजिहिंसिम [सहवै.१० अथर्व. ६।१२०।१
[+तै. सं. १।८।५।३+ तै. आ. २।६।२
यदन्तरिक्षं यदाशसाऽतिक्रामामि सहवै. ४
यदन्तर्नोऽसाविह प्राहैयात् छाग. ३।५
यदन्तः पूर्णमवगत्य पूर्णः गुह्यका. ४६
यदन्ति यच्च दूरके [३ऐत.२।४।४+ वनदु. १२९
[ऋ. मं. ९।६७।२१
यदन्नमग्निर्बहुधा विराद्धि रुद्रैः
प्रजग्धं यदि वा पिशाचैः ।
सर्वं तदीशानो अभयं कृणोतु प्रा. हो. १।६
यदन्नमद्मि बहुधा विरूपं वासो
हिरण्यमुत गामजामविम् सहवै. १०
यदन्नमद्म्यनृतेन देवा दास्यन्न दा-
स्यन्नुत वा करिष्यन् सहवै. १०
यदन्नेनातिरोहति [चित्यु.१२।१+ पु. सू. २
[+ऋ.मं.१०।९०।२+ वा. सं. ३१।२
यदन्यद्देवेभ्यश्च प्राणेभ्यश्च तत्सत् कौ. त. १।६
यदपां क्रूरं यदमेध्यं यदशान्तं
तदपगच्छतात् महाना. ५।१८
यदपि बहुधाक्षीरन्न किञ्च प्रति-
पद्यत इति तन्मे ब्रह्मेति आर्षे. ७।१
यदपूर्वं यक्षमन्तः प्रजानां तन्मे
मनः शिव.. [१ शिवसं. २+ २ शिव. सं. ३
यदभावनमास्थाय यदभावस्थ
भावनम् । तद्यथा वस्तुदर्शित्वं
तदचित्तत्वमुच्यते अ. पू. ४।५०
यदमीषामदःप्रियम्,तदैतूपमामभि.. चित्यु. १५।२
यदमुत्र तदन्विह कठो. ४।१०
यदमुष्मिन्नादित्ये तपत्यग्नौ वा-
धूमके...यःपचत्यन्नमित्येवंह्याह मैत्रा. ६।१७
यदमुष्मिन्नादित्येऽथ सोमेऽग्नौ
विद्युति विभात्यथ खल्वेनं
दृष्ट्वाऽमृतत्वं गच्छति मैत्रा. ६।२४
यदमूर्तं तत्सत्यं तद्ब्रह्म मैत्रा. ६।३
यदयमात्माऽनेन ह्येतत्सर्वं वेद बृह. १।४।७

यदयमात्मामायामात्रएषएवोम्.. नृसिंहो. ५।१
यदयमेक इवैव पवते बृह. ३।९।९
यदयं शवशयितमशयिष्टेति छाग. ४।२
(अथ) यदरण्यायनमित्याचक्षते
ब्रह्मचर्यमेव तत् छांदो. ८।५।३
यदर्चिमद्यदणुभ्योऽणु च यस्मिं९-
ल्लोका निहिता लोकिनश्च मुण्ड. २।२।२
यदर्थप्रतिभानंतन्मनइत्यभिधीयते महो. ४।५१
यदर्पयेद्गुरुः किञ्चित्तत्रत्रः पुरतः
स्थितः । पाणिद्वयेन गृह्णीयात्
स्थापयेत्तत्र सुस्थिरम् शिवो. ७।११
यदर्वाचीनमेनो भ्रूणहत्यायास्त-
स्मान्मोक्ष्यध्व इति त एतैरजुहवुः सहवै. ११
यदरूपं तन्मर्त्य९ स भगवः
कस्मिन्प्रतिष्ठित इति छांदो. ७।२४।१
यदवश्यं पराधीनैस्त्यजनीयं शरी-
रकम् । कस्मात्तेन विमूढात्मा
न साधयति शाश्वतम् शिवो. ७।१२१
यदवस्फूर्जति सोनु वषट्कारो
वायुरात्मा सहवै. १८
(अथ) यदवोचं भुवः प्रपद्य
इत्यग्निं प्रपद्ये वायुं प्रपद्य
आदित्यं प्रपद्य इति छांदो. ३।१५।६
(अथ) यदवोचं भूः प्रपद्य इति
पृथिवीं प्रपद्येऽन्तरिक्षं प्रपद्ये
दिवं प्रपद्य इति छांदो. ३।१५।५
(अथ) यदवोच९ स्वः प्रपद्य
इत्यृग्वेदं प्रपद्ये यजुर्वेदं प्रपद्ये
सामवेदं प्रपद्य इति छांदो. ३।१५।७
यदभाति तद्धविः [त्रि. प. ४+ महाना. १८।१०
(अथ) यदभाति यत्पिबति य-
द्रमते तदुपसदैवेति छांदो. ३।१७।२
यदभीयाद्रेतोभक्षी भवेत् भस्मजा. २।१०
यदश्रुमापातयेत्प्रजां विच्छिन्द्यात् कठरु. २
यदश्वत्तन्मेध्यमभूदिति तदेवाश्व-
मेधस्याश्वमेधत्वम् बृह. १।२।७
यदष्टाक्षरपदा तेन गायत्री अव्यक्तो. ६
यदसक्तं समं स्वच्छं स्थितं तत्तुर्य-
मुच्यते अ. पू. ५।१०७

यदसाधु तदसामेति छांदो. २।१।१
यदसाधु भवत्यसाधु बतेत्येव तदाहुः छांदो. २।१।३
यदसुरान्तकचक्रं यत्सत्यात्मा
तत् षष्ठस्य नृ. षट्च. ६
यदस्ति तदस्ति यन्नास्ति नास्ति तत् स्वसंवे. २
यदस्ति सन्मात्रं यद्विभाति
चिन्मात्रं. . .तदेतत्सर्वाकारा
महात्रिपुरसुन्दरी बह्वृचो. २
यदस्तीह तदेवास्ति विज्वरो भव
सर्वदा । यथाप्राप्तानुभवतः
सर्वत्रानभिवाञ्छनात् महो. ६।१४
यदस्मान्नमस्कारेण मुच्येध्वं न वै
जातु युष्माकमिमं कश्चिद्ब्रह्मो-
द्यं जेतेति बृह. ३।८।१२
यदस्मिन्निद९सर्वमध्यर्ध्नोत्तेनाध्यर्ध
इति कतम एको देव इति बृह. ३।९।९
यदस्य गृहेषु श्वापदा वयाँस्या-
पिपीलिकाभ्य उपजीवन्ति
तेन तेषां लोकः बृह. १।४।१६
यदस्य त्वं यदस्य च देवेष्वथ नु
मीमांस्यमेव ते मन्ये विदितम् केनो. २।१
राजत्वात्सर्वयोगानां राजयोग
इति स्मृतः अमन. २।३
राजधानीं कुम्भीपाकमिव शवपिण्ड-
वदेकत्रान्नं न देवतार्चनम् ।
प्रपञ्चवृत्तिं परित्यज्य जीव-
न्मुक्तो भवेत् १सं.सो. २।७९
राजधानीं कुम्भीपाकमिव शव-
पिण्डवदेकत्रान्नं न देहान्तर-
दर्शनं प्रपञ्चवृत्तिं परित्यज्य
स्वदेशमुत्सृज्य...ज्ञातचरदेशं
विहाय दूरतो वसेत् ना. प. ७।१
राजन्तं दीप्यमानं तं परमात्मान-
मव्ययम् । देहिनां प्रापयेद्यस्तु
राजयोगः स उच्यते अमन. २।४
राजन् संस्मृत्य संस्मृत्य भ. गी. १८।७६
राजयोगस्य माहात्म्यं कोवा जानाति
तत्त्वतः । ज्ञानात्सिद्धिर्मुक्तिरिति
गुरोर्ज्ञानं च लभ्यते अमन. २।५
राजवार्तादि तेषां स्याद्भिक्षावार्ता
परस्परम् ना. प. ३।५८
राजविद्या राजगुह्यं भ. गी. ९।२
राजसमायात्मको ब्रह्मा पा.ब्र.२
राजसं चलमध्रुवम् भ.गी. १७।१८
राजसः परिकीर्तितः भ. गी. १८।२७
राजसा तामसाश्च ये भ. गी. ७।१२
राजसी क्रियाशक्तिः गणेशो. ४।३
राजसूये क्षत्र एव तद्यशो दधाति
सैषा क्षत्रस्य योनिर्यद्ब्रह्म बृह. १।४।११
राजसो ब्रह्मा सात्विको विष्णु-
स्तामसोरुद्रइतिएतेत्रयोगुणयुक्ताः यो. चू. ७२
राजसो ब्रह्मा सात्त्विको विष्णु-
स्तामसो वै हरः गणेशो. ४।६
राजस्याः पञ्च ज्ञानेन्द्रियाणि पञ्च
कर्मेन्द्रियाणि, पञ्चवायवश्चाजायन्त गणेशो. ४।४
राजा त एकं मुखं, तेन मुखेन विशो-
ऽत्सि, तेनैव मुखेन मामन्नादं कुरु कौ. त. २।९
राजा त्वा वरुणो नयतु देवि दक्षिणे
वैश्वानराय रथम् चित्त्यु. १०।४
राजा वचनमब्रवीत् भ. गी. १।२
राजा वरुणो नयतु देवि दक्षिणे-
ऽग्नये हिरण्यम् चित्त्यु. १०।१
राजाऽसौ यक्ष्यते स मा सर्वै-
रार्त्विज्यैर्वृणीतेति छांदो. १।१०।६
राजोवाच–पञ्चेमानि रत्नानि
गौर्मेऽजस्रं दुह्यति, रविर्मेऽजस्रं
विलुहति, त्विषिर्मेऽजस्रं पिनष्टि इतिहा. ८५
राज्यं भोगाः सुखानि च भ. गी. १।३३
राज्यं सुराणामपि चाधिपत्यं भ. गी. २।८
राज्ञः सोमस्य तृप्तासः अरुणो. १
राज्ञां राज्यलक्ष्मीर्भवति ना. पू.ता.२।१

राज्ञीनाम प्रतीची, सुभूतानामोदीची छांदो.३।१५।२
रातिर्दातुः परायणं तिष्ठमानस्य तद्विदः बृह. ३।९।२८
रात्रिं युगसहस्रान्तां भ. गी. ८।१७
रात्रेरपक्षीयमाणपक्षमपक्षीयमाण-
पक्षाद्यान्षण्मासान्दक्षिणादित्य
एति मासेभ्यः पितृलोकं पितृलोका-
चन्द्रं ते चन्द्रं प्राप्यान्नं भवन्ति बृह. ६।२।१६
रात्रेरपरपक्षमपरपक्षाद्यान्षड्दक्षिणैति
मासा॰स्तान्नैते संवत्सरमभि-
प्राप्नुवन्ति छांदो.५।१०।३
राज्यागमे प्रलीयन्ते भ. गी. ८।१८
राज्यागमेऽवशः पार्थ भ. गी.८।१९
राधाकृष्णप्रियो भवति (भक्तः) राधिको. ९
राधाकृष्णयोरेकमासनम्.. एकं मनः,
एकं ज्ञानम् , एक आत्मा.. राधो. २।१
राधा कृष्णेनाराधिता, राधा कृष्ण-
माराधयत् राधिको. ४
राधा रासेश्वरी रम्या कृष्णमन्त्रा-
धिदेवता राधिको. ६
राम एव परं ब्रह्म राम एव परं
तपः । राम एव परं तत्त्वं
श्रीरामो ब्रह्म तारकम् रामर. १।६
रामचन्द्रश्चिदात्मकः रामो. २।४
रामस्त्वंपरमात्माऽसिसच्चिदानन्दविग्रहः मुक्तिको. १।४
रामनाम भुवि ख्यातमभिरामेण
वा पुनः । राक्षसान्मर्त्यरूपेण
राहुर्मनसिजं यथा रा. पू.ता. १।३
रामभद्र महेष्वास रघुवीर नृपोत्तम ।
भो दशास्यान्तकास्माकं
(श्रियं दापयदेहि मे) रक्षां
(कुरु) देहि श्रियं च मे रामर. २।८१
[रा. पू. ४।१५+ त्रि.म.ना.७।१०
राममन्त्रं यो जपेत् स रामो भवति रामर. १।७
रामं त्रिनेत्रं सोमार्धधारिणं
शूलिनं परम् । भस्मोद्धूलित-
सर्वाङ्गं कपर्दिनमुपास्महे रामर. २।३२
रामः शस्त्रभृतामहम् भ.गी. १०।३१
रामाभिरामां सौन्दर्यसीमां
सोमावतंसिकाम् । पाशाङ्कुश-
धनुर्बाणधरां ध्यायेत्त्रिलोचनाम् रामर. २।३३
रामोऽहमनिरुद्धोऽहमात्मानं
चार्चयेद्बुधः गोपालो. २।९
रायस्पोषस्य दाता चेति प्रथमः
पादो भवति, ऋग्वै प्रथमः
पादः, निधिदातान्नदो मत
इति द्वितीयः पादः, यजुर्वै
द्वितीयः पादः ग.पू.ता. १।१३
रायस्पोषाय सुप्रजास्त्वाय
सुवीर्यायारण्याः पशवो विश्व-
रूपाः । विरूपाः सन्तु बहु-
धैकरूपाः [चित्यु. ११।१२,१३
रायामीशो रहितो भरन्त्यै रां रां
वहन्त्याहितः रायां पतिं रां रां
धरते धरित्र्यै रां वहतोद्वहाय
स्वाहा पारमा. १।५
रायां पतत्रे रयिमादधात्रे रायो
बृहन्तं रयिमत्सुपुण्यं, रारा-
जिमन्तं रतये रमन्तं तं
त्रिम्बवन्तं ककुदाय भद्रे स्वाहा पारमा. ७।१०
रिच्यत इव वा एष प्रेवरिच्यते
यो याजयति प्रति वा गृह्णाति सहवै. २०
रिपुणा हन्यते रिपुः महो. ५।१११
रिपौ बद्धे स्वदेहे च समैकात्म्यं
प्रपश्यतः । विवेकिनः कुतः
कोपः स्वदेहावयवेष्विव याज्ञव. २२
रुक्माम्बरनिभाकाशं रक्तवर्णं
चतुर्भुजम् (गणेशं) ग. पू. २।५
रुचिरं रेचकं चैव वायोराकर्षणं
तथा । प्राणायामास्त्रयः प्रोक्ता
रेचपूरककुम्भकाः अ. ना. १०
रुजां हरस्त्वं भिषक् पापहीनो
ह्यपाणिपादो निर्विकारस्त्वमात्मा २ रुद्रो. ६२
रुद्र एवाग्निरिति संघट्टनाधीशो भवेत् पारायणो. १
रुद्रग्रन्थिं ततो भित्त्वा ततो याति
शिवात्मकम् यो.शि.१।११५

रुद्रजापकशतमेकमेकेनाथर्वशिर-
शिखाध्यापकेन तत्समं ताप-
नीयोपनिषदध्यापकशतं नृ. पू. ५।१६
रुद्रपीठं च वर्यं च वज्रदण्डोन्नतं तथा।
इत्येवदासनं प्रोक्तं नानारूपगुणा-
न्वितम् दुर्वासो. २।३
रुद्रमेकत्वमाहुः शाश्वतं वै पुराणं अ. शिरः. ३।९
रुद्रमेवाप्येति यो रुद्रमेवास्तमेति.. सुबा.लो. ९।१२
रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि
नित्यम् श्वेताश्व. ४।२१
रुद्ररूपे महायोगी संहरत्येव तेजसा।
नारायणे मनो युञ्जन्नारायण-
मयो भवेत् यो.शि. ५।५४
रुद्रस्य दक्षिणे पार्श्वे रविर्ब्रह्मा
त्रयोऽग्नयः रुद्रहृ.४
रुद्रस्य नयनादुत्पन्ना रुद्राक्षा इति
लोके ख्यायन्ते रु. जा. ४४
रुद्रं लोहितेन चिस्यु. २१।१
रुद्रः पशूनां गुहया निमग्नः एका. उ. ९
रुद्रः प्रणीती तमनः प्रजापतिः बा. मं. २४
रुद्रः सूर्य उमा छाया तस्मै तस्यै
नमो नमः रुद्रहृ. १९
रुद्रः सोम उमा तारा तस्मै तस्यै
नमो नमः रुद्रहृ. १९
रुद्राक्षमूलं तद्ब्रह्मा तन्नालं विष्णुरेव
च। तन्मुखं रुद्र इत्याहुस्त-
द्विन्दुः सर्वदेवताः रु. जा. ४२
रुद्राक्षं द्वादशमुखं महाविष्णु-
स्वरूपकम् रु. जा. ३७
रुद्राग्नेर्यत्परं वीर्यं तद्भस्म परि-
कीर्तितम् बृ. जा. ५।१८
रुद्राणामेतावदाधिपत्य९ स्वाराज्यं
पर्येता छांदो. ३।७।४
रुद्राणामेवैको भूत्वेन्द्रेणैव मुखेनैत-
देवामृतं दृष्ट्वा तृप्यति छांदो. ३।७।३
रुद्राणां माध्यन्दिन९ सवनमा-
दित्यानां च विश्वेषां च
देवानां तृतीयसवनम् छांदो. २।२४।१
रुद्राणां शङ्करश्चास्मि भ. गी. १०।२३

रुद्रात्प्रवर्तते बीजं बीजयोनि-
र्जनार्दनः रुद्रहृ. ८
रुद्रादयो यं ध्यायन्ति...तद्धाम
सर्वेषां देवादीनामपि दुर्लभतरम् सामर. ९४
रुद्रादित्या वसवो ये च साध्याः भ.गी. ११।२२
रुद्रानुवाकेन दिने दिने द्विजो-
ऽभिषिच्य मामर्चयत्यूर्ध्वरवेणबिल्वैः १ बिल्वो
रुद्रेषु रौद्री, ब्रह्माणीषु ब्राह्मी,
देवेषु दैवी, मनुष्येषु मानवी
(मूर्तयः)...स्वपदे तिष्ठन्ति गोपालो. ३।२
रुद्रो गन्ध उमा पुष्पं तस्मै
तस्यै नमो नमः रुद्रहृ. २२
रुद्रोऽमीत्, बृहस्पतिरुपवक्ता चिस्यु. २।१
रुद्रोऽजीजनत्, सर्वे मरुद्गणा
अजीजनन् बह्वृचो. १
रुद्रो दिवा उमा रात्रिस्तस्मै
तस्यै नमो नमः रुद्रहृ. २०
रुद्रो नर उमा नारी तस्मै तस्यै
नमो नमः रुद्रहृ. १७
रुद्रो ब्रह्मा उमा वाणी तस्मै
तस्यै नमो नमः रुद्रहृ. १८
रुद्रो ब्रह्मोपनिषदो हंसज्योतिः
पशुपतिः प्रणवस्तारकः
स एवं वेद पा. ब्र. ६
रुद्रो यज्ञ उमा वेदिस्तस्मै तस्यै
नमो नमः रुद्रहृ. २०
रुद्रो यागदेवो विष्णुरध्वर्युर्होतेन्द्रो
देवता यज्ञभुक् पा. ब्र. ३
रुद्रो येन कृतो वंशस्तस्य माया
जगत्कथम् कृष्णो. ११
रुद्रो रुद्रश्च दन्तिश्च नन्दिः षण्मुख
एव च। गरुडो ब्रह्म विष्णुश्च... म. ना. ६।१२
रुद्रोऽर्थ अक्षरः सोमा तस्मै तस्यै
नमो नमः रुद्रहृ. २३
रुद्रोलिङ्गमुमापीठंतस्मैतस्यैनमोनमः रुद्रहृ. २३
रुद्रो वह्निरुमा स्वाहा तस्मै तस्यै... रुद्रहृ. २१
रुद्रो विष्णुरुमा लक्ष्मीस्तस्मै तस्यै... रुद्रहृ. १८
रुद्रो वृक्ष उमा वल्ली तस्मै तस्यै... रुद्रहृ. २२
रुद्रो वेद उमा शास्त्रं तस्मै तस्यै... रुद्रहृ. २१

रुद्रोहि शाश्वतेन वै पुराणेनेषमूर्जेण
तपसा नियन्ता अ. शिरः.३।११
रूपकार्यसमाख्याश्च भिद्यन्ते तत्र
तत्र वै अद्वैत. ६
रूपग्रहणप्रयोजनस्यमनश्चक्षुरधीनत्वात् अद्वयता. ६
रूपमत्यद्भुतं हरेः भ.गी. १८।७७
रूपमिति गान्धर्वाः (उपासते) मुद्गलो. ३।२
रूपवदविज्ञेयं ज्ञानरूपमानन्दमयमासीत् अव्यक्तो. १
रूपवदिदं तेजो रूपाभ्यिम्यां भिन्नं गोपालो. १।७
रूपवान् भवति । अतिरूपवान्भवति गणेशो. २।२
रूपस्थानां देवतानां पुंरुयङ्गास्त्रादि-
कल्पना रा. पू.ता. १।८
रूपं नाहं नाम नाहं न कर्म ब्रह्मै-
वाहं सच्चिदानन्दरूपम् सर्वसारो.११
रूपं परं दर्शितमात्मयोगात् भ.गी. ११।४७
रूपं महत्ते बहुवक्त्रनेत्रम् भ.गी. ११।२३
रूपं रूपं जनुषा बोभवीमि माया-
भिरेको अभिचाकशानः बा. मं. ११
रूपं रूपं प्रतिरूपो बभूव [कठो.५।९+ बृह. २।५।१९
रूपं रूपं प्रतिरूपो बहिश्च कठो. ५।९,१०
रूपं शब्दस्तथा स्पर्शो रसो गन्ध-
स्तथैव च । इन्द्रियार्थान्विजा-
नीयात्पश्चैव नृपसत्तम भवसं. २।१७
रूपं सर्वमसद्विद्धि रसं सर्वमसन्मयम् ते. बिं. ३।५७
(अथ) रूपाणां चक्षुरित्येतदेषा-
मुक्थमतो हि सर्वाणि रूपा-
ण्युत्तिष्ठन्ति बृह. १।६।२
रूपाणि देवः कुरुते बहूनि बृह. ४।३।१३
रूपाणि पञ्चतन्मात्राःपुरुषःप्रकृतिर्नव गुह्यका. ७
रूपाण्येव यस्यायतनं चक्षुर्लोको
मनो ज्योतिः बृह. ३।९।१२
रूपाण्येवं यस्यायतनं चक्षुर्लोको
मनो ज्योतिर्यो वै तं पुरुषं
विद्यात्सर्वस्यात्मनः परायण९
स वै वेदिता स्यात् बृह. ३।९।१५
रेखोपरेखा वलिता यथैका पीवरी
शिला । तथा त्रैलोक्यवलितं
ब्रह्मैकमिह दृश्यताम् महो. ५।५७

रेचक-पूरक-कुम्भक-भेदेन स
त्रिविधः (प्राणायामः) शांडि. १।६।१
रेचकपूरकयुक्तः सहितः (कुम्भकः),
तद्वर्जितः केवलः । केवलसिद्धि-
पर्यन्तं सहितमभ्यसेत् शांडि.१।७।१४
रेचकं पूरकं चैव कुम्भमध्ये निरो-
धयेत् । दृश्यमाने परे लक्ष्ये
ब्रह्मणि स्वयमाश्रितः वराहो. ५।५७
रेचकं पूरकं मुक्त्वा कुम्भकं नित्य-
मभ्यसेत् ज्ञा. द. ६।१८
रेचकं पूरकं मुक्त्वा कुम्भकेन
स्थितः सुधीः ब्र. वि. २१
रेचकं पूरकं मुक्त्वा कुम्भीकरणमेव
यः । करोति त्रिषु कालेषु नैव
तस्यास्ति दुर्लभम् त्रि.ब्रा. २।१०८
रेचकं पूरकं मुक्त्वा वायुना स्थीयते
स्थिरम् । नाना नादा प्रवर्तन्ते
संस्रवेचन्द्रमण्डलम् यो.शि. १।१२७
रेचकःपूरकश्चैव कुम्भकः प्रणवात्मकः।
प्राणायामो भवेदेवं मात्रा
द्वादशसंयुतः यो. चू. १०१
रेचकेन तु विद्यात्मा ललाटस्थं
त्रिलोचनम् ।...तत्रार्कचन्द्र-
वह्नीनामुपर्युपरि चिन्तयेत् ध्या.बि.३२-३४
रेचनं पूरणं वायोः शोधनं रेचनं
तथा । चतुर्भिः क्लेशनं वायोः
प्राणायाम उदीर्यते त्रि. ब्रा. २।९४
रेचयेत्पिङ्गलानाड्या द्वात्रिंशन्मात्रया
पुनः ।...शनैरशीतिपर्यन्तं
चतुर्वारं समभ्यसेत् १ यो. त. ४२
रेत एव यस्यायतन९ हृदयं लोको
मनो ज्योतिर्यो वै तं पुरुष९
विद्यात्सर्वस्यात्मनः परायण९
स वै वेदिता स्यात् बृह. ३।९।१७
रेतस आपः (निरभिद्यन्त) २ ऐत. १।४
रेतस इति मावोचत जीवतस्तत्प्रजायते बृह. ३।९।३२
रेतसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव बृह. २।५।२
रेतसे स्वाहेत्यग्नौ हुत्वा मन्थे
सश्स्रवमवनयति बृह. ६।३।२

रेतो देवाः, देवानां रेतो वर्षं, वर्षस्य रेत ओषधयः, ओषधीनां रेतोऽन्नं, अन्नस्य रेतो रेतः, रेतसो रेतः प्रजाः, प्रजानां रेतो हृदयं, हृदयस्य रेतो मनः, मनसो रेतो वाक्, वाचो रेतः कर्म — १ ऐत. १।३।१
रेतोबुद्ध्यापमनस्स्वरूपमिति लिङ्गम् — लिङ्गोप. १
रेतो वै प्रजापतिः — बृह. ६।१।६
रेतो होच्चक्राम, तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति — बृह. ६।१।१२
रेफारूढा मूर्तयः स्युः शक्तयस्तिस्र एव च — रा. पू.ता. २।३
रेफो ज्योतिर्मये तस्मात्कृतमाकारयोजनम् — रामर. ५।६
रैक्वेमानि षट्शतानि गवामयं निष्कोऽयमश्वतरीरथो नु म एतां भगवो देवता शाधियां देवतामुपास्स इति — छान्दो. ४।२।२
रोगार्ता गां विहाय प्रशस्तगोमयमाहरेत् (भस्मार्थं) — बृ. जा. ३।१
रोचनालभनं कुर्याद्धूयेदात्मनस्तनुम् । अङ्गुलीयाक्षसूत्रं च कर्णमात्रे च धारयेत् — शिवो. ७।४४
रोचनो रोचमानः शोभनो शोभमानः कल्याणः — नृ. पू. २।११
रोचमानां त्वासादयामि — चित्यु. १९।१
रोचिष्णुरिति वा अहमेतमुपास इति, स य एवमेतमुपास्ते रोचिष्णुर्ह भवति, रोचिष्णुर्हास्य प्रजा भवति — बृह. २।१।९
रोदनाद्रुद्रसंज्ञः (अभवत्) — गणेशो. ३।१३
रोदस्योरन्तर्देशेषु अपैतं मृत्युं जयति — सूर्यता. १।२
रोमहर्षश्च जायते — भ. गी. १।२९
रोहिणीतनयो विश्व अकाराक्षरसम्भवः — गोपालो. २।१९
रोहिणीः पिङ्गला एकरूपाः — चित्यु. ११।१०
रौक्मे फलके सूर्यवर्चसि मन्त्रमानुष्टुभं विन्यस्य तदस्य कण्ठे प्रत्यमुञ्चत — अव्यक्तो. ८
रौद्री घोरा या तैजसी तनूः — बृ. जा. २।२
रौद्रेण त्वाऽङ्गिरसां मनसा ध्यायामि — वनदु. १६०
रौप्यबुद्धिः शुक्तिकायां स्त्रीपुंसोर्भ्रमतो यथा (मृषैवोदेति सकलं मृषैव प्रविलीयते) — योगकुं. १।८०
रौहिणीं लङ्घयेद्यस्तु ज्ञानादज्ञानतोऽपि वा । आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते — इतिहा. ६०

ल

लकारं पृथिवीरूपं ध्यानं बन्धूकसन्निभम् — ध्या. बि. ९६
लक्षमात्रं तु प्रजपेत्स्वस्वरूपं भवेन्मनुः — ना.पू.ता.४।१६
लक्ष्मणप्राणप्रतिष्ठानन्दकर स्थलजलाग्निमर्ममेदिन्सर्वशत्रून्छिन्धि छिन्धि — लाङ्गूलो. ३
लक्ष्मणेन प्रगुणितमक्ष्णः कोणेन सायकम् ।...लक्ष्मणेन धृतच्छत्रमथवा पुष्पकोपरि ।... एवं लब्ध्वा जयार्थी तु वर्णलक्षं जपेन्मनुम् — रामर. २।५२
लक्ष्मीर्मूलप्रकृतिरिति विज्ञायते — ना.पू.ता. ५।६
लक्ष्मीसहायोऽद्वयकुञ्जराकृतिश्चतुर्भुजश्चन्द्रकलाकलापः । मायाशरीरो मधुरस्वभावस्तस्य ध्यानात्पूजनात्तत्स्वभावः — हेरम्बो. ६
लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं...तां त्रैलोक्यकुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम् — वनदु. ८४
लक्ष्यं तदेवाक्षरं सोम्य विद्धि — मुण्ड. २।२।२

लक्ष्यं सर्वगतं चैव शरः सर्वगतो-
मुखः। वेद्धा सर्वगतश्चैव शिव-
लक्ष्यं न संशयः　　रुद्रहृ. ३९
लक्ष्यालक्ष्यमतिं त्यक्त्वा यस्तिष्ठे-
त्केवलात्मना। शिव एव स्वयं
साक्षादयं ब्रह्मविदुत्तमः　　आत्मो. १९
[महो. ४।८५+
लक्ष्यालक्ष्यविहीनोऽस्मि लयहीन-
रसोऽस्म्यहम्　　मैत्रे. ३।१३
लक्ष्येऽन्तर्बाह्यायां दृष्टौ निमेषोन्मेष-
वर्जितायां च इयं शाम्भवी
मुद्रा भवति　　मं. ब्रा. १।४
लघुत्वमारोग्यमलोलुपत्वं वर्णप्रसादं
स्वरसौष्ठवं च। गन्धः शुभो मूत्र-
पुरीषमल्पं योगप्रवृत्तिं प्रथमां वदन्ति　श्वेताश्व. २।१३
लब्धाशिना धृतिमता परिभावितव्यं
संसाररोगहरमौषधमद्वितीयम्　　यो. शि. १।९०
लब्ध्वाहारो यमेष्वेको मुख्यो भवति
नेतरः　　१ यो. त. २८
लङ्कापुरीदाहन उदधिलङ्घन...सर्व-
शत्रून्छिन्धि छिन्धि　　लाङ्गूलो. ३
लज्जा मतिस्तुष्टिरिष्टा च पुष्टा लक्ष्मी-
रमा ललिता लालपन्ती　　त्रि.महो. ६
लब्धयोगनिद्रस्य योगिनः कालो नास्ति　शांडि. १।७।१८
लब्धयोगोऽथ बुद्ध्येत (लब्धयोगेन
बोद्धव्यं) प्रसन्नं परमेश्वरम्
(परमेष्ठिनम्)　　यो. शि. १।७८
लब्धं गोभस्म नो चेदन्यगोक्षारं (धार्यं)　बृ.जा. ३।१
लभते च ततः कामान्　　भ. गी. ७।२२
लभते धारणाद्योगं येन शुद्ध्यति
वै मतिः। लब्ध्वा सर्वप्रयत्नेन
संयतिस्तत्परो भवेत्　　दुर्वासो. १।१३
लभते नासया यद्यत्तत्तदात्मेति
भावयेत्　　१ यो. त. ७०
लभते पौर्वदेहिकम्　　भ. गी. ६।४३
लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः　भ. गी. ५।२५
लभन्ते ब्रह्म निर्वाणं शुद्धा
ध्यानेन योगिनः　　दुर्वासो. १।१०
लभन्ते युद्धमीदृशम्　　भ. गी. २।३२

लम्बोदरोऽहं पुरुषोत्तमोऽहं विघ्ना-
न्तकोऽहं विजयात्मकोऽहम्　　हेरम्बो. १२
लम्भुको ह वासो भवत्यनग्नो ह
वासो भवति　　छांदो. ९।२।२
लयमन्त्रहठा योगा योगो ह्यष्टाङ्ग-
संयुतः　　वराहो. ५।१०
लययोगश्चित्तलयः कोटिशः
परिकीर्तितः　　१ यो. त. २३
लयविक्षेपरहितं मनः कृत्वा
सुनिश्चलम्। यदा यात्यमनी-
भावं तदा तत्परमं पदम्　　मैत्रा. ६।३४
लयस्तमश्च विक्षेपस्तेजः स्वेदश्च
शून्यता। एवं हि विघ्नबाहुल्यं
त्याज्यं ब्रह्मविशारदैः　　ते. बिं. १।४१
लयात् (मनसः) सम्प्राप्यते
सौख्यं स्वात्मानन्दं परं पदम्　　यो. शि. १।१३६
लयेन पलमात्रेण आसनस्थो न
खिद्यते। स्वल्पश्वासो भवे-
द्योगी स्वल्पोन्मेषयुतस्तथा　　अमन. १।३९
लये सम्बोधयेच्चित्तं, विक्षिप्तं शम-
येत्पुनः। सकषायं विजानीयात्
समप्राप्तं न चालयेत्　　अद्वैत. ४
ललाटमेवोक्थं, यथा द्यौस्तथा　　१ ऐत. १।२।६
ललाटाच्चैव मे रुद्रो देवः क्रोधा-
द्विनिस्सृतः　　ना. महो. ४०
ललाटात्क्रोधजो रुद्रो जायते　　सुबालो. २।१
ललाटे ऊर्ध्वपुण्ड्रं मध्यच्छिद्रं　　सि. वि. ३
लवणमेतदुदकेऽवधायाथ मा
प्रातरुपसीदथाः　　छांदो. ६।१३।१
लवणं तोयसम्पर्काद्यथा तोय-
मयं भवेत्। मनोऽपि ब्रह्म-
सम्पर्कात्तथा ब्रह्ममयं भवेत्　　अमन. १।२९
लवणेन सुवर्णं सन्दध्यात्सुवर्णेन
रजतं रजतेन त्रपु त्रपुणा
सीसं सीसेन लोहं लोहेन
दारु दारुणा चर्म　　छांदो. ४।१७।७
लवैकं न भावयेज्जन्तुसंरक्षणार्थं
वर्षवर्जमिति　　कठरु. ४

लाङ्गलानामेवैते बहुलमनुदात्तानुदात्तं चानुदात्तमवृद्धं वृद्धं..भवति   संहितो. ३।२

लाभालाभयोः समो भूत्वा... सन्न्यासेन देहत्यागं करोति स परमहंसः   जाबालो. ६

लाभालाभावसद्बुद्धि जयाजयमसन्मयम्   ते. बि. ३।५६

लाभालाभौ जयाजयौ   भ. गी. २।३८

लाभालाभे समो भूत्वा...शरीरत्रयमुत्सृज्य सन्न्यासेनैव देहत्यागं करोति स कृतकृत्यो भवति   ना. प. ३।८७

लाभालाभौ समौ कृत्वा गोवृत्त्या प्राणसन्धारणं कुर्वन्...प्रणवात्मकत्वेन देहत्यागं करोति यः सोऽवधूतः   तुरीया. ३

लाभालाभौ समौ कृत्वा गोवृत्त्या भैक्षमाचरन्...सन्न्यासेन देहत्यागं करोति स परमहंसपरिव्राजकः   प. हं. प. ८

लाभे चैव न हर्षयेत्, प्राणयात्रिकमात्रः स्यात्   ना. प. ५।१८

लालनात्स्निग्धललना पालनात् पालकः पिता । सुहृदुत्तमविन्यासान्मतो मन्ये मनीषिणः   महो. ५।८०

लिङ्गतृतीयभागेन भवेद्वेद्याः समुच्छ्रयः   शिवो. २।२

लिङ्गनालात्समाकृष्य वायुमप्यग्रतो मुने ।...मूलाधारस्य विप्रेन्द्र मध्ये तं तु निरोधयेत्   जा.द. ६।४०

लिङ्गमोङ्कारमिष्यते   शिवो. १।२४

लिङ्गरूपिणं मां सम्पूज्य चिन्तयन्ति सिद्धाः सिद्धिङ्गताः   भस्मजा. २।१३

लिङ्गं प्रचरेच्छास्त्रात्   लिङ्गोप. २

लिङ्गं च कारणं चैव चिन्मात्रान्नहि विद्यते   ते. बि. २।३२

(अथ) लिङ्गात्संहृत्य तेजसा शरीरत्रयं संव्याप्य...मात्राभिरोतानुज्ञात्रनुज्ञाविकल्परूपं चिन्तयन्ग्रसेत्   नृसिंहो. ३।४

लिङ्गाभावात्तु कैवल्यमिति ब्रह्मानुशासनम्   ना. पं. ४।३७

लिङ्गाभिषेकं निर्माल्यं गुरोरभिषेकतीर्थं महेश्वरपादोदकं जन्ममालिन्यं प्रक्षालयति   १ रुद्रोप. ३

लिङ्गे सत्यपि खल्वस्मिञ्ज्ञानमेव हि कारणम्   ना. प. ४।३३

लिप्यते न स पापेन   भ. गी. ५।१०

लीयते हि सुषुप्तौ तन्निगृहीतं न लीयते । तदेव निर्भयं ब्रह्म ज्ञानालोकं समन्ततः   अद्वैत. ३५

लीलया कल्पयामास चित्राः सङ्कल्पतः प्रजाः । नानाचारसमारम्भा गन्धर्वनगरं यथा   महो. ५।१६२

लीलयैव यदादत्ते दिक्कालकलितं वपुः । तदेव जीवपर्यायवासनावेशतः परम् । मनः सम्पद्यते लोलं कलनाकलनोन्मुखम्   महो. ५।१४५

(एवं) लीलाकामशरीरी स्वविनोदार्थं भक्तैः सहोत्कण्ठितैस्तत्र क्रीडति कृष्णः   राधोप. ४।२

लुप्तपिण्डोदकक्रियाः   भ. गी. १।४२

लुब्धो हिंसात्मकोऽशुचिः   भ. गी.१८।२७

लेलायन्तीरिव सञ्जिहाना इव   आर्षे. ७।१

लेलिह्यसे ग्रसमानः समन्तात्   भ.गी. ११।३०

लेशतः प्राप्तसत्ताकः स एव घनतां शनैः । याति चित्तत्वमापूर्य दृढं जाड्याय मेघवत्   महो. ५।१७९

लोकत्रयं प्रव्यथितं महात्मन्   भ.गी. ११।२०

लोकत्रयेऽपि कर्तव्यं किञ्चिन्नास्त्यात्मवेदिनाम्   जा. द. १।२४

लोकत्रयेऽप्यप्रतिमप्रभाव   भ.गी. ११।४३

लोकवासनया जन्तोः शास्त्रवासनयाऽपि च । देहवासनया ज्ञानं यथावन्नैव जायते   मुक्तिको.२।२

लोकसंग्रहमेवापि   भ. गी. ३।२०

लोकसङ्ग्रहयुक्तानि नैव कुर्यान्नकारयेत्   ना. प. ५।३३

लोकस्तदनुवर्तते   भ. गी. ३।२१

लोकस्य द्वारमर्चिष्मत्पवित्रम्   सुदर्श.९

लोकस्य नरकान्मृत्योर्महाभयाच्च
संरक्षणी (गोपी) गोपीचं. ६
लोकस्य संक्लृप्त्यै सर्वꣳ सङ्कल्पते छांदो. ७।४।२
लोकस्य सृजति प्रभुः भ. गी. ५।१४
लोकं मे यजमानाय विन्दैष वै
यजमानस्य लोक एतास्मि छांदो.२।२४।५
लोका अलोका देवा अदेवा वेदा
अवेदा अत्र स्तेनोऽस्तेनो भवति वृह. ४।३।२२
लोका इति लोकविदो देवा इति
च तद्विदः वैतथ्य. २१
लोकातिहारपरोक्षसमापाद्याः संहितो. २।१
लोकादिमग्निं तमुवाच तस्मै या
इष्टका यावतीर्वा यथा वा । स
चापि तत्प्रत्यवदद्यथोक्तमथास्य
मृत्युः पुनरेवाह तुष्टः कठो. १।१५
लोकानुग्रहार्थं मायासहितं ब्रह्म
सम्भोगवशादस्य चन्दनस्य
वैभवम् गोपीचं. ८
लोकानुवर्तनं त्यक्त्वा त्यक्त्वा देहानु-
वर्तनम् । शास्त्रानुवर्तनं त्यक्त्वा
स्वाध्यासापनयं कुरु [अक्ष्युप.४५+अध्यात्मो. ३
लोकान्तरगतः कर्मार्जितफलं स
एव भुङ्क्ते पैङ्गलो. २।७
लोकान्नोद्विजते च यः भ.गी.१२।१५
लोकान्प्रत्युत्थायिनस्त एवमे-
वानुपरिवर्तन्ते बृह. ६।२।१६
लोकान् समग्रान् वदनैर्ज्वलद्भिः भ. गी.११।३०
लोकान् समाहर्तुमिह प्रवृत्तः भ.गी. ११।३२
लोकान्...सर्वाणि च भूतानि
स्थावरजङ्गमान्यनुभवेयम् २ प्रणवो. १
लोकायतादिसांख्यान्ता जीवविश्रा-
न्तिमाश्रिताः । तस्मान्मुमुक्षुभि-
र्नैव मतिर्जीवेशवादयोः । कार्या
किन्तु ब्रह्मतत्त्वं निश्चलेन विचार्य-
ताम् [महो. ४।७४+ वराहो. २।५५
लोकालोकं दहति धर्माधर्मं दहत्य-
भास्करममर्यादं निरालोकमतः
परं दहति सुबालो.१५।१-२

लोकास्तं परादुर्योऽन्यत्रात्मनो
लोकान्वेद [बृह.२।४।६+ ४।५।७
लोकाँल्लोकविदः प्राहुराश्रमा इति
तद्विदः । स्त्रीपुन्नपुंसकं लैङ्गाः
परापरमथापरे वैतथ्य. २७
लोकाः सङ्कल्पन्ते लोकानां सं स्यै
(मा. पा.) छांदो. ७।४।२
लोकीभवति सर्वमायुरेति ज्योग्जी-
वति महान्प्रजया पशुभिर्भवति
महान्कीर्त्या लोकान्न निन्देत्तद्व्रतम् छांदो.२।१७।२
लोके जन्म यदीदृशम् भ. गी. ६।४२
लोके दातारꣳ सर्वभूतान्युपजीवन्ति महाना. १७।५
लोके धर्मिष्ठं प्रजा उपसर्पन्ति महाना. १०।६
लोके परमहंसपरिव्राजको दुर्लभ-
तरो यद्येकोऽस्ति प. हं प. ११
लोकेषु पञ्चविधं सामोपासीत छांदो. २।२।१
लोके साधु प्रजायास्तन्तुं तन्वानः
पितॄणामनृणो भवति महाना. १७।७
लोकेऽस्मिन् द्विविधा निष्ठा भ. गी. ३।३
लोको ब्रह्म गुरुर्ब्रह्म शिष्यो ब्रह्म
सदाशिवः । पूर्वं ब्रह्म परं
ब्रह्म शुद्धं ब्रह्म शुभाशुभम ते. बिं. ६।३७
लोको मामजमव्ययम् भ. गी. ७।२५
लोको म्रियते जननाय च भवसं. १।२५
लोकोऽयं कर्मबन्धनः भ. गी. ३।९
लोपामुद्रायाः शक्तिकूटराजं पठित्वा
वैष्णवी विद्या द्वादशे धामनि
व्याचक्षते त्रि. ता. १।१६
लोभक्रोधादयो दैत्याः कृष्णो. ९
लोभं मोहं भयं दर्पं कामं क्रोधं
च किल्बिषम् ते.बिं. १।१२
लोभः प्रवृत्तिरारम्भः भ.गी.१४।१२
लोभादयः पशवः (शा. यज्ञस्य) गर्भो. ११
लोभोपहतचेतसः भ. गी. १।३८
लोमभ्य ओषधिवनस्पतयो हृदयं
निरभिद्यत २ ऐत. १।४
लोमभ्य ओषधिवनस्पतयो
ललाटात्क्रोधजो रुद्रो जायते सुबालो. २।१
लोमशां पशुभिः सह स्वाहा तैत्ति. १।४।१

लोमशेन ह स्म वै चर्मणा पुरा वीणा अपिदधति ३ ऐत. २।५।२
लोम हिङ्कारस्त्वक्प्रस्तावो मा९ स-मुद्गीथोऽस्थि प्रतिहारो मज्जा निधनमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतम् छांदो. २।१९।१
लोमाधरोष्ठमथर्ववेदः प्रीणातु आचम. ४
लोमानि धूमो योनिरर्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दा विस्फुलिङ्गाः बृह. ६।२।१३
लोमानि बर्हिः (यज्ञस्य) महाना. १८।१
लोहानां काञ्चनं वरम् इतिहा. ४९
लोहितशुक्लकृष्णगुणमयीगुणसाम्या-निर्वाच्यामूलप्रकृतिरासीत् पैङ्गलो. १।२
लोहितं तिलकं ध्यायेत् गुह्यका. ११
लोहिनी द्यौर्भवति ३ ऐत. २।४।४
लौकिकवैदिकमप्युपसंहृत्य सर्वत्र पुण्यापुण्यवर्जितो ज्ञानाज्ञान-मपि विहाय...देहत्यागं करोति यः सोऽवधूतः तुरीया. ३
लौकिकवैदिकसामर्थ्यं स्वचतुर्दश-करणप्रवृत्तिं च पुत्रे समारोप्य तदभावे शिष्ये तदभावे स्वा-त्मन्येव...तत्त्वमस्यादिवाक्यार्थ-स्वरूपानुसन्धानं कुर्वन्नुदीचीं दिशं गच्छेत् प. हं. प. ५
लौकिकाग्नीनुदराग्नौ समारोपयेत् आरुणि. २

व

वकारं जीवबीजं च उद्दानं शङ्खवर्णकम् ध्या. बिं. ९६
वक्तव्यमेवाप्येति यो वक्तव्य-मेवास्तमेति सुबालो. ९।६
वक्ता चास्य त्वादृगन्यो न लभ्यो... कठो. १।२२
वक्त्राणि ते त्वरमाणा विशन्ति भ.गी. ११।२७
वक्त्रेण सीत्कारपूर्वकं वायुं गृहीत्वा यथाशक्ति कुंभयित्वा नासाभ्यां रेचयेत् , तेन क्षुत्तृष्णालस्य-निद्रा न जायते शांडि. १।७।१४
वक्त्रेणापूर्य वायुं हुतवहनिलये-ऽपानमाकृष्य धृत्वा स्वाङ्गुष्ठा-द्यङ्गुलीभिर्वरकरतलयोः षड्भि-रेवं निरुध्य। ... पश्यन्ति प्रत्ययांशं प्रणवबहुविधध्यान-संलीनचित्ताः सौभाग्य. ७
वक्त्रेणोत्पलनालेन तोयमाकर्षये-न्नरः । एवं वायुर्ग्रहीतव्यः पूरकस्येति लक्षणम् अ. ना. १३
वक्तुमर्हस्यशेषेण भ.गी.१०।१६
वक्रतुण्डाय हुमिति चतुर्थः पादः ग. पू. ता.१।१३
वक्षोन्यस्तवपुः प्रपीड्य सुचिरं योनिं च वामाङ्घ्रिणा...सेयं व्याधिविनाशिनी सुमहती मुद्रा नृणां कथ्यते यो. चू. ६६
वक्षोन्यस्तहनुर्निपीड्य सुषिरं योनेश्च वामाङ्घ्रिणा हस्ताभ्यामनु-धारयन्प्रविततं पादं तथा दक्षिणम् । आपूर्य श्वसनेन कुक्षियुगलं बध्वा शनै रेचये-देषा पातकनाशिनी ननु महा-मुद्रा नृणां प्रोच्यते ध्या. बिं. ९३
वक्षो वसत्यस्य वरां वरिष्ठं वाकं दधाना वद्वधे समस्तं तस्मै वरिष्ठाय वरप्रवृद्ध्यै स्वाहा पारमा. ९।२
वक्ष्यन्ते कारणान्यष्टौ स्मृतिर्यै-रुपचर्यते आयुर्वे. २०
वक्ष्यामि भरतर्षभ भ. गी. ८।२३
वक्ष्यामि हितकाम्यया भ. गी. १०।१
वचनात्पुरुषो ह्यव्यक्तमुखेन त्रिगुणं भुङ्क्ते मैत्रा. ६।१०
वचनादानगमनविसर्गानन्द-पञ्चकम् वराहो. १।१२
वचनादानगमनविसर्गानन्दहानो-पेक्षाबुद्धयोऽनङ्गकुसुमादिशक्त-योऽष्टौ भावनो. ३

वचनादानगमनविसर्गानन्दास्त-
द्विषयाः (कर्मेन्द्रियाणां) पैङ्गलो. २।३
वचनादानगमनविसर्गानन्दाः
पृथिवीकार्यकर्मेन्द्रियविषयाः त्रि. ब्रा. १।४
वचसा तज्जपेन्नित्यं वपुषा तत्सम-
भ्यसेत् । मनसा तज्जपेन्नित्यं
तत्परं ज्योतिरोमिति यो. चू. ८७
वचसो वाग्व्यापारः ना. प. ६।३
वज्रदण्डसमुद्भूता मणयश्चैक-
विंशतिः । सुषुम्नायां स्थिताः
सर्वे सूत्रे मणिगणा इव यो.शि. १।११८
वज्रदेह वज्रपुच्छ वज्रकाय... लांगूलो. ३
वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय
धीमहि । तन्नो नारसिंहः
(नृसिंहः) प्रचोदयात् महाना. ३।९
[त्रि. म. ना. ७।१०+ वनदु. १३७
वज्रपञ्जरनाम्नैव यः कुर्याद्भस्म-
धारणम् । स सर्वभयनिर्मुक्तः
साक्षाच्छिवमयो भवेत् वज्रपं. ६
वज्रपञ्जरेण भस्मधारणं कुर्यात् वज्रपं. १
वज्रशक्तिपाशाङ्कुशगदात्रिशूल-
चन्द्रमुसलपद्मानि द्वादशे.. सूर्यता. ५।१
वज्रस्तम्भवदात्मानमवलम्ब्य
स्थिरोऽस्म्यहम् १सं. सो.२।५०
वज्राङ्गं पिङ्गनेत्रं कनकमयलस-
त्कुण्डलाक्रान्तगण्डं...
ध्यायन्तं रामचन्द्रं प्लवगपरिवृढं
सत्त्वसारं प्रसन्नम् लांगूलो. २
वज्रोली चामरोली च सहजोली
त्रिधा मता १ यो. त. २७
वज्रोलीमभ्यसेद्यस्तु स योगी
सिद्धिभाजनम् १ यो.त. १२६
वज्रोऽसि वार्त्रघ्नः शर्म मे भव
यत्पापं तन्निवारय आरुणि. ३
(वद्यथा) वटबीजसामान्यमेक-
मनेकान्स्वाव्यतिरिक्तान्वटान्
सबीजानुत्पाद्य तत्र तत्र पूर्णं
सत्तिष्ठत्येवमेवैषा माया स्वा-
व्यतिरिक्तानि पूर्णानि क्षेत्राणि
दर्शयित्वा जीवेशावभासेन
करोति माया चाविद्या च
स्वयमेव भवति नृसिंहो. ९।२
वटबीजस्थमिव दत्तबीजस्थं
सर्वं जगत् दत्तात्रे. १।१
वडवाग्निः शरीरस्थो ह्यस्थिमध्ये
प्रवर्तते यो. शि. ५।३०
वडवेतराभवदश्ववृष इतरः बृह. १।४।४
वत्सरशतं ब्रह्ममानेन ब्रह्मणः
परमायुःप्रमाणम् त्रि.म.ना. ३।४
वत्सस्तु स्मृतयश्चास्य तत्सम्भूतं तु
गोमयम् । आगाव इति मन्त्रेण
धेनुं तत्राभिमन्त्रयेत् बृ. जा. ३।३
(अथ) वत्सं जातमाहुरतृणाद इति बृह. १।५।२
वत्सं पयसा पुनानाः चित्यु. १४।२
वदन्तिबहुभेदेनवादिनोयोगभूमिकाः महो. ५।२२
वदन्ते चात्मनो भावं वेदान्तोप-
निषद्विदः अमन. २।२४
वदन्त्येव परं ब्रह्म बुद्धिमन्तस्तु सूरयः अमन. २।२३
वदन् वाक् पश्यंश्चक्षुः शृण्वन् श्रोत्रं
मन्वानो मनस्तान्यस्यैतानि
कर्मनामान्येव बृह. १।४।७
वदन्वै तन्न वदति न हि वक्तुर्वक्ते-
र्विपरिलोपो विद्यतेऽविनाशित्वात् बृह. ४।३।२६
वदिष्यन्ति तवाहिताः भ. गी. २।३६
वदिष्याम्येवाहमिति वाग्दध्रे बृह. १।५।२१
वदेदुन्मत्तवद्विद्वान् गोचर्यानैगमश्चरेत् ना. प. ५।३७
वधाय दत्तं तमहं हनामि चित्यु. १४।४
वनभाराअष्टादशजायन्ते पुरुषोत्तमात् सि. वि. २
वनस्पतयओषध्यो लोमानिपरिचक्षते गुह्यका. १७
वनस्पतयः शान्तिर्विश्वेदेवाः
शान्ति...[वा. सं. ३६।१७+ प्रवर्ग्या. १७
वनावनिविहारेण चित्तोपशम-
शोभिना । असङ्गसुखसौख्येन
कालं नयति नीतिमान् अध्युप. २०
वनितादिषु वाक्कर्ममनोभि-
र्निस्स्पृहः शुचिः रामर. ४।२
वनी भूत्वा प्रव्रजेत् जाबालो. ४

वने शुष्कं शकृत् सङ्गृह्य कल्पोक्त-
विधिना कल्पितमुपकल्पं
स्यात् (भस्म) बृ. जा. ३।३४
वन्दे रुद्रप्रियां नित्यमुत्पन्नां
कामरूपिणीम् । उल्कामुखीं
रुद्रजटीं नागपुष्पशिरोरुहाम् वनदु. ८५
वन्ध्याकुमारवचने भीतिश्चेदस्ति
किञ्चन ते. बि. ६।७३
वन्ध्यापुत्रो न तत्त्वेन मायया
वाऽपि जायते अद्वैत. २८
वपुर्वह्निकणाकारं स्फुरितं व्योम्नि
पश्यति महो. ५।१५२
वमनान्नमिव प्रवृत्तिं सर्वं हेय मत्वा
साधनचतुष्टयसम्पन्नो यः सन्न्य-
स्यति स एव ज्ञानसन्न्यासी १सं.सो. २।१३
वमनाहारवद्यस्य भाति सर्वेषणा-
दिषु । तस्याधिकारः सन्न्यासे
त्यक्तदेहाभिमानिनः मैत्रे. २।१८
वयमाद्यस्य दातारः पिता त्वं
मातरिश्व नः प्रश्नो. २।११
वयमेतद्बाणमवष्टभ्य विधारयामः प्रश्नो. २।२
वयं कृतार्था इत्यभिमन्यन्ति बालाः मुण्ड. २।९
वयं देवस्य भोजनमित्याचामति छांदो. ५।२।७
वयं नाम प्रब्रवामा घृतेना- (घृतस्या)
स्मिन्यज्ञे धारयामा नमोभिः महाना. ८।९
[+तै. आ. १०।१०।२+ऋ.मं. ४।५८।२
[+वा. सं. १७।९०
वयं ब्रह्मचारिन्निदमुपास्महे (मा.पा.) छांदो. ४।३।७
वयं ब्रह्मचारिन्नेदमुपास्महे दत्तास्मै
भिक्षामिति छांदो. ४।३।७
वयं सोम व्रते तव मनस्तनुषु बिभ्रतः लिङ्गोप. १
[+ऋ.मं.१०।५७।६+वा.सं.३।५६
वय९ स्वर्गलोकमेष्यामो वयमेष्यामः सहवै. १
(ॐ) वयः सुपर्णा उपसेदुरिन्द्रं
प्रियमेधा ऋषयो नाधमानाः महाना. १६।७
[चाक्षुषो.९+ऋ.मं१०।७३।११
[+साम. १।३१९ तै.आ. ४।४२।३
वयांसि वैनद्विमश्नीरन्निति बृह. ३।९।२५

वयो दात्रे मयो मह्यमस्तु
प्रतिग्रहीत्रे चित्यु. १०।१,४
वरणायां ना-(-स्यां) इयां च
मध्ये प्रतिष्ठितः [जाबालो. २+ रामो. ३।२
वरदं सर्वभूतानां सर्वं व्याप्यैव
तिष्ठति १ प्रणवो. ११
वराकृतप्राप्तिः स्नानम् आत्मपू. १
वराह एनं हन्ति, मर्कट एनमास्क-
न्दति (दुःस्वप्ने) ३ ऐत. २।४।७
वराहरूपिणं मां ये भजन्ति मयि
भक्तितः । विमुक्ताज्ञानतत्कार्या
जीवन्मुक्ता भवन्ति ते वराहो. १।१६
वरुण एव सविताऽऽपः सावित्री स
यत्र वरुणस्तदापो यत्र वा आप-
स्तद्वरुणस्ते द्वे योनिस्तदेकं मिथुनम् सावित्र्यु. २
वरुणमेवाप्येति यो वरुणमेवास्तमेति सुबालो. ९।४
वरुणस्य विराट् चित्यु. ९।१
वरुणेन मुखेन न वै देवा अश्नन्ति
न पिबन्ति छांदो. ३।८।१
वरुणेनैव मुखेनैतदेवामृतंदृष्ट्वातृप्यति छांदो. ३।८।३
वरुणोऽपामघमर्षणस्तस्मात् प्रमुच्यते महाना. ६।८
वरुणो यादसामहम् भ.गी.१०।२९
वरुणोऽर्यमाः चन्द्रमा कला कलि-
धाता...सर्वं नारायणः सुबालो. ६।१
वरेण्यं श्रेष्ठं भजनीयमक्षरं
नमस्कार्यम् त्रि. ता. १।६
वरो दक्षिणा, वरेणैव वरं स्पृणो-
त्यात्मा हि वरः सहवै. २०,२२
वर्गोऽसि पाप्मानं मे वृङ्धीत्ये-
तयैवाऽऽवृता मध्ये सन्तमुद्वर्गो-
ऽसि पाप्मानं म उद्वृङ्धि कौ. उ. २।७
वर्चोदास्त्वमसि सूर्यस्य महाना.१७।१५
वर्जयित्वा स्त्रियाः सङ्गं कुर्यादभ्यास-
मादरात् । योगिनोऽङ्गे सुगन्धश्च
जायते बिन्दुधारणात् १ यो. त. ६२
वर्णत्रयात्मकाः प्रोक्ता रेचपूरक-
कुम्भकाः । स एष प्रणवः प्रोक्तः
प्राणायामस्तु तन्मयः जा. द. ६।२

वर्णं रक्तं कामदं च सर्वाधिव्याधि-
भेषजम् । सृष्टिस्थितिलयादीनां
कारणं सर्वशक्तिधृक् पञ्चब्र. १२
वर्णं शुक्लं तमोमिश्रं पूर्णबोधकरं
स्वयम् । धामत्रयनियन्तारं
धामत्रयसमन्वितम् पञ्चब्र.८
वर्णः स्वरः । मात्रा बलम् । साम
सन्तानः तैत्ति. १।२।१
वर्णाक्षरपदाङ्कशो विभक्त्यामृषि-
निषेवितामिति वाचं स्तुवन्ति २ प्रणवो. १७
वर्णादिधर्मं हि परित्यजन्तः
स्वानन्दतृप्ताः पुरुषा भवन्ति मैत्रे. १।१८
वर्णानां ब्राह्मण एव प्रधान इति
वेदवचनानुरूपं स्मृतिभिरप्युक्तम् व. सू. २
वर्णाश्रमधर्मकर्मसङ्कल्पो बन्धः निरा. उ. २१
वर्णाश्रमं सावयवं स्वरूपमाद्यन्त-
युक्तं ह्यतिकृच्छ्रमात्रम् । पुत्रा-
दिदेहेष्वभिमानशून्यं भूत्वावसे-
त्सौख्यतमे ह्यनन्ते मैत्रे. १।१९
वर्णाश्रमाचारयुता विमूढाः
कर्मानुसारेण फलं लभन्ते मैत्रे. १।१८
वर्णाश्रमाचारविशेषाः पृथक्पृथक्
शिखावर्णाश्रमिणामेककैव परब्र. ६
वर्णाश्रमादयो देहे मायया परि-
कल्पिताः नात्मनो बोधरूपस्य
मम ते सन्ति सर्वदा । इति यो
वेद वेदान्तैः सोऽतिवर्णाश्रमीभवेत ना. प. ६।१६
वर्णाश्रमेषु ये धर्माः शास्त्रोक्ता नृप-
सत्तम । तेषु तिष्ठन्नरो विष्णु-
माराधयति नान्यथा भवसं. २।६१
वर्णो ह वै पुरुषः स लोकाधि-
ष्ठितो भवत्यनुष्टुब्वै पुरुषः ग. पू. ३।१
वर्ण्यन्ते स्वस्तिकं पादतलयो-
रुभयोरपि । पूर्वोत्तरे जानुनी
द्वे कृत्वाऽऽसनमुदीरितम् त्रि. ब्रा. २।३५
वर्त एव च कर्मणि भ. गी. ३।२२
वर्तते कामकारतः भ.गी. १६।२३
वर्तते विजितात्मनाम् भ. गी. ५।२६
वर्तन्त इति धारयन् भ. गी. ५।९

वर्तमानानि चार्जुन भ. गी. ७।२६
वर्तेतात्मैव शत्रुवत् भ. गी. ६।६
वर्त्याधारस्नेहयोगाद्यथा दीपस्य
संस्थितिः । अन्तर्याण्डोपयोगा-
दिमौ स्थितावात्मशुची तथा मैत्रा. ६।३६
वर्षति स उद्गीथः [छां.उ.२।३।१+ २।१५।१
वर्षत्येष यथा धर्मामृतधाराःसहस्रशः अध्यात्मो. ३८
वर्षन्तं न निन्देत्तद्व्रतम् छांदो. २।१५।२
वर्षन्तु ते विभावरि दिवो अभ्रस्य
विद्युतः । रोहन्तु सर्वबीजान्यव
ब्रह्म द्विषो जहि [वनदु.३८,४०+ ऋ.खि.५।८४।१
वर्षस्य रेत ओषधयः १ ऐत. १।३।१
वर्षस्य संक्लृप्त्या अन्नं सङ्कल्पयते छांदो. ७।४।२
वर्षा उद्गीथः छांदो. २।१६।१
वर्षाभ्योऽन्यत्र यत्स्थानमासनं तदु-
दाहृतम् । उत्कालाम्ब्वादिपात्रा-
णामेकस्यापीह सङ्ग्रहः १सं.सो. २।८०
वर्षाभ्योऽन्यत्र वर्षासु मासांश्च
चतुरो वसेत् । द्विरात्रं वा
वसेद्ग्रामे भिक्षुर्यदि वसेत्तदा ना. प. ४।१५
वर्षासु ध्रुवशीलोऽष्टौ मासानेकाकी
यतिश्चरेत् आरुणि. ४
वर्षास्वेकत्र तिष्ठेत स्थाने पुण्य-
जलावृते (यतिः) ना.प. ४।२१
वल्मीकताडनादेव मृतः किंनु महोरगः वराहो. २।४०
वशः कौलेयकेनेव ब्रह्मन्मुक्तोऽस्मि
चेतसा महो. ३।१९
वशिन्येका निष्क्रियाणां बहूनामेकं
बीजं बहुधा या करोति गुह्यका. ७०
वशी सर्वस्य लोकस्य स्थावरस्य
चरस्य च श्वेताश्व. ३।१८
वशे सततनम्रः स्यात्संहृत्याङ्गानि
कूर्मवत् । तत्सम्मुखं च निर्गच्छे-
न्नमस्कारपुरःसरः शिवो. ७।६७
वश्यमायत्वमेकं सर्वज्ञत्वं च तस्य तु सरस्व. ३९
वश्याय पङ्कजैर्विद्वान् धनार्थी
मोदकैर्हुनेत् ग. पू. २।१३
वश्यां स्फुरन्तीमसतीं निपीड्य
सम्भक्ष्य सिंहेन स एव वीरः नृसिंहो. ४।३

वश्यो बाणो रागः पाशः द्वेषोऽङ्कुशः भावनो. ६
वसन्तो अस्यासीदाज्यम् चित्यु. १२।३
[+ऋ.मं.१०।९०।६+ पु. सू.६,१४
वसन्तो हिङ्कारो ग्रीष्मः प्रस्तावो वर्षा
उद्गीथः शरत्प्रतिहारो हेमन्तो
निधनमेतद्वैराजमृतुषु प्रोतम्
[छांदो. २।५।१+ २।१६।१
वसापराणि द्वात्रिंशतं वर्षाणीति
सहापराणि द्वात्रिंशतं वर्षाण्युवास छांदो. ८।९।३
वसिष्ठवालखिल्यविश्वामित्रकश्यपा-
त्रिभरद्वाजाङ्गीरसजामदग्नि-
गौतमागस्त्यजाबालिकपिला
द्वादशदलाः ना.पू. ता.६।१
वसिष्ठवैयासकिवामदेवविरिञ्चि-
मुख्यैर्हृदि भाव्यमानः ।
सनत्सुजातादिसनातनाद्यै-
रीड्यो महेशो भगवानादिदेवः शरभो. २०
वसिष्ठाय स्वाहेत्यग्नावाज्यस्य
हुत्वा मन्थे सम्पातमवनयेत् छांदो. ५।२।५
(यो ह वै) वसिष्ठां वेद, वसिष्ठः
स्वानां भवति, वाग्वै वसिष्ठा बृह. ६।१।२
वसीयान् भवति स य एतदेनमुपास्ते आर्षे. ४।३
वसुरण्वो विभुरसि प्राणे त्वमसि
सन्धाता ब्रह्मंस्त्वमसि.. महाना.१७।१५
वसुरुद्रादित्यैः सर्वैर्देवैः सेवितं
दिव्यं तत् साम्नस्तृतीयं पादं
जानीयात् [नृ. पू. १।२ ग.पू.ता. १।१२
वसूनामेव तावदाधिपत्यं स्वाराज्यं
पर्येता छांदो. ३।६।४
वसूनामेवैको भूत्वाऽग्निनैव मुखे-
नैतदेवामृतं दृष्ट्वा तृप्यति छांदो. ३।६।३
वसूनां पावकश्चास्मि भ. गी. १०।२३
वसूनां प्रातस्सवनं रुद्राणां माध्यं-
दिनं सवनमादित्यानां च
विश्वेषां च देवानां तृतीयसवनम् छांदो. २।२४।१
वसेदेकान्तिको भूत्वा चैकान्ते
द्वैतवर्जिते । इत्येवमाचरे-
द्धीमान्स एवं मुक्तिमाप्नुयात्
[स्कन्दो. १२+ मैत्रे.२।३

वसोर्द्धाराणामिन्द्रनगरं तदसुराः
पर्यवारयन्त २ प्रणवो. ७
वसोः पवित्रमग्निः सवितुश्च रश्मयः
पुनन्त्वन्नं ममदुष्कृतं च यदन्यत् मैत्रा. ६।९
वस्तुतो नोपादानमत एव नोपादेयम् स्वसंवे. १
वस्त्रमपि भूमौ वाऽप्सु वा विसृज्य
....ब्रह्माहमस्मीति तत्त्वमस्यादि-
वाक्यार्थस्वरूपानुसन्धानं कुर्व-
न्नुदीचीं दिशं गच्छेत् प. हं. प. ५
वस्त्रमुच्छिष्टपात्रमिव (त्यजेद्यतिः) ना. प. ७।१
वस्त्वभावं सुबुध्वैव निःसङ्गं विनिवर्तते अ. शां. ७९
वस्त्वेकं परब्रह्म नारायणः सनातनः ना.पू.ता. ५।६
वस्त्वेतमेवं प्रादेशमात्रमभिविमान-
मात्मानं वैश्वानरमुपास्ते, स
सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वे-
ष्वात्मस्वन्नमत्ति छांदो. ५।१८।१
वहन्ति ह वा एनं तन्तिसम्बद्धाः,
य एवं वेद १ ऐत. १।६।१
वह्नित्रयं तच्च जगत्त्रयं यद्गुणत्रयं
तच्च शक्तित्रयं स्यात् सि. शि. १५
वह्निर्वक्त्रं चन्द्रसूर्यौ च नेत्रे दिशः
श्रोत्रे घ्राणमाहुश्च वायुः विष्णुहृ. १४
वह्निस्त्रिकोणं रक्तं च रेफाक्षर-
समुद्भवम् यो. त. ९१
वह्निःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि त्रि. ब्रा. १।३
वह्नेर्यथा योनिगतस्य मूर्तिर्न दृश्यते
नैव च लिङ्गनाशः श्वेताश्व. १।१३
वह्नेश्च यद्वत्खलु विस्फुलिङ्गाः
सूर्यान्मयूखाश्च तथैव तस्य ।
प्राणादयो वै पुनरेव तस्माद-
भ्युच्चरन्तीहयथाक्रमेण [मैत्रा.६।२६ +६।३१
वह्नौ चानिलमारोप्य रेफाक्षर-
समुज्ज्वलम् १ यो. त. ९२
वह्नौ विवर्धमाने तु सुखमन्नादि जीर्यते वराहो. ५।४७
वंशस्तु भगवान् रुद्रः शृङ्गमिन्द्रः
सगोसुरः कृष्णो. ८
वाको वा अनुवाको वाकं वाकं
सञ्जुषमाणो देवस्य स्वे स्वगुप्तये
स्वयं जेनातिषे ज्योतिषे स्वाहा पारमा. ४।१

वाक् च वक्तव्यं च नारायणः सुबालो. ६।१
वाक्तदा प्राणं रेङ्क्ष्यथ यत्र
तूष्णीं वा भवति स्वपिति वा
तदा वाग्भवति ३ ऐत. १।६।६
वाक्पतिर्होता चित्यु. ११
वाक्पतिश्चक्षुष्पतिः, श्रोत्रपतिर्वि-
ज्ञानपतिः, एतत्ततो भवति तैत्ति. १।६।२
वाक्परस्ताच्चक्षुरारुन्धे कौ. त. २।२
वाक्पाणिपादपायूपस्थाख्यानि
कर्मेन्द्रियाणि शारीरको. १
वाक्पाणिपादपायूपस्थास्तद्वृत्तयः
(कर्मेन्द्रियाणां) पैङ्गलो. २।३
वाक् पूर्वरूपं, मन उत्तररूपं, प्राणः
संहितेति शूरवीरो माण्डूकेयः ३ऐत. १।१।२
वाक्प्राविशदशयदेव १ ऐत. १।४।६
वाक्यमप्रतिबद्धं सत्प्राक्परोक्षाव-
भासिते । करामलकवद्बोध-
मपरोक्षं प्रसूयते अध्यात्मो.४
वाक्यार्थस्य विचारेण यदाप्नोति
शरच्छतम् । एकवारजपेनैव
ऋष्यादिध्यानतश्च यत् शु. र. ११७
(अथ) वाक्श्रोत्रं चक्षुर्मनः
प्राण इत्येकेऽथ बुद्धिर्धृतिः
स्मृतिः प्रज्ञानमित्येके मैत्रा. ६।३१
वाक् सन्धिः, जिह्वा सन्धानम् तै. उ. १।३।७
वाक्संहितेति पञ्चालचण्डः,
वाचा वै वेदाः सन्धीयन्ते ३ ऐत. १।६।५
वागध्यात्मं,वक्तव्यमधिभूतं,अग्नि-
स्तत्राधिदैवतं, नाडी तेषां
निबन्धनम् सुबालो. ५।१०
वागष्टमी ब्रह्मणा संविदाना
वाग्घ्यष्टमी ब्रह्मणा संवित्ते बृह. २।२।३
वागनुष्टुबेतद्वाचमनुब्रूमः बृह. ५।१४।५
(तस्य) वागर्चिश्चक्षुरङ्गाराः
श्रोत्रं विस्फुलिङ्गास्तस्मिन्ने-
तस्मिन्नग्नौ देवा अन्नं जुह्वति बृह. ६।२।१२
वागस्मात्सर्वाणि नामान्यभि-
विसृजते, वाचा सर्वाणि
नामान्याप्नोति कौ. त. ३।

वागुदक्रामदवदन्नश्नन्पिबन्नास्तैव १ऐत. १।४।४
वागेव गीथोच्चगीथा चेति स उद्गीथः बृ. ह. १।३।२३
वागेवदेवाः,मनःपितरः,प्राणोमनुष्याः बृह. १।५।६
वागेव ब्रह्मणश्चतुर्थः पादः,
सोऽग्निना ज्योतिषा भाति च
तपति च कीर्त्या यशसा
ब्रह्मवर्चसेन छांदो. ३।१८।३
वागेवर्क् प्राणः सामोमित्येतदक्षर-
मुद्गीथस्तद्वा एतन्मिथुनं यद्वाक्
च प्राणश्चर्क् च साम च छांदो. १।१।५
वागेवर्क्, प्राणः साम, तदेत-
दस्यामृच्यध्यूढ़ं साम तस्मा-
दृच्यध्यूढं साम गीयते छांदो. १।७।१
वागेवर्ग्वेदो मनो यजुर्वेदः प्राणः
सामवेदः बृह. १।५।५
वागेव सम्राडिति होवाच–वाचा वै
सम्राड् बन्धुः प्रज्ञायते बृह. ४।१।२
वागेव ह्यनुजानाति चिन्मयो
ह्ययमोङ्कारश्चिदेव ह्यनुज्ञाता नृसिंहो. ८।६
वागेवात्रिर्वाचा ह्यन्नमद्यतेऽत्ति ह वै
नामैतद्यदत्रिरिति बृह. २।२।४
वागेवायतनमाकाशः प्रतिष्ठा
प्रज्ञेत्येनदुपासीत बृह. ४।१।२
वागेवायं लोकः, मनोऽन्तरिक्षं,
लोकः प्राणोऽसौ लोकः बृह. १।५।४
वागेवास्मा एकमङ्गमुदूढं तस्यैनाम
परस्तात्प्रतिविहिता भूतमात्रा कौ. त. ३।५
वागेवास्य ज्योतिर्भवतीति, वाचै-
वायं ज्योतिषास्ते पल्ययते... बृह. ४।३।५
वागेवेदं सर्वमनुजानाति चिन्मयो
ह्ययमोङ्कारश्चिद्धीदं सर्वं
निरात्मकमात्मसात्करोति नृसिंहो. ८।४
वागेवेदं सर्वं, न ह्यशब्दमिवेहास्ति,
चिन्मयो ह्ययमोङ्कारश्चिन्मय-
मिदं सर्वम् नृसिंहो. ८।२
वागेवैतत्सर्वं विज्ञापयति
वाचमुपास्वेति छांदो. ७।२।१
वागोजः सहौजो मयि प्राणापानौ
प्रवर्ग्या. १+ वा. सं. ३६।१

वाग्गीर्वाचो ह गिर इत्याचक्षते छांदो. १।३।६
वाग्घि बृहती, तस्या एष पतिः
(उद्गीथः) छांदो. १।२।११
वाग्घि विज्ञाता वागेनं तद्भूत्वाऽवति बृह. १।५।८
वाग्घोच्चक्राम, सा संवत्सरं प्रोष्या-
गत्योवाच कथमशकत मदृते
जीवितुमिति बृह. ६।१।८
वाग्घोता, दीक्षा पत्नी, वातोऽध्वर्युः चित्त्यु. ६।१
वाग्दण्डः कर्मदण्डश्च मनोदण्डश्च
ते त्रयः । यस्यैते नियता दण्डाः
स त्रिदण्डी महायतिः ना. प. ६।११
वाग्दण्डे मौनमातिष्ठेत्कायदण्डे
त्वभोजनम् । मानसे तु कृते
दण्ड प्राणायामो विधीयते १ सं.सो.२।९७
वाग्देवीं गायत्रीं शरणमहं प्रपद्ये गायत्रीर. १०
वाग्ध्यष्टमी ब्रह्मणा संविता...(मा.पा.) बृह. २।२।३
वाग्वा अनुष्टुप् वाचैव प्रयन्ति वा-
चो-(चैवो-) यन्ति, परमा वा
एषा छन्दसां यदनुष्टुबिति
[नृ. पू. १।१+ ग. पू. १।६
वाग्वा इदं सर्वं भूतं गायति च
त्रायते च छांदो. ३।१२।१
वाग्वा ऋग्वेदं विज्ञापयति यजुर्वेदं
सामवेदमाथर्वणं चतुर्थमिति-
हासपुराणं पञ्चमं वेदानां वेदं.. छांदो. ७।२।१
वाग्वा ओङ्कारो वागेव ह्यनुजानाति
चिन्मयो ह्ययमोङ्कारश्चिदेव
ह्यनुज्ञाता नृसिंहो. ८।६
वाग्वाओङ्कारोवागेवेदंसर्वमनुजानाति नृसिंहो. ८।४
वाग्वा ओङ्कारो वागेवेदं सर्वं,
न ह्यशब्दमिवेहास्ति नृसिंहो. ८।२
वाग्वा साम्नो भूयसी छांदो. ७।२।१
वाग्वेदिः, अधीतं बर्हिः, केतो अग्निः चित्त्यु. १।१
वाग्वै ग्रहः, स नाम्नाऽतिग्राहेण
गृहीतो वाचा हि नामान्य-
भिवदति बृह. ३।२।३
वाग्वै बृहती तस्या एष पतिस्त-
स्माद् बृहस्पतिः बृह. १।३।२०
वाग्वै ब्रह्म, तस्या एष पति-
स्तस्मादु ब्रह्मणस्पतिः बृह. १।३।२१
वाग्वै ब्रह्मेत्यवदतो हि किं स्यात् बृह. ४।१।२
वाग्वै माता, प्राणः पुत्रः ३ ऐत. १।६।६
वाग्वै यज्ञस्य होता तद्येयं वाक्
सोऽयमग्निः स होता स मुक्तिः
साऽतिमुक्तिः बृह. ३।१।३
वाग्वै रथन्तरस्य रूपं, प्राणो
बृहतः, उभाभ्यामु खलु संहिता
सन्धीयते वाचा च प्राणेन च ३ ऐत. १।६।१
वाग्वै वसिष्ठा, वसिष्ठः स्वानां भवति बृह. ६।१।२
वाग्वै सम्राट् परमं ब्रह्म, नैनं
वाग्जहाति बृह. ४।१।२
वाग्वै सामैष सा चामश्चेति
तत्साम्नः सामत्वम् बृह. १।३।२२
वाङ्कामदेवतावरोधिनी सा
मेऽमुष्मादिदमवरुन्धाम् कौ. त. २।३
वाङ्मनश्चक्षुश्श्रोत्रजिह्वाघ्राणरेतो-
बुद्ध्याकूतिसङ्कल्पा मे शुध्यन्तां
ज्योतिरहं विरजा विपाप्मा
भूयासꣳ स्वाहा महाना. १४।८
वाङ्मनःकायसङ्क्षोभं प्रयत्नेन
विवर्जयेत् । रसभाण्डमिवा-
त्मानं सुस्थिरं धारयेत्सदा अमन. २।५५
वाङ्मनोगोचरश्चाहं सर्वत्र
सुखवानहम् ते. बिं. ३।३८
वाङ्मयस्तेजोमयोऽमृतमयः पुरुषो-
ऽयमेव स योऽयमात्मा बृह. २।५।३
वाङ्मयं तप उच्यते भ. गी. १७।१५
वाङ्मया ब्रह्मभूस्तस्मात्षष्ठं वक्त्र-
समन्वितम् । सूर्यो वामश्रोत्र-
बिन्दुः संयुताष्टतृतीयकः १ देव्यु. १६
वाङ्मे मनसि प्रतिष्ठिता मनो मे
वाचि प्रतिष्ठितमाविरावीर्मएधि २ ऐत. ६।१
वाच ऋग्रस ऋचः साम रसः
साम्न उद्गीथो रसः छांदो. १।१।२
वाचमष्टापदीमहमित्यष्टौ हि
चतुरक्षराणि भवन्ति १ ऐत. ३।६।२

वाचमुद्गीथमुपासाञ्चक्रिरे ताº
हासुराः पाप्मना विविधुः छांदो. १।२।३
वाचमेवाप्येति यो वाचमेवास्तमेति सुबालो. ९।६
वाचस्पतिः सोममपात् चित्यु. ५।१
वाचस्पतिः सोमं पिबति चित्यु. २।१
वाचस्पतिः सोमं पिबतु चित्यु. १।२
वाचस्पते च्छिद्रया वाचा चित्यु. ४।१
वाचस्पते वाचो वीर्येण चित्यु. २।१
वाचस्पते विधे नामन् चित्यु. १।२
वाचस्पते हृद्विधे नामन् चित्यु. ५।१
(एवं) वाचं च नाम च मनोऽनु-
भवति स यदा मनसा मनस्यति
मन्त्रानधीयीयेत्यथाधीते छांदो. ७।३।१
वाचं तदा प्राणे जुहोति कौ. त. २।५
वाचं ते मयि जुहोम्यसौ स्वाहा कौ. त. २।४
वाचं ते मयि दध इति पुत्रः कौ. त. २।१५
वाचं धेनुमुपासीत तस्याश्चत्वारः
स्तनाः स्वाहाकारो वषट्कारो
हन्तकारः स्वधाकारः बृह. ५।८।१
वाचं मे त्वयि दधानीति पिता कौ. त. २।१५
वाचं मे दिशतु श्रीर्देवी मनो मे
दिशतु वैष्णवी लक्ष्म्यु. ३
वाचंयमोऽप्रसाहः स यदि स्त्रियं
पश्येत्समृद्धं कर्मेति विद्यात् छांदो. ५।२।८
वाचंयमोऽभिप्रव्रज्य संस्पर्शं
जिगमिषेत् कौ. त. २।४
वाचंयमोऽभिप्रव्रज्यार्थं ब्रुवीत कौ. त. २।३
वाचं वदन्तीं सर्वे प्राणा
अनुवदन्ति कौ. त. ३।२
वाचं वेदा हृदयं वै नभश्च रसा
पादौ तारका रोमकूपाः।
साङ्गोपाङ्गान्यधिदैवानि ता
विद्यादुपस्थं च तथा समुद्रम् विष्णुह्. १।५
वाचा च ह्येव स प्राणेन
चोदगायदिति बृह. १।३।२४
वाचा छन्दांसि, वाचा मित्राणि
सन्दधति वाचा सर्वाणि
भूतानि। अथो वागेवेदं
सर्वमिति ३ऐत. १।६।९

वाचामगोचरनिराकारपरब्रह्म-
स्वरूपोऽहमेव त्रि.म.ना. ८।६
वाचामगोचरानन्तदिव्यतेजो-
राश्याकारो भवति त्रि.म.ना. २।६
वाचामगोचरानन्तशुद्धबोधविशेष-
विग्रहं... चिद्रूपादित्यमण्डलं
द्वात्रिंशद्व्यूहभेदैरधिष्ठितम् त्रि.म.ना. ७।८
वाचामगोचरानन्दब्रह्मतेजोराशि-
मंडलमखण्डतेजोमंडलविशेषं
...शिवाद्वैतोपासका भजन्ते सि. सा. ६।१
वाचामतीतविषयो विषयाशा-
दशोज्झितः। परानन्दरसाक्षुब्धो
रमते स्वात्मनाऽऽत्मनि अ. पू. ५।९६
वाचारम्भणं विकारो नामधेयं
त्रीणि रूपाणीत्येव सत्यं [छांदो. ६।४।१।२,३,४
वाचारम्भणं विकारो नामधेयं
मृत्तिकेत्येव सत्यम् [छांदो.६।१।४ +परत्र. ५
वाचारम्भणं विकारो नामधेयं
लोहमित्येव सत्यम् छांदो. ६।१।५
वाचारम्भणं विकारो नामधेयं
कृष्णायसमेव सत्यम् छांदो. ६।१।६
वाचा वदति यत्किञ्चित्सङ्कल्पैः
कल्प्यते च यत्। मनसा
चिन्त्यते यद्यत्सर्वं मिथ्या
न संशयः ते. बिं. ५।४५
वाचा वै वेदाः सन्धीयन्ते ३ ऐत. १।६।५
वाचा वै सम्राट् बन्धुः प्रज्ञायते बृह. ४।१।२
(अथ) वाचा व्याहरति, तस्मा-
न्मन एव पूर्वरूपं, वागुत्तररूपम् ३ ऐत. १।१।२
वाचा सर्वाणि नामान्याप्नोति कौ. त. ३।४
वाचा ह स्मैव पूर्व उपयन्ति स
होपायनकीर्त्योवास बृह. ६।२।७
वाचा हि नामान्यभिवदति बृह. ३।२।३
वाचा होताऽध्वर्युरुद्गातान्यतराº स
यत्रोपाकृते प्रातरनुवाके पुरा
परिधानीयाया ब्रह्मा व्यववदति छांदो. ४।१६।२
वाचा ह्यन्नमद्यतेऽत्रिर्ह वै नामैत-
दत्त्रि.. (मा. पा.) बृ. ब. २।२।४

वाचा ह्यन्नमद्यतेऽस्ति ह वै नामैत-
 यदत्रिरिति सर्वस्यात्ता भवति
 सर्वमस्यान्नं भवति बृह. २।२।४
वाचिकोपांशुरुच्चैश्च (जपः) द्विविधः
 परिकीर्तितः। मानसो मनन-
 ध्यानभेदाद्द्वैविध्यमाश्रितः जा. द. २।१४
वाचि तृप्यन्त्यामग्निस्तृप्यति छांदो.५।२१।२
वाचि वै तदैन्द्रं प्राणं न्यचायन्नित्ये-
 तत्तदुक्तं भवति १ ऐत. ३।५।२
वाचि हि खल्वेष एतत्प्राणः
 प्रतिष्ठितो गीयते बृह. १।३।२७
वाचि हि प्राणं जुहुमः, प्राणे वा वाचं ३ऐत. २।६।३
वाचे स्वाहा प्रतिष्ठायै स्वाहेत्यग्नौ
 हुत्वा मन्थे सꣳस्रवमवनयति बृह. ६।३।२
वाचैव प्रयन्ति वाचो-(चैवो)द्यन्ति
 [नृ. पू. १।१+ ग. पू. १।६
वाचोऽग्निः (निरभिद्यत) २ ऐत. १।४
वाचो यस्मान्निवर्तन्ते तद्वक्तुं केन
 शक्यते ते. विं. १।२१
वाचो वाव भूयोऽस्तीति तन्मे
 भगवान् ब्रवीतु छांदो. ७।२।२
वाचो वीर्यं तपसाऽन्वविन्दन् चित्त्यु. ११।२
वाचो ह गिर इत्याचक्षते छां. उ. १।३।६
वाचो ह वाचꣳ स उ प्राणस्य
 प्राणश्चक्षुषश्चक्षुरतिमुच्य धीराः
 प्रेत्यास्माल्लोकादमृता भवन्ति केनो. १।२
वाच्यं लक्ष्यमिति द्विधाऽर्थसरणी-
 वाच्यस्य हि त्वम्पदे वाच्यं
 भौतिकमिन्द्रियादिरपि यल्लक्ष्यं
 त्वमर्थश्च सः। वाच्यं तत्पद-
 मीशताकृतमतिर्लक्ष्यं तु सच्चि-
 त्सुखानन्दब्रह्म तदर्थ एष च
 तयोरैक्यं त्वसीदं पदम् शु. र. ३।१०
वाजपेयः पशुहर्ता, अध्वर्युरिंद्रो
 देवता अहिंसा धर्मयागः परम-
 हंसोऽध्वर्युः परमात्मा देवता
 पशुपतिर्ब्रह्मोपनिषदो ब्रह्म पा. ब्र. ५
वाञ्छाक्षणे तु या तुष्टिस्तत्र
 वाञ्छैव कारणम्। तुष्टिस्त्व-
 तुष्टिपर्यन्ता तस्माद्वाञ्छां
 परित्यज अ. पू ५।३७
वातरशना ह वा ऋषयः श्रमणा
 ऊर्ध्वमन्थिनो बभूवुः सहवै. ११
वातं प्राणं मनसाऽन्वारभामहे
 प्रजापतिं यो भुवनस्य गोपाः महाना. १३।९
वातं प्राणः, द्यौः पृष्ठम् चित्त्यु. ४।१
वातं प्राणः (अप्येति)चक्षुरादित्यं,
 मनश्चन्द्रम् बृह. ३।२।१३
वातापेर्हवनः श्रुतः स्वाहा चित्त्यु. ३।१
वातोऽध्वर्युः चित्त्यु. ६।१
(तद्यथा-)वातोऽप्सु शनैर्वाति
 सुखीभवेति, एवं... संहितो. १।४
वातो वाति, प्रजा निर्मुच्यते संहितो. १।३
(तद्यथा-)वातो वाति शीघ्रं...बहु
 विभग्नं प्रभग्नंइयैतैव ते मे वैतया संहितो. १।४
वातोऽस्माद्भीतः पवते ग.शो.ता. ४।२
वादः प्रवदतामहम् भ.गी. १०।३२
वादा इति वादविदो भुवनानीति तद्विदः वैतथ्य. २४
वानप्रस्थगृहस्थाभ्यां न संसृज्येत
 कर्हिचित्। अज्ञातचर्यां
 लिप्सेत न चैनं हर्ष आविशेत् ना.प. ५।३०
वानप्रस्थशतमेकमेकेन यतिना
 तत्समं यतीनां तु शतं पूर्णमेक-
 मेकेन रुद्रजापकेन नृ.पू.उ. ९।१६
वानप्रस्था अपि चतुर्धा भवन्ति
 वैखानसा औदुम्बरा वाल-
 खिल्या यायावराः... आश्रमो. २
वामकर्णे संयमाद्वायुलोकज्ञानम् शांडि.१।७।५२
वामचक्षुषि संयमाच्छित्रलोकज्ञानम् शांडि.१।७।५२
वामदक्षिणे सिद्धिर्बुद्धिः (गणेशस्य) ग. पू.ता.२।१०
वामदेवं महाबोधदायकं पावकात्मकम् पञ्चब्र. ५
वामदेवं येऽनुसरन्ति नित्यं मृत्वा
 जनित्वा च पुनः पुनस्तत्। ते वै
 लोके क्रममुक्ता भवन्ति योगैः
 साङ्ख्यैः कर्मभिः सत्त्वयुक्तैः वराहो. ४।३५
(ॐ) वामदेवः परमेश्वरं सृष्टि-
 स्थितिलयकारणमुमासहितं
 स्वशिरसा प्रणम्येति होवाच बिल्वो. १

वामदेवात् क्षत्रिया वै विशश्च सि. शि. ९
वामदेवाय नमो ज्येष्ठाय नमः
श्रेष्ठाय नमो रुद्राय नमः... महाना. १०।५
वामनं त्वां महादेवं सर्वे देवा
उपासते । त्वत्तो जातं
जगच्छम्भोस्थितंत्वय्येवलीयते २रुद्रो. ४६
वामपादपार्ष्णिं योनिस्थाने
नियोज्य..स्वात्मानं भावयेत्।
तेनापरोक्षसिद्धिः शांडि.१।७।४३
वामपादमूलेन योनिं सम्पीड्य
दक्षिणपादं प्रसार्य...वायुं
धारयेत् । तेन सर्वक्लेशहानिः शांडि. १।७।४३
वामबाहुर्दक्षिणकट्योरन्तश्चरति
हंसः परमात्मा ब्रह्मगुह्यप्रकारो
नान्यत्र विदितः पा. ब्र. ४
वामाङ्गेन समभ्यस्य दक्षाङ्गेन
ततोऽभ्यसेत् । प्रसारितस्तु यः
पादस्तमूरूपरि नामयेत् । अय-
मेव महाबन्धः.. १ यो.त. ११४
वामाभ्यां शत्रुजिह्वावज्रे दधानां...
देवीमाहूय ध्यायेत् पीताम्बरो. १
वामांसदक्षकट्यंतं ब्रह्मसूत्रं तु सव्यतः परब्र. १६
वामांसादिदक्षिणकट्यन्तं विभा-
व्याद्यन्तग्रहसम्मेलनमेकं ज्ञात्वा
मूलमेकंसत्यंमृण्मयंविज्ञातं स्यात् परब्र. ४
वामोरुमूले दक्षाङ्घ्रिं जान्वोर्वेष्टित-
पाणिना । वामेन वामाङ्गुष्ठं तु
गृहीतं मत्स्यपीठकम् । योनिं
वामेन सम्पीड्य मेढ्रादुपरि
दक्षिणम् ॥ ऋजुकायः समा-
सीनः सिद्धासनमुदीरितम् त्रि. ब्रा. २।४९
वायवो यत्र लीयन्ते, मनो
यत्र विलीयते यो. शि. ३।१२
वायव्यस्तु द्विमात्रकः अ. ना. ३१
वायावभ्यसिते वह्निः प्रत्यहं वर्धते
तनौ । वह्नौ विवर्धमाने तु सुख-
मन्नादि जीर्यते वराहो. ५।४७
वायुतो हृदयं प्राजापत्यात्क्रमात् गर्भो. २

वायुना गतिमावृत्य निभृतं कर्ण-
मुद्रया । पुटद्वयं समाक्रम्य
वायुः स्फुरति सत्वरम् १ यो.त. ११६
वायुना ज्वलितो वह्निः ...
मनिशं दहेत् ध्या. शि. ।८५
वायुना पालितो वह्निरपानेन
शनैर्देहमध्ये ज्वलति शांडि. १।४।८
वायुना वै गौतम सूत्रेणायं च लोकः
परश्च लोकः सर्वाणि च भूतानि
सन्दृब्धानि भवन्ति बृह. ३।७।२
वायुना शक्तिचालेन प्रेरितं खे यथा
रजः। रविणैकत्वमायाति (याति
बिन्दुः सदैकत्वं) भवेद्दिव्यंवपुस्तदा
[ध्या. बिं. ९०+ यो. चू. ६३
वायुना सह चित्तं च प्रविशेच्च महापथम् १ यो.त. ८२
वायुना सह जीवोर्ध्वज्ञानान्मोक्ष-
मवाप्नुयात् यो. शि. ६।१६
वायुना हि गौतम सूत्रेण सन्दृब्धानि
भवन्ति बृह. ३।७।२
वायुपुत्र महाबाहो किं तत्त्वं ब्रह्म-
वादिनाम् रा. र. १।२
वायुपुत्रं विघ्नेशं वाणीं दुर्गां क्षेत्र-
पालकं सूर्यं चंद्रं नारायणं
नारसिंहं...सीतां लक्ष्मणं...
प्रणवमेतानि रामस्यांगानि रा. र. १।७
वायुभक्षोऽम्बुभक्षो वा विहिता
नोत्तरैः फलैः । स्वशरीरे
समारोपः पृथिव्यां नाश्रुपातकाः २ सन्यासो.५
वायुभक्षोऽम्बुभक्षो वा विहितैः
कन्दमूलकैः। स्वशरीरे समा-
प्याथपृथिव्यां नाश्रु पातयेत् कुंडिको. ४
(अथ) वायुमब्रुवन् वाय-
वेतद्विजानीहीति केनो. ३।७
वायुमय आकाशमयः (आत्मा) बृह. ४।४।५
वायुमाकाशे चाकाशमहङ्कारे पैङ्गलो. ३।२
वायुमेव भगवो राजन्निति होवा-
चैष वै पृथग्वर्त्मात्मा वैश्वानरो
यंत्वमात्मानमुपास्से तस्मात्त्वां
पृथग्बलय आयन्ति छांदो.५।१४।१

वायुमेवाप्येति यो वायुमेवास्तमेति सुबालो. ९।५
वायुरग्निरापः पृथिवी वाङ्मनश्चक्षुः
श्रोत्रं च ते प्रकाश्याभिवदन्ति.. प्रश्नो. २।२
वायुरनिलममृतमथेदं भस्मान्तꣳ
शरीरम [ईशा. १७+ बृह. ५।१५।१
वायुरस्मै पुण्यं गन्धमावहति १ ऐत. १।७।३
वायुराकाशे विलीयते सुबालो. २।२
वायुरात्माऽमावास्याः स्विष्टकृत् सह्वै. १८
वायुरिति भस्म, जलमिति भस्म.. १ रुद्रोप. २
वायुरेव पवमानो दिशोहरितं प्रविष्टः १ ऐत. १।१।३
वायुरेव सविताऽऽकाशः सावित्री
स यत्र वायुस्तदाकाशो यत्र वा
आकाशस्तद्वायुस्ते द्वे योनि-
स्तदेकं मिथुनम् सावित्र्यु. ३
वायुर्गन्धानिवाशयात् भ. गी. १५।८
वायुर्दिशां यथा गर्भ एवं गर्भं
दधामि ते बृ. उ. ६।४।२२
वायुर्नावमिवाम्भसि भ. गी. २।६७
वायुर्भूत्वा धूमो भवति धूमो
भूत्वाऽभ्रं भवति छांदो. ५।१०।५
वायुर्यत्राभियुज्यते, सोमो यत्रा-
तिरिच्यते, तत्र सञ्जायते मनः श्वेताश्व. २।६
वायुर्यथैको भुवनं प्रविष्टो जन्ये-
जन्ये पञ्चरूपो बभूव गो. पू. २।३
वायुर्यथैको भुवनं प्रविष्टो रूपंरूपं
प्रतिरूपो बभूव। एकस्तथा
सर्वभूतान्तरात्मा रूपं रूपं
प्रतिरूपो बहिश्च कठो. ५।१०
वायुर्यमोऽग्निर्वरुणः भ.गी. ११।३९
वायुर्वा अहमस्मीत्यब्रवीन्मातरिश्वा
वा अहमस्मीति केनो. ३।८
वायुर्वाऽन्नमाकाशोऽन्नादः सुबालो. १४।१
वायुर्वाव संवर्गो यदा वा
महाप्रलये... (मा.पा.) छांदो. ४।३।१
वायुर्वाव संवर्गो यदा वा अग्नि-
रुद्वायति वायुमेवाप्येति छांदो. ४।३।१
वायुर्वै गौतम तत्सूत्रं, वायुना वै
गौतम सूत्रेणायं च लोकः
परश्च लोकः सर्वाणि च
भूतानि सन्दृब्धानि भवन्ति बृह. ३।७।२
वायुर्व्यूहने आकाशमवकाश-
प्रदाने (शरीरस्य) गर्भो. १
वायुर्हा इकारः, चन्द्रमा अथकारः छां.उ. १।१३।१
वायुर्हायिकारः (मा. पा.) छां. उ. १।१३।१
वायुर्ह्येवैतान्सर्वान्संवृङ्क्त इत्यधिदैवतम् छांउ. ४।३।२
वायुवत्स्फुरितं स्वस्मिंस्तत्रा-
हङ्कृतिरुत्थिता। पञ्चात्मक-
मभूत्पिण्डं धातुबद्धं गुणात्मकम् यो. शि. १।८
वायुवद्व्योमगो भवेत् १ यो. त. ९६
वायुवेग मनोवेग श्रीराम तारक
परब्रह्म विश्वरूपरूपदर्शन
लक्ष्मणप्राणप्रतिष्ठानन्दकर
स्थलजलादिमर्मभेदिन् सर्व-
शत्रून् छिन्धि छिन्धि लांगूलो. ३
वायुश्च वायुमात्रा च प्रश्नो. ४।८
वायुश्चाकाशश्चेत्यधिदैवतम् ३ ऐत. १।१।१
वायुस्ताꣳ अग्रे प्रमुमोक्तु देवः चित्त्यु. ११।१३
वायुं जित्वा विविधकरणैः क्लेश-
मूलैः कथञ्चित्कृत्वा यत्नं
निजतनुगतान् शोष्य नाडि-
प्रवाहान्। अश्रद्धेयां परपुर-
गतिं साधयित्वाऽपि नूनं
विज्ञानैकव्यसनसुखिनो
नास्ति मोक्षस्य सिद्धिः अमन. २।३०
वायुं निरुद्ध्य मेधावी जीवन्मुक्तो
भवत्ययम् १ यो.त. १०६
वायुं बिन्दुं तथा चक्रं चित्तं चैव
समभ्यसेत्। समाधिमेकेन
सममृतं यान्ति योगिनः योगकुं. ३।१३
वायुं भित्त्वाऽऽकाशं भिनत्ति सुबालो. ११।२
वायुः पञ्चहोता चित्त्यु. ७।२
वायुः परिचितो यत्नादग्निना
सह कुण्डलीम्। भावयित्वा
सुषुम्नायां प्रविशेदनिरोधतः १ यो. त. ८१
वायुः पश्चिमतो वेधं कुर्वन्नापूर्य
सुस्थिरम्। यत्र तिष्ठति सा
प्रोक्ता घटाख्या भूमिका बुधैः वराहो. ५।७३,७४

वायुः प्राणस्तथाऽऽकाशस्त्रिविधो जीवसंज्ञकः ब्र. वि. १४
वायुः प्राणो भूत्वा नासिके प्राविशत् २ ऐत. २।४
वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा मुंड. २।१।४
वायुः षट्कोणकं कृष्णं यकाराक्षरभासुरम् । मारुतं मरुतां स्थाने...धारयेत्तत्र सर्वज्ञमीश्वरं विश्वतोमुखम् १ यो. त. ९५
वायुः-समानोदानव्यानापानप्राणाः त्रि. ब्रा. १।३
वायुः सर्वत्रगो महान् भ. गी. ९।६
वायूनां गतिमावृत्त्य धृत्वा पूरककुम्भकौ ।...पुटद्वयं समाकृष्य वायुः स्फुरति सत्वरम् । सोमसूर्याग्निसम्बधात्... वराहो. ५।६१
वायोरग्निः (सम्भूतः) तैत्ति.२।१।१
[+यो. चू. ७२+सुबालो.१।१ पैङ्गलो. १।३
वायोरग्निरभवत् गायत्रीर. १
वायोरग्निस्तथा चाग्नेराप अद्भ्यो वसुन्धरा कठरु. १७
वायोरन्तरात्मा वहति समस्तः सपुण्यदेवेति स सूरिमुक्तः पारमा. १०।२
वायोरात्मानं कवयो निचिक्युः चित्यु. ११।४
वायोरायतनं चात्र नाभिदेशे समाश्रयेत् क्षुरिको. ७
वायोरिव सुदुष्करम् भ. गी. ६।२४
वायोरोङ्कारः [अ.शिरः. ३।१५+ बटुको. २७
वायोर्ज्योतिः, ज्योतिष आपः २सन्न्यासो. १६
वायोर्बिम्बं तु षट्कोणं सङ्कर्षोऽत्राधिदेवता यो. शि. ५।१४
वायौ तृप्यत्याकाशस्तृप्यति छांदो. ५।२३।२
वायौ मनोलयं कुर्यादाकाशगमनं भवेत् यो. शि. ९।५१
वाराणसीमहाप्राज्ञभ्रुवोर्घ्राणस्यमध्यमे जा. द.४।४८
वाराणस्यां मृतो वाऽपि इदं वा ब्रह्म यः पठेत् । एकेन जन्मना जन्तुर्मोक्षं च प्राप्नुयादिति प्रा. हो. ४।४
वाराही पितृरूपा कुरुकुल्ला बलिदेवता माता भावनो. २
वारिजलोचनसहाये वारिगतिं वारयासुकरनिकरैः । पीडितमत्र भ्रान्तं मामनिशं पालय त्वमनवद्ये वनदु. १६९
वारिवत्स्फुरितं तस्मिंस्तत्राहङ्कृतिरुत्थिता । पश्चात्मकमभूत्पिण्डं धातुबद्धं गुणात्मकम् १ यो. त. १०
वारुणं त्वेव वर्जयेत् छांदो. २।२२।१
वारुणे वायुमारोप्य वकारेण समन्वितम् । स्मरन्नारायणं देवं चतुर्बाहुं किरीटिनम् ।...धारयेत्पञ्चघटिकाः सर्वपापैःप्रमुच्यते १ यो. त. ८८
(तत्र) वार्ताकवृत्तयः कृषिगोरक्षवाणिज्यमगोर्हितमुपयुञ्जानाः शतसंवत्सराभिर्यजन्त आत्मानं प्रार्थयन्ते आश्रमो. २
वालाग्रमात्रं हृदयस्य मध्ये विश्वं देवं जातरूपं वरेण्यम् । तमात्मस्थं ये तु पश्यन्ति धीरास्तेषां शान्तिर्भवति नेतरेषाम् अ.शिरः.३।११
वालाग्रमात्रं हृदये प्रतिष्ठं जीवाभासं मन्यमानैश्च मूढैः । न त्वेष जीवो न शिवश्चादिकर्ता यस्मात्परं नापरमस्ति किञ्चित् २ देव्यु. ३४
वैणवं दण्डं कौपीनं परिग्रहेत्	आरुणि. ३
वैतथ्यं सर्वभावानां स्वप्न आहुर्मनीषिणः	वैतथ्य. १
वैदिकेषु च सर्वेषु श्रद्धा या सा मतिर्भवेत्	जा. द. २।१०
वैद्युतः सन्धानम्	तै. उ. १।३।४
वैद्युदादिमयं तेजो मधुरादिमयो रसः । तेजोरसविभेदैस्तु वृत्तमेतच्चराचरम्	बृ. जा. २।४
वैनतेयश्च पक्षिणाम्	भ. गी. १०।३०
वैयाघ्रपद्य कं त्वमात्मानमुपास्से	छांदो. ५।१४।१
वैरम्भमेवाप्येति यो वैरम्भमेवास्तमेति	सुबालो. ९।६
वैराग्यजनकं श्रद्धाकलत्रं ज्ञाननन्दनम् (न त्यजेत्)	मैत्रे. २।२३
वैराग्यतैलसम्पूर्णे भक्तिवर्तिसमन्विते । प्रबोधपूर्णपात्रे तु ज्ञप्तिदीपं विलोकयेत्	द. मू. १७
वैराग्यमरणिं कृत्वा ज्ञानं कृत्वा तु चित्रगुम् । गाढतामिस्रसंशान्त्यै गूढमर्थं निवेदयेत्	द. मू. १८
वैराग्यसन्न्यासी ज्ञानसन्न्यासी ज्ञानवैराग्यसन्न्यासी कर्मसन्न्यासीति चातुर्विध्यमुपागतः	१ सं.सो. २।१३
वैराग्यसन्न्यासो ज्ञानसन्न्यासो ज्ञानवैराग्यसन्न्यासः कर्मसन्न्यासश्चेतिचातुर्विध्यमुपागतः	ना. प. ५।२
वैराग्यस्य फलं बोधो बोधस्योपरतिः फलम् । स्वानन्दानुभवाच्छान्तिरेषैवोपरतेः फलम्	अध्यात्मो. २८
वैराग्यं चन्दनं स्मृतम्	शिवो. १।२६
वैराग्यं समुपाश्रितः	भ.गी. १८।५२
वैराग्यात्पूर्णतामेति मनो नाशवशानुगम् । आशया रक्ततामेति शरदीव सरोऽमलम्	महो. ६।७५
वैराग्याद्बुद्धिविज्ञानाविर्भावो भवति	त्रि.म.ना. ५।४
वैराग्येण च गृह्यते	भ. गी. ६।३५
वैराग्येणाथ शास्त्रेण महत्त्वादिगुणैरपि । यत्सङ्कल्पहरार्थं तत्स्वयमेवोन्नयन्मनः	महो. ६।७४
वैराजः शरत्समानो वरुणः साध्या उत्तरत उद्यन्ति तपन्ति वर्षन्ति	मैत्रा. ७।४
वैराजात्मोपासनया सञ्जातज्ञानवह्निना । दग्ध्वा कर्मत्रयं योगी यत्पदं याति तद्भजे	ना. बिं. शीर्षकं
वैरूपवैराजे शाक्वररैवते	कौ. त. १।५
वैवस्वतो नो अभयं कृणोतु	महाना. १३।७
वैश्यकर्म स्वभावजम्	भ.गी. १८।४४
वैशारद्यं तु वै नास्ति भेदे विचरतां सदा	अलातशां. ९४
वैश्वानराय प्रतिवेदयाम इत्युपतिष्ठेत, यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मोक्ष्यध्वे	सहवै. ११
वैश्वानराय प्रतिवेदयामो यदीनृणꣳ सङ्गरो देवतासु	सहवै. ९
वैश्वानराय रथम्	चित्यु. १०।४
वैश्वानराय विद्महे लालीलाय धीमहि । तन्नो अग्निः प्रचोदयात् [महाना. ३।११+	वनदु. १३९
वैश्वानरःकालमृत्यूजिह्वात्रयमिदंस्मृतम्	गुह्यका. २२
वैश्वानरः पवयान्नः पवित्रैः	सहवै. ९
वैश्वानरः प्रत्नथा नाकमारुहत्	चित्यु. १०।४
वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान् । तस्यैताꣳ शान्तिं कुर्वन्ति हर वैवस्वतोदकम्	कठो. १।७
वैश्वानरीं निर्वपेत्	कठश्रु. ३
वैश्वानरेष्टिं निर्वपेत्सर्वस्वं दद्यात्	१ सं.सो. १।२
वैश्वानरोऽप्यन्यत्राप्युक्तं, अयमग्निर्वैश्वानरः...	मैत्रा. २।८

वैश्वानरो मे दब्धस्तनूपा अव-
बाधतां दुरितानि विश्वा सहवै. ८
वैश्वानरोवासुदेवोविश्वतश्चक्षुरस्म्यहम् ब्र. वि. १०३
वैष्णवकलायुक्तां मातृकायुक्तां
वैष्णवीं न्यसेत् षोढोप. २
वैष्णवं धाम दिव्यगणोपेतं विद्रुम-
वेदिकामणिमुक्तागणाञ्चितं लक्ष्म्यु. १
वैष्णवं पञ्चव्याहृतिमयं मन्त्रं
कृष्णावभासकं कैवल्यस्य
सृत्यै सततमावर्तयेत् गो. पू. ३।१२
वैष्णवी ब्रह्मनाडी च निर्वाण-
प्राप्तिपद्धतिः त्रि. ब्रा. २।६९
वैष्णवीं विष्णुवल्लभां मृत्युजन्म-
निबर्हणीं...प्राणतर्पणादन्तर्मल-
नाशिनीं (तुलसीं) य एवं वेद
स वैष्णवो भवति तुलस्यु. २
वैष्णवो धर्महीनोऽपि याति विष्णोः
परं पदम् भवसं. ५।२३
व्यक्तमध्यानि भारत भ. गी. २।२८
व्यक्तमव्यक्तं वा विधृतं विष्णुलिङ्गं
त्यजन्न शुद्ध्येदखिलैरात्मभासा शाट्याय. २६
व्यक्तं वै विश्वं चराचरात्मकम् अव्यक्तो. ४
व्यक्तं सर्वमुमारूपमव्यक्तंतुमहेश्वरम् रुद्रहृ. १०
व्यक्ताव्यक्तगिरः सर्वे वेदाद्या
व्याहरन्ति याम् । सर्वकामदुघा
धेनुः सा मां पातु सरस्वती सरस्व. १९
व्यक्ताव्यक्तं भरते विश्वमीशः श्वेताश्व. १।८
व्यक्ताव्यक्तो ब्रह्मात्रह्माऽहं अ. शिरः. १
व्यञ्जनं निष्फलं ब्रह्म प्राणो
मायेति च स्वरः रामर. ५।५
व्यञ्जनैरेव रात्रीराप्नुवन्ति,
स्वरैरहानि १ ऐत. २।४।३
व्यञ्जनैः स्वरसंयोगं विद्धि
तत्प्राणयोजनम् रामर. ५।६
व्यतिरिक्तंजडंसर्वंस्वप्नवद्विनश्यति स्कन्दो. ३
व्यतिषिक्ता वा इमे लोकास्तस्मा-
द्व्यतिषिक्तान्यङ्गानि भवन्ति नृ. पू. २।२

व्यपगतकलनाकलङ्कशुद्धः स्वयम-
मलात्मनि पावने पदेऽसौ ।
सलिलकण इवाम्बुधौ महात्मा
विगलितवासनमेकतां जगाम महो. २।७७
व्यपेतभीः सुमनाः पुनस्त्वं भ.गी. ११।४९
व्यवधानवशादेव 'हंसः सोऽहं'
इति मन्त्रेणोच्छ्वासनिश्वास-
व्यपदेशेनानुसन्धानं करोति ना. प. ६।७
व्यवसायात्मिका बुद्धिः [भ.गी. २।४१+२।४४
व्यवहारमिदं सर्वं मा करोतु
करोतु वा अ. पू २।१०
व्याकरणोऽस्याः प्रथमःशीर्षो भवति गायत्री. ३
व्याकुलितमनसोऽन्धाः खञ्जाः
कुब्जा वामना भवन्ति गर्भो. ३
व्याख्याने तत्समाप्तौ च सम्प्रश्ने
स्नानभोजने । भुक्त्वा च
शयनेस्वप्नेनमस्कुर्यात्सदा गुरुम् शिवो. ७।७
व्याघ्रबुद्ध्या विनिर्मुक्तो बाणः
पश्चात्तु गोमतौ । न तिष्ठति
भिनत्त्येव लक्ष्यं वेगेन निर्भरम् अध्यात्मो. ५४
व्याघ्रचर्मासने स्थित्वा स्वस्तिका-
द्यासनक्रमात् ।।...मातृका-
मालया मन्त्री मनसैव मनुं जपेत् रामर. ४।५
व्याघ्रमुखसर्ववृश्चिकाग्निज्वालाविषं
निर्गमय निर्गमय... लाङ्गूलो. ८
व्याघ्रो वा शरभो वाऽपि गजो
गवय एव वा । सिंहो वा
योगिना तेन म्रियन्ते
हस्तताडिताः १यो.त.५९।६०
व्याचक्षतां ते शास्त्राणि वेदान-
ध्यापयन्तु वा । येऽत्राधिका-
रिणो मे तु नाधिकारो-
ऽक्रियत्वतः १ अवधू. १३
व्याधिरग्निर्जलं शस्त्रं बुभुक्षाश्चा-
पदो विषम । ज्वरश्च मरणं
जन्तोरुच्चाच पतनं तथा ॥
निर्माणे यस्य यद्दृष्टं तेन
गच्छन्ति हेतुना भवसं. १।१३

व्रजस्त्रीकृष्णसम्भूतः श्रुतिभ्यो ज्ञानसङ्गतः गोपालो. २।१८
व्रतमेतच्छाम्भवं सर्वेषु (देवेषु) वेदेषु वेदवादिभिरुक्तं भवति [का. रुद्रो. ३+ जाबाल्यु. ७
व्रतयज्ञतपोदानहोमस्वाध्याय- वर्जितम् । सत्यशौचपरिभ्रष्टं सन्न्यासं नैव कारयेत् १ सं. सो. २।५
व्रतं नाम वेदोक्तविधिनिषेधा- नुष्ठाननैयत्यम् शांडि. २।१
व्रतान्न प्रमदितव्यम् भस्मजा. २।८
व्रात्यस्त्वं प्राणैकऋषिरत्ता विश्वस्य सत्पतिः प्रश्नो. २।११
व्रात्यस्यापि गृहे भिक्षेच्छ्रद्धाभक्ति- पुरस्कृते १सं.सो. २।६४
व्रीहियवास्तिलमाषा अणुप्रियङ्गवो गोधूमाश्च मसूराश्च खल्वाश्च खलकुलाश्च तान्पिष्टान्दधनि मधुनिघृतउपषिञ्चत्याज्यस्य जुहोति बृह. ६।३।१३
व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाका- द्वा श्यामाकतण्डुलाद्वा एष म आत्मान्तर्हृदये ज्यायान् पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः छांदो. ३।१४।३

श

(भगवन्) शकटमिवाचेतनमिदं शरीरं कस्यैष खल्वीदृशोमहि- मातीन्द्रियभूतस्य येनैतद्विधमिदं चेतनवत्प्रतिष्ठापितम् मैत्रा. २।३
शफाः खुरा इत्यन्येषां पशूनां तद्रूध्वमुदसर्पत् । ता ऊरू अभवताम् १ऐत. १।४।१
शकुनवन्तं चेन्मन्येत प्राणवंशं समर्था ३... ३ ऐत. १।४।१
शक्तिद्वयं हि मायाया विक्षेपा- वृत्तिरूपकम् सरस्व. ४१
शक्तिः कुण्डलिनी नाम बिसतन्तु- निभा शुभा योगकुं. १।८२
शक्तिमध्ये मनः कृत्वा शक्ति मानसमध्यगाम् । मनसा मन आलोक्य शाण्डिल्य त्वं सुखी भव शांडि. १।७।१८
शक्तियुक्तो भवेत् गुह्यषोढा. १
शक्तिसेना कल्पना च ब्रह्मण्येवं हि पञ्चधा रा. पू. १।१०
शक्त्यूर्ध्वं शक्तिमिति मानवी विद्या त्रि. ता. १।१६
शक्य एवंविधो द्रष्टुं भ. गी. ११।५३
शक्नोतीहैव यः सोढुं भ. गी. ५।२३
शक्योऽवाप्तुमुपायतः भ. गी. ६।३६
शक्रश्च नारायणः [त्रि.म.ना.२।८+ नारा. २
शक्रः प्रविद्वान् प्रदिशश्चतस्रः [महाना. ३+ चित्यु. १२।७
शक्रेण हैमं यक्षराजेन विश्वेदेवै रौप्यं वसुभिः कांस्यकं च । यद्दारु- ·कूटं वायुना पार्थिवं तदश्वि- भ्यामासीत्स्फाटिकं पाशिनाथ सि. शि. २२
शङ्करो भगवानाद्यो ररक्ष सकलाः प्रजाः शरभो. १६
शङ्कुना सर्वाणिपर्णानि संतृण्णा- न्येवमोङ्कारेण सर्वावाक्सन्तृ- ण्णोङ्कार एवेद॰ सर्वम् छांदो. २।२३।३
शङ्खचक्रगदाखड्गधारिणं वन- मालिनम् ।...कर्मणा मनसा वाचा संस्मरेत्प्रजपेत्सुधीः ना.पू.ता. ४।१३
शङ्खचक्रगदापाणे द्वारकानिलया- च्युत । गोविन्द पुण्डरीकाक्ष रक्ष मां शरणागतम् [वासुदे.३ गोपीचं. ३
शङ्खचक्रमहामुद्रापुस्तकाढ्यं चतुर्भुजम् । सम्पूर्णचन्द्रसङ्काशं हयग्रीवमुपास्महे हयग्री. ४
शङ्खचक्रोर्ध्वपुण्ड्रादिधारणं स्मरणं हरेः । तदीयाराधनं चैव भक्ति· र्बहुविधा स्मृता सुदर्श. ८

शङ्खतोयेन मूलेन भस्मना मिश्रणं भवेत्। योजितं चन्दनेनैव वारिणा भस्मसंयुतम्। चन्दनेन समालिम्पेज्ज्ञानदं चूर्णमेव तत् बृ. जा. ४।९

शङ्खदुन्दुभिनादं च न शृणोति कदाचन (मृतवत्तिष्ठते योगी स मुक्तो नात्र संशयः) ना. बिं. ५२

शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः [बृह.२।४।८+ ४।५।५

शङ्खं चक्रं च संसिद्धिं बिन्दुं च सर्वमूर्धनि कृष्णो. २१

शङ्खं दध्मौ प्रतापवान् भ. गी. १।१२

शङ्खान्दध्मुः पृथक्पृथक् भ. गी. १।१८

शङ्खिनी चैव गान्धारी तदनन्तरयोः स्थिते। उत्तरे तु सुषुम्नाया इडाख्या निवसत्यसौ वराहो. ५।२६

शङ्खिनी नाम या नाडी सव्यकर्णान्तमिष्यते। गान्धारा सव्यनेत्रान्ता प्रोक्ता वेदान्तवेदिभिः जा. द. ४।२२

शङ्खिन्याश्चन्द्रमास्तद्वत्पयस्विन्याः प्रजापतिः जा. द. ४।३८

शठे शठ इव स्थितः अ. पू. २।२९

शठो नैष्कृतिकोऽलसः भ.गी. १८।२८

शतकृत्वः प्रयुक्ताशतपर्वणावज्रेण सम्मिता सर्वाँ॰ ल्लोकानभिजयति सन्ध्यो. २

शतरुद्रियेणेत्येतान्येव ह वा अमृतस्य नामानि जाबालो. ३

शतरुद्रेण मन्त्रेण भस्मोद्धूलितविग्रहाः। निर्धूतरजसः सर्वे तत्क्षणाच्च वयं मुने बृ. जा. ६।६

शतशो गोपभार्या वेदऋचः सामर. ३२

शतशोऽथ सहस्रशः भ. गी. ११।५

शतशोऽपि जलैर्धौतं सुराभाण्डमिवाशुचि (चित्तमन्तर्गतं दुष्टं तीर्थस्नानैर्न शुद्धयति) जा. द. ४।५४

शतं कुलानां प्रथमं बभूव तथा पराणां त्रिशतं समग्रम्। एते भवन्ति सुकृतस्य लोके येषां कुले सन्न्यसतीह विद्वान् शाट्याय. ३०

शतंचदशचैकश्च सहस्राणिचविंशतिः छांदो. ७।२६।२

शतं च नव शाखासु यजुषामेव जन्मनाम्। साम्नः सहस्रशाखाः स्युः पञ्चशाखा अथर्वणः. सीतो. १६

शतं च दश चैकं च सहस्राणि च...(मा.पा.) छां.उ. ७।२६।२

शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति कठो. ६।१६
[छां. उ. ८।६।६+ यो. शि. ६।४

शतं नियुतः परिवेद विश्वा विश्ववारः चित्यु. ११।३

शतं मा पुर आयसीररक्षन्नधः श्येनो जवसा निरदीयमिति गर्भ एवैतच्छयानो वामदेव एवमुवाच २ ऐत. ५।५

शतं मालाहस्ताः शतमाञ्जनहस्ताः शतं चूर्णहस्ताः शतं वासोहस्ताः शतं कणाहस्तास्तं ब्रह्मालङ्कारेणालङ्कुर्वन्ति कौ. त. १।४

शतं विज्ञानवतामेको बलवानाकम्पयते स यदा बलीभवत्ययोत्थाता भवति छांदो. ७।८।१

शतं शरद आयुषो जीव पुत्र कौ. त. २।११

शत॰ शता अस्य युक्ता हरीणाम् चित्यु. ११।७

शत॰ शुक्राणि यत्रैकं भवन्ति,
सर्वे वेदा यत्रैकं भवन्ति,
सर्वे होतारो यत्रैकं भवन्ति,
स मानसीन आत्मा जनानाम् चित्यु. ११।१

शत॰ सहस्राणि प्रयुतानि नाव्यानाम् चित्यु. ११।१०

शताक्षरी परमा विद्या त्रयीमयी साम्राज्ञी त्रिपुरा परमेश्वरी त्रि. ता. १।४

शतायुषः पुत्रपौत्रान्वृणीष्व बहून् पशून्हस्तिहिरण्यमश्वान्। भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदो यावदिच्छसि कठो. १।२३

शतारं शतपत्राढ्यं विकीर्णाम्बुज-
कर्णिकम् । तत्रार्कचन्द्रवह्नी-
नामुपर्युपरि चिन्तयेत् ध्या. बिं. ३४
शताह्वशतशरः शतशक्रऋजी-
षिणाम् । शतं ब्रह्म तपस्विनां
कूपोऽरण्यस्य तिष्ठति इतिहा. १९
शतैर्महाप्रस्थैरखण्डैस्तण्डुलैरभिषिच्य
चंद्रलोककामश्चंद्रलोकमवाप्नोति भस्मजा. २।१२
शत्रून्निहत्य गुरुषट्कगणान्निपाता-
द्गन्धद्विपो भवति केवलमद्वितीयः वराहो. २।६५
शनिराहुकेतूरगरक्षोयक्षनरविहग-
शरभेभादयोऽधस्तादुद्यन्ति मैत्रा. ७।६
शनैरेवं प्रकर्तव्यमभ्यासं युगपन्न
हि । युगपद्वर्तते यस्य शरीरं
विलयं व्रजेत् योगकुं. २।३९
शनैः पिङ्गलया तत्र द्वात्रिंशन्मात्रया
पुनः । प्राणायामो भवेदेवं
ततश्चैवं समभ्यसेत् जा. द. ६।६
शनैः शनैरुपरमेत् भ. गी. ६।२५
शनैः शनैर्यदा प्राणस्तुन्दसन्धि
निगच्छति । तुन्ददोषं विनिर्धूय
कर्तव्यं सततं शनैः योगकुं. १।५०
शनैः समस्तमाकृष्य हृत्सरोरुह-
कोटरे । प्राणापानौ च बद्ध्वा
तु प्रणवेन समुच्चरेत् ध्या. बिं. १००
शनैः सुमथनं कुर्याद्भ्रूमध्येन्यस्य
चक्षुषी । षण्मासं मथनावस्था
भावेनैव प्रजायते योगकुं. २।४६
शबलाच्छ्यामं प्रपद्ये छांदो. ८।१३।१
शब्द एक आकाशस्य (गुणः) शारीरको. ४
शब्दकाललयेन दिवारात्र्यतीतो
भूत्वा सर्वपरिपूर्णज्ञानेनोन्म-
न्यवस्थावशेन ब्रह्मैक्यं भवति मं. ब्रा. २।४
शब्दमायावृतो यावत्तावत्तिष्ठति
पुष्करे(ले)। भिन्ने तमसि चैकत्व-
मे(क एवा-)कमेवानुपश्यति ब्र. बिं. १५
शब्दब्रह्मणि निष्णातः परं ब्रह्मा-
धिगच्छति ब्र. बिं. १७
[मैत्रा. ६।२२+ त्रि. ता. ५।१७

शब्दब्रह्मातिवर्तते भ. गी. ६।४४
शब्दब्रह्माहम् । क्रियायोगोऽहम् ।
ब्रह्माहम् । विष्णुरहम् । सौरो-
ऽहम् । ब्राह्मोऽहम् अद्वै. भा. १
शब्दवानाकाशः शब्दाकाशाभ्यां
भिन्नः गोपालो. १।४
शब्दस्पर्शमया येऽर्था अनर्था
इव ते स्थिताः । तेषां सक्तस्तु
भूतात्मा न स्मरेच्च परं पदम् मैत्रे. १।५
शब्दस्पर्शरूपगन्धवर्जितो
निर्विकल्पो निराकाङ्क्षः सर्व-
व्यापी सोऽचिन्त्यो निर्वर्ण्यश्च
पुनात्यशुद्धान्यपूतानि १ आत्मो. ३
शब्दस्पर्शरूपरसगन्धा अग्निकार्य-
ज्ञानेन्द्रियविषया अत्राश्रिताः त्रि. ब्रा. १।४
शब्दस्पर्शरूपरसगन्धा मे शुध्यन्तां
ज्योतिरहं विरजा विपाप्मा
भूयासꣳ स्वाहा महाना. १४।१३
शब्दस्पर्श-रूप-रसाश्चापां गुणाः शारीरको. ४
शब्दस्पर्शरूपरसगन्धास्तद्विषयाः पैङ्गलो. २।४
शब्दस्पर्शरूपरसगन्धाः, पञ्च-
तन्मात्राः, पञ्चपुष्पबाणाः,
मन इक्षुधनुः भावनो. ६
शब्द-स्पर्श-रूप-रस-गन्धाः
पृथिवीगुणाः शारीरको. ४
शब्दस्पर्शरूपरसगन्धाः सुख-
दुःखहेतवः सर्वसारो. ५
शब्द-स्पर्श-रूपाण्यग्निगुणाः शारीरको. ४
शब्दस्पर्शस्वरूपाभ्यां सङ्घर्ष-
जन्यतेऽनलः महो. ५।१४९
शब्दस्पर्शादयो येऽर्थाअनर्था इव
ते स्थिताः । येष्वासक्तस्तु
भूतात्मा न स्मरेच्च परं पदम् मैत्रा. ४।२
शब्द-स्पर्शाविति वायुगुणौ शारीरको. ४
शब्दं बधिरवच्छृणु । काष्ठवत्पश्य
वै देहं प्रशान्तस्येति लक्षणम् अ. ना. १९
शब्दं सर्वमसद्विद्धि स्पर्शं
सर्वमसत्सदा ते. बिं. ३।५७
शब्दः खे पौरुषं नृषु भ. गी. ७।८

शब्दाक्षरं परं ब्रह्म यस्मिन्क्षीणे यदक्षरम् । तद्विद्वानक्षरं ध्यायेद्यदिच्छेच्छान्तिमाप्नुयात् ब्र. बिं. १६

शब्दादिविषयान् पञ्च मनश्चैवातिचञ्चलम् । चिन्तयेदात्मनो रश्मीन्प्रत्याहारः स उच्यते अ. ना. ५

शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित् । कुर्याच्चित्तानुकारीणि प्रत्याहारपरायणः भत्रसं. ३।२७

शब्दादीन् विषयानन्ये भ. गी. ४।२६

शब्दादीन् विषयांस्त्यक्त्वा भ.गी. १८।५१

शब्दाद्यैर्विषयैस्त्यक्तो लयस्थो दृश्यते तथा (निर्वातस्थो यथा दीपो भासते निश्चलो यथा) अमन. १।२७

शब्दानां ज्ञानरूपिणी देव्यु. २१

शब्दार्णमक्षरं ब्रह्म तस्मिन्क्षीणे यदक्षरम् । तद्विद्वानक्षरं ध्यायेद्यदीच्छेच्छान्तिमात्मनः त्रि. ता. ५।१६

शब्देनैवाशब्दमाविष्क्रियते मैत्रा. ६।२२

शम इत्यरण्ये मुनयस्तस्माच्छमे रमन्ते महाना.१६।१२

(ॐ ऐं ह्रीं श्रीं) शमग्निरग्निभिः करच्छं नस्तपतु सूर्यः वनदु. ३३
[ऋ. सं. ८।१८।९+तै.ब्रा. ३।७।१०।५

शमदमादिदिव्यशक्त्याचरणे क्षेत्रपात्रपटुता निर्वाणो. ५

शमदमादिसम्पन्नो भावमात्सर्यतृष्णाशामोहादिरहितो दम्भाहङ्कारादिभिरसंस्पृष्टचेता वर्तत एवमुक्तलक्षणो यः स एव ब्राह्मणः व. सू. उ. ९

शमवान्याति मुक्तताम् महो. ५।९४

शमश्च स्वाध्यायप्रवचने च तैत्ति. १।९।१

शमं विषं विषेणैति रिपुणा हन्यते रिपुः । ईदृशी भूतमायेयं या स्वनाशेन हर्षदा महो. ५।१११

शमः कारणमुच्यते भ. गी. ६।३

शमादिषट्कसम्पत्तिर्मुमुक्षा, तां समभ्यसेत् वराहो. २।३

शमायान्तु ब्रह्मचारिणः स्वाहा तै. उ. १।४।४

शमेन शान्ताः शिवमाचरन्ति, शमेन नाकं मुनयोऽन्वविन्दन् , शमो भूतानां दुराधर्षः शमे सर्वं प्रतिष्ठितम् महाना. १७।४

शमेनापिहिता गुहा इतिहा. १६

शमो दमस्तपः शौचं भ. गी. १८।४२

शमो मित्रं सुदामा च सत्याक्रूरोद्धवो दमः कृष्णोप. १६

शरणागतदीनानां कृपां कुर्वन्तिसाधवः सामर. २३

शरत्प्रतिहारः छांदो. २।१६।१

शरदि क्रीडते तुभ्यं नम आनन्दशालिने सामर. ४२

शरं धनुषि सन्धाय तिष्ठन्तं रावणोन्मुखम् । वज्रपाणिं रथारूढं रामं ध्यात्वा जपेन्मनुम् रामर. २।७२

शरा जीवास्तदङ्गेषु भाति नित्यं हरिः स्वयम् । ब्रह्मैव शरभः साक्षान्मोक्षदोऽयं महागुने शरभो. २८

शरीरत्रयतादात्म्यात्कर्तृत्वभोक्तृत्वतामगमत् पैङ्गलो. १।५

शरीरत्रयसंयुक्तजीवः सङ्गी तृतीयकः (भ्रमः) अ. पू. १।१४

शरीरपुरुष इति यमवोचाम स एवाहं दैहिक आत्मा ३ ऐत. २।३।१

शरीरपुरुषश्छन्दःपुरुषो वेदपुरुषो महापुरुष इति ३ ऐत. २।३।१

शरीरपोषणादिकं समानकर्म शांडि. १।४।९

शरीरप्रादेशाङ्गुष्ठमात्रमणोरप्यणु ध्यात्वाऽतः परमतां गच्छति मैत्रा. ६।३८

शरीरभेदः द्विविधाः सामर. १०१

शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामि छांदो. ८।१३।१

शरीरमन्नादम् तैत्ति. ३।७

शरीरमस्थिमांसं च त्यक्त्वा युक्ताद्यशोभनम् । भूतमुक्तावलीतन्तुं चिन्मात्रमवलोकयेत् महो. ४।२३

शरीरमिदं मैथुनादेवोद्भूतं संविदपेतं निरय एव .. मैत्रे. १।४

शरीरमिध्मम् (शारीरयज्ञस्य) महाना. १८।१

शरीरमेवास्या एकमङ्गमुदूढं, तस्य सुखदुःखे परस्तात्प्रतिविहिता भूतमात्रा — कौ. त. ३।५
शरीरयज्ञसंशुद्धचित्तसञ्जातबोधतः। मुनयो यत्पदं यान्ति तद्राम-पदमाश्रये — प्रा. हो. शीर्षकं
शरीरयात्राऽपि च ते — भ. गी. ३।८
शरीरलघुता दीप्तिर्जाठराग्निविवर्धनम् (नाडीशुद्धिचिह्नानि) — यो. त. ४५
शरीरलघुतावित्र पादाङ्गुष्ठनिरोधनात् — जा. द. ६।२४
शरीरवाङ्मनोभिर्यत् — भ.गी. १८।१५
शरीरस्थं प्राणमग्निना सह योगाभ्यासेन समं न्यूनं वा यः करोति, स योगिपुङ्गवो भवति — शांडि. १।४।२
शरीरस्थोऽपि कौन्तेय — भ.गी. १३।३२
शरीरस्य देहिनो जाग्रत्स्वप्नसुषुप्तितुरीयावस्थाः सन्ति — ना. पं. ५।१
शरीरं तावदेव स्यात्षण्णवत्यङ्गुलात्मकम् — जा. द. ४।१
शरीरं तु एकादशेन्द्रियात्मकम् — सामर. १०१
शरीरं म्रियते येन वर्तते तत्र कुण्डली — वराहो. ५।२२
शरीरं मे विचर्षणम् [ना.प.४।४५+ — तैत्ति. १।४।१
शरीरं यदवाप्नोति — भ. गी. १५।८
शरीरं यज्ञशमलं कुसीदं — महाना. ५।९
शरीरं वेदिः (शारीरयज्ञस्य) — प्रा. हो. ४।२
शरीरं सर्वजन्तूनां षण्णवत्यङ्गुलात्मकम्। तन्मध्ये पायुदेशात्तु द्व्यङ्गुलात्परतः परम — वराहो. ५।१९
(तथा) शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही — भवसं. २।३७
शरीरात्प्राणो द्वादशाङ्गुलोऽधिको भवति — शांडि. १।४।२
शरीरान्तर्गताः सर्वे रोगा विनश्यन्ति (स्वस्तिकासनाभ्यासनैः) — शांडि. १।३।१२
शरीराभिमानेन जीवत्वम् — ना. प. ६।७
शरीरेण जिताः सर्वे शरीरं योगिभिर्जितम्। तत्कथं कुरुते तेषां सुखदुःखादिकं फलम् — यो. शि. १।३८
शरीरे पाण्डवस्तदा — भ.गी. १७।१३
शरीरे पाप्मनो हित्वा सर्वान्कामान् समश्नुते — तैत्ति. २।५
शरीरे सकलं विश्वं पश्यत्यात्मा-विभेदतः — योगकुं. २।४९
शरीरे प्राणः प्रतिष्ठितः — तैत्ति. ३।७
शरीरेष्वशरीरेषु परिच्छिन्नोऽपि सर्वगः — २ आत्मो. १४
शर्म मे भव यत्पापं तन्निवारय — आरुणि. ३
शर्वः सर्वस्य जगतो विधाता भर्ता हर्ता विश्वरूपत्वमेति — त्रिपुरो. १५
शर्वो विश्वं मायया विदधार — ग. पू. ता. २।८
शल्कैरग्निमिन्धान उभौ लोकौ सनेमहम् — महाना.१३।१२
शवपिण्डवदेकत्रात्रं (त्यजेद्यतिः) [ना. प. ७।१+ — १ संसो. २।७९
शशपृष्ठाद्गौतमः, वसिष्ठ उर्वश्यां, अगस्त्यः कलशे जातः — व. सू. उ. ९
शशशृङ्गेण नागेन्द्रो मृतश्चेज्जगदस्ति तत् — तं. त्रि. ६।७४
शशिमध्यगतो वह्निर्वह्निमध्यगता प्रभा — ध्या. बिं. २७
शशिरवी जायेते पुरुषोत्तमात् — शि. त्रि. २
शशिस्थाने वसेद्विन्दुस्तयोरैक्यं सुदुर्लभम् — ध्या. बिं. ८८
शश्वच्छान्तिं निगच्छति — भ. गी. ९।३१
शश्वत् सूयमानत्वात्सूर्यः — मैत्रा. ६।७
शश्वदमितानन्दाचलोपरिविहारिणीं मूलप्रकृतिजननीमविद्यालक्ष्मीमेवं ध्यात्वा...तया चानुज्ञातश्चोपर्युपरि गत्वा महाविराट्-पदं प्राप — त्रि.म.ना. ६।३
शश्वद्ब्रह्ममयं रूपं क्रियाशक्तिरुदाहृता — सीतो. २४
शश्वद्विश्वमिदं जगत् — शु. जा. २।६
शं न इन्द्राग्नी भवतामवोभिः — प्रवर्ग्या. ११
[ऋ.मं.७।३५।१+ — वा. सं. ३६।११
[अथर्व. १९।१०।१

शान्ताशान्तादिहीनात्मा नादान्त-
ज्योतिरूपकः ते. बिं. ५।५
शान्तिमाप्नोति नैष्ठिकीम् भ. गी. ५।१२
शान्तिसमृद्धममृतम् तैत्ति. १।६।२
शान्तिं निर्वाणपरमां भ. गी. ६।१५
शान्तिसंसृजन्तिपशुपाशविमोक्षणम् अ. शिरः. ३।१०
शान्तिस्त्वं, पुष्टिस्त्वं अ. शिरः. ३।१
शान्तो दान्त उपरतस्तितिक्षुर्यो-
ऽनूचानो ह्यभिजज्ञौ समानः शाट्याय. ५
शान्तो दान्त उपरतस्तितिक्षुः
समाहितो भूत्वाऽऽत्मन्ये-
वाऽऽत्मानं पश्यति सुबालो. ९।१४
शान्तो दान्तोऽतिविरक्तः
सुशुद्धो गुरुभक्तः त्रि.म.ना. १।२
शान्तोऽपि व्यवहारस्थः कुर्वन्नपि
न लिप्यते १सं.सो. २।३३
शान्तोऽप्राणो निरात्माऽनन्तः मैत्रा. ७।४
शान्तोऽस्मि पुरुषोत्तमः मैत्रे. ३।२४
शान्तौ सुषुप्तविश्वः, शान्त्यतीते
सुषुप्ततैजसः प. हं. प. १०
शान्त्यतीतं स्वराद्बहिः पं. ब्र. १५
शान्त्या चित्तं (शुद्धं भवति) महाना. १७।१२
शाब्दः सौवरस्तेजोमयोऽमृतमयः
पुरुषोऽयमेव स योऽयमात्मेद-
ममृतमिदं ब्रह्मेदꣳ सर्वम् बृह. २।५।९
शाम्भवस्थानमेतत्ते वर्णितं पद्मसंभव यो. शि. ५।१६
शाम्यतीदं कथं दुःखमिति तप्तो-
ऽस्मि चेतसा महो. ३।६
शारीरस्तेजोमयोऽमृतमयः पुरुषो-
ऽयमेव स योऽयमात्मा बृह. २।५।१
शारीरं केवलं कर्म भ. गी. ४।२१
शारीरं तप उच्यते भ.गी. १७।१४
शारीरोऽग्निर्नाम जराप्रणुद्रा-
हविरवस्कन्दति प्रा. हो. २।४
शार्कराक्ष्य कं त्वमात्मानमुपास्से छांदो. ५।१५।१
शालावंशे सर्वेऽन्ये वंशाः
समाहिताः स्युः ३ ऐत. २।४।१
शाश्वतस्य च धर्मस्य भ. गी. १४।२७
शाश्वतं पदमव्ययम् भ. गी. १८।५६
शाश्वतोऽजः स्वतन्त्रः स्वे
महिम्नि तिष्ठति मैत्रे. २।४
शाश्वतं ध्रुवमच्युतम् ते. बिं. १।८
शाश्वतं परमं पदम् त्रि.म.ना. ७।७
शाश्वतं वै रुद्रमेकत्वमाहुः बटुको. २३
शाश्वतꣳ शिवमच्युतम् महाना. ९।३
शाश्वतं सदाशिवं ब्रह्मादिवन्दितं
योगिध्येयं परमं पदम् गणेशो. ५।६
शास्ताऽच्युतो विष्णुर्नारायणः मैत्रा. ७।७
शास्त्रज्ञानात्पापपुण्यलोकानुभव-
श्रवणात्प्रपञ्चोपरतः...साधन-
चतुष्टयसम्पन्नो यः सन्न्यस्यति
स एव ज्ञानसन्न्यासी ना. प. ५।३
[१ सं. सो. २।१३+
शास्त्रमेतत्प्रयत्नेन सदाऽभ्यस्यं
मुमुक्षुभिः । यस्य धारणमात्रेण
स्वयं तत्त्वं प्रकाशते अमन. २।१०६
शास्त्रसज्जनसम्पर्कवैराग्याभ्यास-
रूपिणी । प्रथमा भूमिकैषोक्ता
मुमुक्षुत्वप्रदायिनी अ. पू. ५।८१
शास्त्रसज्जनसम्पर्कवैराग्याभ्यास-
योगतः शांडि. १।७।२६
शास्त्रसज्जनसम्पर्कवैराग्याभ्यास-
पूर्वकम् । सदाचारप्रवृत्तिर्या
प्रोच्यते सा विचारणा
[महो. ५।२८+ वराहो. ४।४
शास्त्रसज्जनसम्पर्कैः प्रज्ञामादौ
विवर्धयेत् अ. पू. ५।७१
शास्त्रं विनापि सम्बोद्धुं गुरवोऽपि
न शक्नुयुः योगकुं. २।१०
शास्त्रं सर्वमसद्विद्धि ह्यहं सत्य-
चिदात्मकः ते. बिं. ३।५०
शास्त्राण्यधीत्यमेधावी अभ्यस्य च
पुनः पुनः । परमंब्रह्म (विद्यायाः)
विज्ञायउल्कावत्ता(न्या)न्यथोत्सृजेत् अ. ना. १
शास्त्रीयेणैव मार्गेण वर्तेऽहं
मम का क्षतिः १ अवधू. २१
शास्त्रेण न स्यात्परमार्थदृष्टिः
कार्यक्षमं पश्यति चापरोक्षम् ।

प्रारब्धनाशात्प्रतिभाननाश एवं त्रिधा नश्यति चात्ममाया वराहो. २।६९
शास्त्रे मयि त्वयीशे च ह्यखण्डैक-रसो भवान् ते. बिं. २।४२
शास्त्रैः सज्जनसम्पर्कपूर्वकैश्च तपोदमैः। आदौ संसारमुक्त्यर्थं प्रज्ञामेव विवर्धयेत् महो. ४।४
शांडिल्यपैङ्गलंभिक्षुमहच्छारीरकंशिखा मुक्ति. १।३५
शिखरिणां प्रपतनं ध्रुवस्य प्रचलनं वृश्चनं वा तरूणां (वातरज्जूनां) मैत्रा. १।८
शिखण्डी च महारथः भ. गी. १।१७
शिखा च दीपसङ्काशा १ प्रणवो. ९
शिखा ज्ञानमयी यस्य उपवीतं च तन्मयम्। ब्राह्मण्यं सकलं तस्य इति ब्रह्मविदो विदुः (वेदानुशासनम्–नेतरेषां तु किञ्चन)[परब्र.१८+शाट्या.१७ +ना.प. ३।८६
शिखा ज्ञानमयी वृत्तिर्यमाद्यष्टांगसाधनैः त्रि. ब्रा. २।२३
शिखा तु दीपसङ्काशा ब्र. वि. ९
शिखा प्राणमयी वृत्तिर्यमाद्यष्टाङ्ग-साधनम्। देहेन्द्रियेषु वैराग्यं यम इत्युच्यते बुधैः २ अवधू. १
शिखायामेकरुद्राक्षं त्रिशतं शिरसा वहेत् रु. जा. १५
शिखा वर्णाश्रमिणामेककैव परब्र. ६
शिखाऽस्य मनस्तमोलक्षणं भित्त्वा तमोऽतमाविष्टमागच्छति मैत्रा. ६।२४
शिखां यज्ञोपवीतं छित्त्वा सन्न्यस्तं मयेति त्रिवारमुच्चरेत् याज्ञव. १
शिखां यज्ञोपवीतं...विसृज्यैव परिव्रजति ना. प. ३।७७
शिखी मुण्डी चोपवीती कुटुम्बी यात्रामात्रं प्रतिगृह्णन्मनुष्यात् शाट्याय. १८
शिथिलीकृतसर्वाङ्ग आनखाग्र-शिखाग्रतः।...स्वयं प्रकाशिते तत्त्वे स्वानन्दस्तत्क्षणाद्भवेत् अमन. २।५०
शिरसि बाणं बाहुनाभिपीठ-प्रकृतिरूपकं देहे धारणं यस्य न विद्यते तद्देहं न पश्येत् लिङ्गोप. २
शिरसीशानमन्त्रेण कण्ठे तत्पुरुषेण तु। अघोरेण गले धार्यं तेनैव हृदयेऽपि च (रुद्राक्षधारणं) रु. जा. २१
शिरः कपालं केशान् न कुर्यात् लिङ्गोप. २
शिरःपीठं लिङ्गात्मकं सर्वम् लिङ्गोप. २
शिरःपाणिपादपायूपस्थं सर्वं लिङ्गस्वरूपम् लिङ्गोप. १
शिरःपाणिपादपार्श्वपृष्ठोरूदरजङ्घ-शिश्नोपस्थपायवो मे शुद्ध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा महाना.१४।१०
शिरा नद्ध्योऽस्थीन्युपग्रहाः छाग. ६।२
शिरासु तत्पृष्ठगतासु नित्यं समातृकाः शक्तिगणा वसन्ति १ बिल्वो. ५
शिरोमध्यगते वायौ जा. द. ६।३७
शिरो रक्षतु वाराही चैन्द्री रक्षेज्जङ्घद्वयम्। चामुण्डा हृदयं रक्षेत्कुक्षिं रक्षतु वारुणी वनदु. ८९
शिरोव्रतं विधिवद्यैस्तु चीर्णम् (तेषामेवैतां ब्रह्मविद्यां वदेत) मुण्ड. ३।२।१०
शिव एकः स्वेन भासेदं सर्वं दृष्ट्वा तप्तायःपिण्डवदेकं भिन्नवदवभासते त्रि. ब्रा. १।१
शिव एको ध्येयः शिवंकरः अ. शिखो. ३
शिव एव जङ्गमरूपः रुद्रोप. २
शिव एव प्राणलिङ्गी रुद्रोप. २
शिव एव रुद्रः प्राणलिङ्गी, नान्यो भवति रुद्रोप. २
शिव एव स्वयं साक्षादयं ब्रह्मविदुत्तमः [महो. ४।८५+ २ आत्मो. २०
शिव एव सदा ध्येयः सर्वसंसार-मोचकः शरभो. ३२
शिवगुरुस्वरूपो महेश्वरः रुद्रोप. ३
शिवज्ञानविदं तस्मात्पूजयेद्विभवैर्गुरुम् शिवो. १।३५

शिवज्ञानं परं ब्रह्म तदारभ्य न सन्त्यजेत् । ब्रह्मासाद्य च यो गच्छेद्ब्रह्मा स प्रकीर्तितः शिवो. ७।६२

शिवज्ञानं समभ्यसेत् शिवो. ७।६१

शिवज्ञानात्महस्तेन कस्तं न प्रतिपूजयेत् । (अज्ञानपङ्कनिर्मग्नं यः समुद्धरते जनम्) शिवो. ७।४१

शिवज्ञानार्थतत्त्वज्ञं प्रसन्नमनसं गुरुम् । शिवः शिवं समास्थाय ज्ञानं वक्ति न हीतरः शिवो. ७।४

शिवधर्माच्छिवज्ञानं प्राप्य मुक्तिमवाप्नुयात् शिवो. १।३०

(यद्वा) शिवभक्तिसम्पुष्टं सदापि तद्रसितं देवताधार्यम् रुद्रोप. १

शिवशक्तिसमायोगे जायते परमा स्थितिः यो.शि. १।११७

शिवभक्तिविहीनश्चेत् स चण्डाल उपचण्डालः रुद्रोप. १

शिवमक्षरमव्ययं हरिहरहिरण्यगर्भस्रष्टारं भस्मजा. २।४

शिवमद्वैतं चतुर्थं मन्यन्ते [गणेशो. १।४ +रामो. २।४

शिवमात्मनि पश्यन्ति प्रतिमासु न योगिनः जा. द. ४।५९

शिवयाऽनुषक्तो मध्ये दलेऽहं निवसामि नित्यम् १ बिल्वो. ३

शिवयोगनिद्रा च निर्वाणो. २

शिवयोगी शिवज्ञानी शिवजापी तपोधिकः । क्रमशः कर्मयोगी च पञ्चैते मुक्तिभाजनाः शिवो. १।३६

शिवरूपः प्राणलिङ्गी रुद्रोप. २

शिवलिङ्गधरं विप्रं विपन्नं न तु दाहयेत् । यदि ना दाहयेत्तस्य ब्रह्महत्या तदा भवेत् सदानं. १३

शिवलिङ्गं त्रिसन्ध्यमभ्यर्च्यकुशेष्वासीनो ध्यात्वा (जुहुयात्) भस्मजा. २।४

शिवलिङ्गार्चनयुतश्चाण्डालोऽपि स एव ब्राह्मणाधिको भवति रुद्रोप. १

शिवव्रतधरं दृष्ट्वा समुत्थाय सदा द्रुतम् । शिवोऽयमिति सङ्कल्प्य हर्षितः प्रणमेत्ततः शिवो. ७।७२

शिवशक्तिमयं मन्त्रं मूलाधारात्समुत्थितम् । तस्य मन्त्रस्य वै ब्रह्मञ्छ्रोता वक्ता च दुर्लभः यो. शि. २।५

शिवशक्त्यमृतस्पर्शे लब्ध एव कुतो मृतिः बृ. जा. २।१५

शिवशक्त्यात्मकं रूपं चिन्मयानन्दवेदितम् पा. ब्र. ९

शिवश्च नारायणः शक्रश्च नारायणः नारा. २+ [त्रि.म.ना. २।८+ ना.पू.ता. ५।४

शिवश्चोर्ध्वमयः शक्तिरूर्ध्वशक्तिमयः शिवः बृ. जा. २।१०

शिवसायुज्यमवाप्नोति रु. जा. ४५

शिवस्य जीवरूपस्य स्थानं तद्धि प्रचक्षते । यत्र कुण्डलिनी नाम परा शक्तिः प्रतिष्ठिता यो.शि. १।१६९

शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः स्कन्दो. ८

शिवं तुरीयं यज्ञोपवीतम् निर्वाणो. ६

शिवं प्रशान्तममृतं ब्रह्मयोनिम् कैव. १।६

शिवं शक्तिं च सादाख्यामीशं विद्याख्यमेव च बृ. जा. ४।२०

(यत्) शिवं शान्तमद्वैतं चतुर्थं मन्यन्ते स ब्रह्मप्रणवः... ना. प. ८।२३

शिवः क्षरति लोकान् वै विष्णुः पाति जगत्त्रयम् ते. बिं. ५।८७

शिवः पुरुष ईशानो नित्यमात्मेति कथ्यते महो. ६।६१

शिवः शिव इमे शान्तनाम चाद्यं मुहुर्मुहुः । उच्चारयन्ति तद्भक्त्या ते शिवा नात्र संशयः शिवो. १।९

शिवः शिवाय भूतानां यस्माद्दानं प्रयच्छति । गुरुमूर्तिः स्थितस्तस्मात्पूजयेत्सततं गुरुम् शिवो. ७।२

शिवः शैवागमस्थानां कालः कालैकवादिनाम् अ. पू. ३।२१

शिवः सर्वजगत्पतिः शिवो. १।१४

शिवः संसारमोचकः	पञ्चब्र. ३६
शिवाग्निना तनुं दग्ध्वा शक्तिसोमामृतेन यः । प्लावयेद्योगमार्गेण सोऽमृतत्वाय कल्पते	बृ. जा. २।१
शिवाय विष्णुरूपाय शिवरूपाय विष्णवे..	स्कन्दो. ८
शिवालयस्थमकल्पं शतकल्पं च	बृ. जा. ३।३४
शिवालयस्थं तल्लिङ्गलिप्तं वा मन्त्रसंस्कारदग्धं वा (भस्म)	बृ. जा. ५।७
शिवां तां कुरु मोत्क्रमीः	प्रश्नो. २।१२
शिवेन वचसा त्वा गिरिशाच्छा वदामसि । यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत् [वा. सं. १६।४+	नीलरु. १।६+ तै.सं. ४।५।१।२
शिवे भक्ति प्राप्य तद्भक्तसङ्गान्न संसृतौ घोरदुःखात्प्रमज्जेत्	सि. शि. ७
शिवेन मे सन्तिष्ठस्व स्योनेन मे संतिष्ठस्व	म. ना. १६।११
शिवो गुरुः शिवो वेदः शिवो देवः शिवः प्रभुः । शिवोऽस्म्यहं शिवः सर्वं शिवादन्यन्न किञ्चन	वराहो. ४।३२
शिवोऽद्वैत ओङ्कार आत्मैव	नृसिंहो. २।७
शिवो भवेदित्येकः	गुह्यषोढा. १
शिवोमायुतः परमात्मा वरदो देवता	ग. पू. २।८
शिवोमाविशाप्रदाहाय	महाना. १६।३
शिवोऽयं परमं देवं शक्तिरेषा तु जीवजा । सूर्याचन्द्रमसोर्योगाद्धंसस्तत्पदमुच्यते	त्रि. ता. १।११
शिवोऽहं, नानाशक्तयोऽहम्	अद्वै. भा. १
शिशिरे शिशिरं मथ्यमानं फेनं भवति	अ.शिरः.३।१५
शिशुमेवाप्येति, यः शिशुमेवास्तमेति	सुबालो. ९।१०
शिश्नं निरभिद्यत, शिश्नाद्रेतः	२ ऐत. १।४
शिष्टसंवर्गवर्ज्यं तु	दुर्वासो. २।५
शिष्टाहंकारवाञ्जन्तुः	महो. ५।९४
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्	भ. गी. २।७
शिष्याश्च स्वस्वकार्येषु प्रार्थयन्ति... स्वाभ्यासेऽविस्मृतौ...	१ यो. त. ७८
शिष्याणां न तु कारुण्याच्छिष्यसङ्ग्रह ईरितः	१सं.सो. २।८३
शीतवातोष्णत्राणकरं कौपीनमोमिति	ना. प. ४।५०
शीतोष्णसुखदुःखदाः	भ. गी. २।१४
शीतोष्णसुखदुःखमानावमानवर्जितः	प. हं. प. ११
शीतोष्णसुखदुःखमानावमानं निर्जित्य...प्रणवात्मकत्वेन देहत्यागं करोति यः, सोऽवधूतः	तुरीया. ३
शीतोष्णसुखदुःखाद्यैर्व्याधिभिर्मानसैस्तथा । अन्यैर्नानाविधैर्जीवैः शस्त्राग्निजलमारुतैः ॥ शरीरं पीड्यते तैस्तैश्चित्तं संक्षुभ्यते ततः [यो. शि.	१।२८,२९
शीतोष्णसुखदुःखेषु [भ.गी.६।७+	१२।१८
शीतोष्णसुखदुःखेच्छासत्त्वरजस्तमोगुणा वशिन्यादिशक्तयोऽष्टौ	भावनो. ६
शीतोष्णाहारनिद्राविजयः सर्वदा शान्तिर्निश्चलत्वं विषयेन्द्रियनिग्रहश्चैते यमाः	मं. ब्रा. १।१
शीतोष्णे क्षुत्पिपासे च सङ्कल्पकविकल्पकम् ।...एतद्भावविनिर्मुक्तं तद्ग्राह्यं ब्रह्म तत्परम्	ते.बिं.१।१३,१४
शीर्यन्ते तारका अपि	महो. ३।४९
शीर्यते ह वा अस्य द्विषन् पाप्मा भ्रातृव्यः, परास्य द्विषन् पाप्मा भ्रातृव्यो भवति	१ऐत. १।४।४
शीर्षकपालं भित्त्वा पृथिवीं भिनत्ति	सुबालो. ११।२
शीर्षके च ललाटे च कर्णे कण्ठेऽसकद्वये । कूर्परे मणिबन्धे च हृदये नाभिपार्श्वयोः ॥ पृष्ठे चैकं प्रतिस्थानं जपेत्तत्राधिदेवताः	बृ. जा. ४।१९
शीर्षान्तर्गतमण्डलमध्यगं पञ्चवक्त्रमुमासहायं नीलकण्ठं प्रशान्तमन्तर्लक्ष्यमिति केचित्	मं. ब्रा. १।५
शीर्षे कण्ठे वक्षसि कक्षदेशे नाभौ हस्ते सर्वदा प्राणलिङ्गम् । धार्यं यथासम्प्रदायं पुरस्ताद्गुरोर्विदित्वा हृदये मुख्यमुक्तम्	सि. शि. १२

शीर्षोपरि द्वादशाङ्गुलिमानं
ज्योतिः पश्यति तदाऽमृतत्वमेव मं. ब्रा. १।३
शीर्षोपरि द्वादशाङ्गुलसमीक्षितु-
रमृतत्वं भवति अद्वयता. ३
शीर्ष्णो द्यौः समवर्तत [पु.सू. १३ चित्यु. १२।६
शीर्ष्णो द्यौः (अजायत) गणेशो. ३।११
शुक पश्यन्न पश्येस्त्वं साक्षी
सम्पूर्णकेवलः महो. २।७३
शुकमार्गे येऽनुसरन्ति धीराः
सद्योमुक्तास्ते भवन्तीह लोके वराहो. ४।३४
शुकश्च वामदेवश्च द्वेसृती देवनिर्मिते वराहो. ४.३६
शुकेषु मे हरिमाणं रोपणाकासुदध्मसि सूर्यता. २।१+
[ऋ. मं. १।५०।१२+तै.ब्रा. ३।७।६।२२
शुको नाम महातेजाः स्वरूपा-
नन्दतत्परः महो. २।१
शुको मुक्तो वामदेवोऽपि मुक्त-
स्ताभ्यां विना मुक्तिभाजो
न सन्ति वराहो. ४।३४
शुको विहङ्गनः प्रोक्तो वामदेवः
पिपीलिका वराहो. ४।३६
शुक्तिकाया यथा तारं कल्पितं
मायया तथा । महदादि जग-
न्मायामयं मय्येव केवलम् वराहो. ३।१५
शुक्तिकारजतंसत्यंभूषणंचेज्जगद्भवेत् ते. बिं. ६।७६
शुक्रभिन्नेन यमो भवति निरुक्तो. १।३
शुक्रमादाय पुनरेति स्थानम्
हिरण्मयः पुरुष एकहंसः बृह. ४।३।११
शुक्रशोणितसंयोगादावर्तते गर्भः गर्भो. २
शुक्रशोणितसंयोगान्मातृपितृ-
संयोगाच्च कथमिदं शरीरं
परं संयम्यते निरुक्तो. १।३
शुक्रः शुक्रस्य पुरोगाः चित्यु. ३।१
शुक्रः शुशुक्वां उषो न जारः पप्रा
समीची दिवो न ज्योतिः
[वनदु. ३२+ ऋ.मं. १।६९।१
शुक्रातिरेके पुमान् भवति ।
शोणितातिरेके स्त्री भवति ।
द्वाभ्यां समेन नपुंसको भवति निरुक्तो. १।३

शुक्रेण ज्योतीꣳषि समनुप्रविष्टः
प्रजापतिश्चरति गर्भे अन्तः
[महाना. १।१+ तै.आ. १०।१।१
शुक्लकृष्णे गती ह्येते भ. गी. ८।२६
शुक्लदन्तो भस्मदिग्धो मन्त्रेणानेन
मन्त्रवित् । ॐ तद्ब्रह्मेति
चोच्चार्य पौलकं भस्म सन्त्यजेत् बृ. जा. ३।२४
शुक्लध्यानपरायणः... सन्न्यासेन
देहत्यागं करोति स परमहंस-
परिव्राजको भवति प. हं. प. ८
शुक्लध्यानपरायणोऽध्यात्मनिष्ठोऽशुभ-
कर्मनिर्मूलनपरः सन्न्यासेन देह-
त्यागं करोति स परमहंसो नाम जाबालो. ६
शुक्लस्य कृष्णस्य पीतस्य लोहितस्येति
तासु तदा भवति, यदा सुप्तः
स्वप्नं न कञ्चन पश्यति कौ. त. ४।१९
शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य
लोहितस्य पूर्णाः (नाड्यः) बृह. ४।३।२०
शुक्लस्य नीलस्य पीतस्य लोहि-
तस्येत्यसौ वा आदित्यः छांदो. ८।६।१
शुक्लं चन्द्रेण संयुक्तं रजः सूर्य-
समन्वितम् (सूर्येण सङ्गतम्)
[यो. चू. ६४+ ध्या. बिं. ९०
शुक्लो रक्तः कृष्णो धूम्रः पीतः
कपिलः पाण्डर इति गर्भो. २
शुचिर्वाऽप्यशुचिर्वाऽपि यो
जपेत्प्रणवं सदा । न स
लिप्यति पापेनपद्मपत्रमिवाम्भसा यो. चू. ८८
शुचिःशुचौ देशे गुप्ततीर्थायतनेषु
सुप्रक्षालितपाणिपादवदनः..
इत्यप उत्सृजेत् सन्ध्यो. १
शुचीनां श्रीमतां गेहे भ. गी. ६।११
शुचौ देशेऽप्यासीनो दर्भान्धारय-
माणः प्राङ्मुख उपविश्य.. सूर्यता. १।८
शुचौ देशे प्रतिष्ठाप्य भ. गी. ६।४१
(ॐ) शुचौ देशे शुचिः सत्त्वस्थः
सदधीयानः सद्वादी सद्ध्यायी
सद्याजी स्यात् मैत्रा. ६।३०

शुचौ देशे स्वाध्यायमधीयानः धार्मिकान्विदधदात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं यावदायुषं ब्रह्मलोकमभिसम्पद्यते — छांदो. ८।१५।१

शुद्धचिदानन्दब्रह्मविलासानन्दाश्चानन्तपरमानन्दविभूतयश्चानन्तवैकुण्ठाश्चानन्तपरमानन्दसमुद्रादयः सन्त्येव — त्रि.म.ना. ८।३

शुद्धचेतन एवाहं कलाकलनवर्जितः — १सं.सो. २।२०

शुद्धज्ञानामृतं प्राप्य परमाक्षरनिर्णयम् । गुह्याद्गुह्यतमं गोप्यं ग्रहणीयं प्रयत्नतः — ब्र. बि. ४६

(अथ) शुद्धबुद्धमुक्तसत्यानन्दस्वरूपत्वाच्च — त्रि.म.ना. ३।२

शुद्धबोधमनोदृशम् (पाठगतं) — अध्यात्मो. ६३

शुद्धबोधसौधावलिविशेषैरलङ्कृतं — त्रि.म.ना. ७।८

शुद्धबोधानन्दलक्षणकैवल्यं भवति — त्रि.म.ना. ४।१

शुद्धबोधानंदविभूतिविशेषं... शाश्वतं परमं पदं...स्वयम्प्रकाशमनिशं ज्वलति — त्रि.म.ना. ७।७

शुद्धबोधानन्दविशेषाकारं (ब्रह्म) — त्रि.म.ना. ४।१

शुद्धब्रह्मास्मि सोऽस्म्यहम् — मैत्रे. ३।९

शुद्धमात्मानमालिङ्ग्य नित्यमन्तस्थया धिया । यः स्थितस्तं क आत्मेह भोगो बाधयितुं क्षमः — अ. पू. २।४२

शुद्धमानसः शुद्धचिद्रूपः सहिष्णुः सोऽहमस्मि — पैङ्गलो. ४।९

शुद्धमीश्वरचैतन्यं जीवचैतन्यमेव च । प्रमाता च प्रमाणं च प्रमेयं च फलं तथा ॥ इति सप्तविधं प्रोक्तं भिद्यते व्यवहारतः — कठरु. ४०

शुद्धरूपोऽस्म्यहं सदा — ते. बिं. ३।५

शुद्धशौचमिति प्रोक्तं मृज्जलाभ्यां तु लौकिकम् — मैत्रे. २।८

शुद्धसत्त्वप्रधानायां मायायां बिम्बितो ह्यजः — सरस्व. ३८

शुद्धसत्त्वे परे लीनो जीवः सैन्धवपिण्डवत् — त्रि.ब्रा. २।१६४

७६

शुद्धसन्मात्रसंवित्तेः स्वरूपान्न चलन्ति ये । रागद्वेषादयो भावास्तेषां नाज्ञत्वसम्भवः — महो. ५।३

शुद्धसंविन्मयानन्दरूपा भवति पञ्चमी (भूमिका) — अ. पू. ६।८३

शुद्धस्फटिकसङ्काशं केवलं मोक्षकाङ्क्षया । चिन्तयन्परमात्मानं भानुलक्षं जपेन्मनुम् — रामर. २।५

शुद्धस्फटिकसङ्काशं चन्द्रकोटिसमप्रभम् । एवं ध्यायेन्महाविष्णुमेवं वा विनयान्वितः — ध्या. बिं. २९

शुद्धस्फटिकसङ्काशं किञ्चित्सूर्यमरीचिवत् । लभते योगयुक्तात्मा पुरुषोत्तमतत्परः — २ योगत. ११

शुद्धस्फटिकसङ्काशं स वै ब्रह्म परमात्मेत्युच्यते — हंसो. ४

शुद्धं बुद्धमनीदृशम् — अध्यात्मो. ६३

शुद्धं बुद्धं सदामुक्तमनामकमरूपकम् — ते. बिं. ६।७०

शुद्धं ब्रह्म शुभाशुभम् — ते. बिं. ६।३७

शुद्धं शुद्धेनेतिसम्मृज्यसंशोध्य(भस्म) — भस्मजा. १।४

शुद्धं सदसतोर्मध्यं पदं बुद्ध्वाऽवलम्ब्य च । सबाह्याभ्यन्तरं दृश्यं मा गृहाण विमुञ्च मा — महो. ५।१७२

शुद्धं सूक्ष्मं निराकारं निर्विकारं निरञ्जनम् । अनन्तमपरिच्छेद्यमनूपममनामयम् ॥ आत्ममन्त्रसदाभ्यासात्परतत्त्वं प्रकाशते — यो. शि. २।१७

शुद्धः पूतः पुण्यलोको भवति — छां. ५।१०।१०

शुद्धः पूतः शून्यः शान्तोऽप्राणो निरात्माऽनन्तः [मैत्रा. ६।२८+७।४

शुद्धाकाशे वने जाते चलिते तु तदा जगत् — ते. बिं. ६।९८

शुद्धाकाशो मनुष्येषु पतितश्चेत्तदा जगत् — ते. बिं. ६।९७

शुद्धाद्वैतब्रह्माहमिति भिदागन्धं निरस्य स्वान्तर्विजृम्भितभानुमण्डलध्यानतत्पराकारा-

कारितपरंब्रह्मकारितमुक्ति-
मार्गमारूढः परिपक्वो भवति मं. ब्रा. २।७
शुद्धाद्वैताजाड्यसहजामनस्कयोग-
निद्राखण्डानन्दपदानुवृत्त्या
जीवन्मुक्तो भवति मं. ब्रा. २।५
शुद्धा ध्यानेन योगिनः दुर्वासो. १।१०
शुद्धा नाडिगणा भवन्ति यमिनां
मासत्रयादूर्ध्वतः शांडि. १।७।१
शुद्धाभ्यासस्य शांतस्य सदैव
गुरुसेवनात् । गुरुप्रसादात्तत्रैव
तत्त्वज्ञानं प्रकाशते अमन. २।१११
शुद्धां संविदमाश्रित्य वीतरागः
स्थिरो भव अ. पू. ४।१०
शुद्धे चेतसि तस्यैव स्वात्मज्ञानं
प्रकाशते यो. शि. १।६९
शुद्धो ज्ञानमयोऽमलः । आत्माऽहं
सर्वभूतानां विभुः साक्षीनसंशयः सर्वसारो. १०
शुद्धो देव एको नारायणः । न
द्वितीयोऽस्ति कश्चित् [त्रि.म.ना. १।५+२।८
शुद्धो निरवयवात्मा...सो-
ऽचिन्त्यो निर्वर्ण्यश्च पुनात्य-
शुद्धान्यपूतानि आत्मोप. ६
शुद्धो बुद्धो नित्यो निरञ्जनः
शान्तः प्रकाशते हंसो. ११
शुद्धो बोधस्वरूपोऽहं केवलोऽहं
सदाशिवः अध्यात्मो. ६९
शुद्धो भास्वरो गुणभुग्भयो-
ऽनिर्वृत्तिः (आत्मा) मैत्रा. ७।१
शुद्धोऽस्मि परमोऽस्म्यहम् मैत्रे. उ. ३।२
शुद्धोऽस्मि शुक्रः शान्तोऽस्मि
शाश्वतोऽस्मि शिवोऽस्म्यहम् ब्र. वि. १०४
शुद्धोऽहमान्तरोऽहं शाश्वतविज्ञान-
समरसात्माऽहम् आ. प्र. ११
शुद्धोऽहमद्वयोऽहं संततभावोऽहमा-
दिशून्योऽहम् आ. प्र. १०
शुद्धौ यतेत नाडीनां पूर्वोक्त-
ज्ञानसंयुतः त्रि. ब्रा. २।८९
शुना वीर्येण सिंहस्तु त्रि.तौ
यदि जगत्तदा ते. बिं. ६।९९

शुनि चैव श्वपाके च भ. गी. ५।१८
शुभं यद्यशुभं विद्धि अशुभा-
च्छुभमिष्यते ते. बिं. ५।२३
शुभं वाऽशुभमन्यद्वा यदुक्तं गुरुणा
भुवि । तत्कुर्यादविचारेण
शिष्यः सन्तोषसंयुतः ब्र. वि. २७
शुभाशुभकर्मनिर्मूलनपरः सन्न्यस्य
...शरीरत्रयमुत्सृज्य सन्न्यासे-
नैव देहत्यागं करोति स
कृतकृत्यो भवति ना. प. ३।८७
शुभाशुभकर्मनिर्मूलनपरः सन्न्यासेन
देहत्यागं करोति स परमहंसः याज्ञव. ३
शुभाशुभपरित्यागी भ.गी. १२।१७
शुभाशुभफलं कर्ममनोवाग्देह-
सम्भवम् । कर्मजा गतयो
नृणामुत्तमाधममध्यमाः भवसं. ५।१
शुभाशुभफलैरेवं भ. गी. ९।२८
शुभाशुभं च कर्म विन्दति गर्भो. ३
शुभाशुभातिरिक्तः शुभाशुभैरपि
कर्मभिर्न लिप्यते परब्र. २
शुभाशुभाभ्यां मार्गाभ्यां वृहती
वासनासरित् । पौरुषेण प्रयत्नेन
योजनीया शुभे पथि भवसं. १।४७
शुभाशुभाभ्यां मार्गाभ्यां वहन्ती
वासनासरित् । पौरुषेण
प्रयत्नेन योजनीया शुभे पथि मुक्तिको. २।५
शुभाशुभैः कर्मभिर्यो न लिप्यति
कदाचन ना. महो. १५
शुभेच्छादित्रयं भूमिभेदाभेदयुतं
स्मृतम् । यथावद्वेद बुद्ध्येदं
जगज्जाग्रति दृश्यते वराहो. ४।११
शुभेच्छा प्रथमा भूमिका भवति वराहो. ४।१
शुभोऽस्मिशोकहीनोऽस्मि चैतन्यो-
ऽस्मि समोऽस्म्यहम् मैत्रे. ३।३
शुभ्रवर्णमाजायतेश्वरात् परब्र. २
शुष्कभृङ्गारस्तदगित्युपासीत कौ. उ. २।६
शुष्के मले तु योगी च स्याद्गति-
श्चलिता ततः । योगकुं. १।६३

शुष्को वृक्षः पल्लवैरेति शोभां द्रवीभावं गण्डशैला लभन्ते । निश्चेष्टाः स्युः शाद्वलस्था हरिण्यो गानानन्दे लीयते विश्वमेतत् — गान्धर्वो. ९
शुष्यन्ते केवला भावाः — महो. ३।५
शुष्यन्त्यपि समुद्राश्च ध्रुवोऽप्यध्रुवजीवनः — महो. ३।५०
शूद्रस्यापि स्वभावजम् — भ. गी. १८।४४
शूद्राणां च परन्तप — भ.गी. १८।४१
शूद्राणां श्रोत्रियागारपचनाग्निसमुद्भवं (भस्म) — बृ. जा. ५।५
शूद्रायां सृजते रेतः श्राद्धं भुक्त्वाऽथ यो द्विजः । स शूद्रयोनिसञ्छिन्नं रेतसा सिञ्चते पितॄन् — इतिहा. २३
शूद्राः किमु स्वक्रियया विहीनाः — भवसं. २।६४
शूद्रेण शूद्रः — बृह. १।४।१९
शून्यं तत्प्रकृतिर्मायाब्रह्मविज्ञानमित्यपि — महो. ६।६१
शून्यं न सङ्केतः परमेश्वरसत्ता — निर्वाणो. ३
शून्यं वै परं ब्रह्म, तत्र सतारं समायं सामयसन्निरेखं भवति — ग. पू. ता. ३।१
शून्याकृतिः शून्यभवः शब्दो नाहमचेतनः — १ सं.सो.२।१५
शून्यागारदेव-(मंदिर-)वासिनः (परमहंसाः) — आश्रमो. ४
शून्यागार-देवगृह-तृणकूट-वल्मीक-वृक्षमूलकुलालशालाग्निहोत्रगृह-नदीपुलिनगिरिकुहरकंदरकोटर-निर्झरस्थण्डिलेषु तेष्वनिकेतवास्यप्रयत्नो...सन्यासेन देहत्यागं करोति स परमहंसो नाम [जाबालो. ६+ — याज्ञ. ३
शून्यागार-देवगृहतृणकूटवल्मीक-वृक्षमूलकुलालशालाग्निहोत्रशालानदीपुलिनगिरिकन्दर-कुहरकोटरनिर्झरस्थण्डिले...परमहंसाचरणेन सन्न्यासेन देहत्यागं कुर्वन्ति ते परमहंसा नाम — भिक्षुको. ६
शून्यागार-वृक्षमूल-देवगृह-तृणकूट-कुलालशालाग्निहोत्रशालाग्निदिगन्तरनदीतटपुलिनभूगृहकंदर-निर्झरस्थण्डिलेषु...देहत्यागं करोति स कृतकृत्यो भवति — ना. प. ३।८७
शून्यानां शून्यसाक्षिणी — देव्यु. २१
शून्या प्रेतपुरी तत्र यावद्वृश्चिकदर्शनात् — इतिहा. ९२
शून्यात्मा सूक्ष्मरूपात्मा विश्वात्मा विश्वहीनकः — ते. बिं. ४।४३
शून्याशून्यप्रभावोऽस्मि शोभनाशोभनोऽस्म्यहम् — मैत्र. उ. ३।५
शून्येन शून्यमपि विप्र यथाऽम्बरेण, नीलत्वमुल्लसति चारुतराभिधानम् — महो. ५।५२
शून्येष्वेवावकाशेषु गुहासु च वनेषु च । नित्ययुक्तः सदा योगी ध्यानं सम्यगुपक्रमेत् — ना. प. ६।८
शूरा नाम महानाडी — यो. शि. ५।२२
शूरो वीरः पुरुषो भूतसंस्थो विश्वोविश्वेशःप्राणदश्चाव्ययात्मा — २ रुद्रो. ५७
शृङ्गप्रोतान् पादान् स्पृष्ट्वा हत्वा तानग्रसात्स्वयम् । नत्वा च बहुधा दृष्ट्वा नृसिंहः स्वयमुद्बभौ — नृसिंहो. ४।३
शृङ्गमिन्द्रः सखा सुरः — कृष्णो. ८
शृङ्गं शृङ्गार्धमाकृष्य शृङ्गेणानेन योजयेत् । शृङ्गमेनं परे शृङ्गे तमनेनापि योजयेत् — नृसिंहो. ७।६
शृङ्गारकलेति विज्ञायते — बह्वृचो. १
शृङ्गेष्वशृङ्गं संयोज्य सिंहं शृङ्गेषु योजयेत् । शृङ्गाभ्यां शृङ्गमाबध्य त्रयो देवा उपासते — नृसिंहो. ६।३
शृणु मे भरतर्षभ — भ. गी. १८।३६
शृणुयादपि यो नरः — भ. गी. १८।७१
शृणुयाम शरदः शतं प्रब्रवाम शरदः शतम् [प्रवर्ग्या. २४+ — वा. सं. ३६।२४
शृण्वतः श्रोत्रेण [बृह. ६।१।८, ९,११,१२

शृणु मे परमं वचः — भ. गी. १८।६४
शृण्वतो नास्ति मेऽमृतम् — भ. गी. १०।१८
शृण्वन्तु विश्वे अमृतस्य पुत्रा आये धामानि दिव्यानि तस्थुः — श्वेताश्व. २।५
शृण्वन्तोऽपि बहवो यं न विद्युः — कठो. २।७
शृण्वन्त्वज्ञाततत्त्वास्ते जानन् कस्माच्छृणोम्यहम् । मन्यन्तां संशयापन्ना न मन्येऽहमसंशयः — अवधू. १६
शृण्वन्वै तन्न शृणोति नहि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वात् — बृह. ४।३।२७
शेमुषी दक्षिणा प्रोक्ता सा यस्याभीक्षणे मुखम् । दक्षिणाभिमुखः प्रोक्तः शिवोऽसौ ब्रह्मवादिभिः — द. मू. २१
शेषकर्मप्रसिद्ध्यर्थं केशान्समाप्ट वा द्विजः । सङ्क्षिप्य वापयेत्पूर्वं केशश्मश्रुनखानि च — ना. प. ४।३९
शेषनागोऽभवद्रामः कृष्णो ब्रह्मैव शाश्वतम् — कृष्णो. १२
शेषस्थिरसमाधानो येनत्यजसि तत्त्यज । चिन्मनःकलनाकारं प्रकाशतिमिरादिकम् — महो. ६।६
शेषायुतफणाजालविपुलच्छत्रशोभितं...निरतिशयाद्वैतपरमानन्दलक्षणमादिनारायणं ध्यायेत् — त्रि.म.ना. ७।१२
शेषो ह वै वासुदेवात्सङ्कर्षणो नाम जात आसीत् — सङ्कर्षणो. १
शैब्यश्च नरपुङ्गवः — भ. गी. १।५
शैला अपि विशीर्यन्ते शीर्यन्ते तारका अपि — महो. ३।४९
शैलूषो वेषसद्भावाभावयोश्च यथा पुमान् । तथैव ब्रह्मविच्छ्रेष्ठः सदा ब्रह्मैव नापरः — २ आत्मो. २१
शैशवे गुरुतो भीतिर्मातृतः पितृतस्तथा । जनतो ज्येष्ठबालाच्च शैशवं भयमन्दिरम् — महो. ३।३३
शोकमोहविनिर्मुक्तो विष्णुं ध्यायन्न सीदति — आ. प्र. १
शोकसंविग्नमानसः — भ. गी. १।४७
शोकस्थानसहस्राणि हर्षस्थानशतानि च । दिवसे दिवसे मूढमाविशंति न पण्डितम् — भवसं. १।९
शोकातिगो मोदते स्वर्गलोके — कठो.१।१२,१८
शोणितातिरेके स्त्री भवति — निरुक्तो. १।३
शोणितान्मांसं, मासान्मेदः [गर्भो. १२+ — निरुक्तो. १।२
शोधनं नाडिजालस्य चालनं चन्द्रसूर्ययोः । रसानां शोषणं चैव महामुद्राऽभिधीयते — यो. चू. ६५
शोधनं मलजालानां घटनं चन्द्रसूर्ययोः । रसानां शोषणं सम्यङ्महामुद्राऽभिधीयते — ध्या. बिं. ९१
शोभनः शोभमानः कल्याणः — नृ. पू. २।७,११
शोभनाशोभनोऽस्म्यहम् — मैत्रे. ३।५
शोषयाशु यथा शोषमेति संसारपादपः — मुक्तिको. २।३८
शौचमिन्द्रियनिग्रहः [मैत्रे. २।२+ — स्कन्दो. ११
शौचं नामद्विविधंबाह्यमाभ्यन्तरंचेति — शांडि. १।१।३
शौनको ह वै महाशालोऽङ्गिरसं भगवन्तं पिप्पलादमपृच्छत् — ब्रह्मो. १
शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ — मुण्ड. १।३
शौर्यं तेजो धृतिर्दाक्ष्यं — भ. गी. १८।४३
श्मशानेषु दिगन्तेषु स एव ललनास्तनः । श्वभिरास्वाद्यते काले लघुपिण्ड इवान्धसः [महो.३।४२+ — याज्ञव. ११
श्यामवर्णे मध्यदले यदा विश्राम्यते मनः । तदा सर्वगुणं ज्ञानं चैतन्यं च मतिर्भवेत् — विश्रामो. १०
श्यामवर्णे वायुदले यदा विश्राम्यते मनः । निद्रालस्यभयं देवि मत्सरे च मतिर्भवेत् — विश्रामो. ६
श्यामं वीरासनासीनं ज्ञानमुद्रोपशोभितम् ।...चिन्तयन्परमात्मानं भानुलक्षं जपेन्मनुम् — रामर. २।४
श्यामाच्छबलंप्रपद्ये, शबलाच्छ्यामं.. — छांदो. ८।१३।१

श्यामां श्यामवपुर्धरां स्रक्स्वरूपां ...भक्षणाद्युनमदां...य एवं वेद स वैष्णवो भवति (तुलसीं) — तुलस्यु. २

श्यालाः सम्बन्धिनस्तथा — भ. गी. १।३४

श्येतमदत्कमदत्कꣳ श्वेतं लिन्दुमाभिगाम् — छांदो. ८।१४।१

श्येनमेवाप्येति यः श्येनमेवास्तमेति — सुबालो. ९।१०

श्येनस्त एकं मुखं तेन मुखेन पक्षिणोऽत्सि तेन मुखेन मामन्नादं कुरु — कौ. त. २।९

श्येनो गृध्राणां स्वधितिर्वनानाꣳसोमः पवित्रमत्येतिरेभन् [महाना. — ८।४+१२।३

श्रद्दधदेव मनुते श्रद्धा त्वेव विजिज्ञासितव्या — छांदो. ७।१९।१

श्रद्दधाना मत्परमाः — भ. गी. १२।२०

श्रद्धया देयम्। अश्रद्धया देयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम् — तैत्ति. १।११।३

श्रद्धया परया तप्तं — भ.गी. १७।१७

श्रद्धया परयोपेताः — भ. गी. १२।२

श्रद्धया मेधा — महाना. १७।१३

श्रद्धयाऽर्चितुमिच्छति — भ. गी. ७।२१

श्रद्धत्स्व सोम्येति स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा — छांदो. ६।१२।३

श्रद्धानुरूपा धीर्देवता — भावनो. ७

श्रद्धा पत्नी (यज्ञस्य) — महाना. १८।१

श्रद्धा भवति भारत — भ. गी. १७।३

श्रद्धामयोऽयं पुरुषः — भ. गी. १७।३

श्रद्धा माता, पितरं सत्यमाहुः — इतिहा. ११

श्रद्धामेधे प्रजाः सन्ददातु स्वाहा — महाना. १४।५

श्रद्धामेधे प्रज्ञा तु जातवेदः सन्ददातु स्वाहा — महाना. १४।६

श्रद्धायामपाने निविश्यामृतꣳ हुतं, अपानमन्नेनाप्यायस्व... — महाना. १६।४

श्रद्धायामपाने निविष्टोऽमृतंजुहोमि — म.ना. १६।२,३

श्रद्धायामुदाने निविश्यामृतꣳ हुतं, उदानमन्नेनाप्यायस्व — महाना. १६।४

श्रद्धायामुदाने निविष्टोऽमृतं जुहोमि — म. ना. १६।२,३

श्रद्धायां प्राणे निविश्यामृतꣳ हुतं, प्राणमन्नेनाप्यायस्व — महाना. १६।४

श्रद्धायां प्राणे निविष्टोऽमृतंजुहोमि — म.ना. १६।२,३

श्रद्धायां व्याने निविश्यामृतꣳ हुतं, व्यानमन्नेनाप्यायस्व — महाना. १६।४

श्रद्धायां व्याने निविष्टोऽमृतं जुहोमि — म.ना. १६।२,३

श्रद्धायाꣳ समाने निविश्यामृतं हुतं, समानमन्नेनाप्यायस्व — महाना. १६।४

श्रद्धायाꣳ समानेनिविष्टोऽमृतंजुहोमि — म.ना. १६।२,३

श्रद्धायाꣳ ह्येव दक्षिणा प्रतिष्ठिता — बृह. ३।९।२१

श्रद्धालुर्मुक्तिमार्गेषु वेदान्तज्ञानलिप्सया। उपायनकरो भूत्वा गुरुं ब्रह्मविदं व्रजेत् — ना. प. ६।२३

श्रद्धावन्तोऽनसूयन्तः — भ. गी. ३।३१

श्रद्धावाननसूयश्च — भ. गी. १८।७१

श्रद्धावान् भजते यो मां — भ. गी. ६।४७

श्रद्धावाँल्लभते ज्ञानं — भ. गी. ४।३९

श्रद्धाविरहितं यज्ञं — भ. गी. १७।१३

श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च — मुंड. २।१।७

श्रद्धासत्यो महस्वान् तपसो वरिष्ठाः — महाना. १७।१४

श्रद्धां भगवो विजिज्ञासे — छांदो. ७।१९।१

श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवति — बृह. ४।३।२२

श्रवणकीर्तनस्मरणवन्दनसेवनोपकरणदास्यभावेनात्मसमर्पणम् — सामर. २

श्रवणमनननिर्विचिकित्सेऽर्थे वस्तुन्येकतानवत्तया चेतःस्थापनं निदिध्यासनं भवति — पैङ्गलो. ३।२

श्रवणं चिन्तनं सेवा सत्कृत्यकरणं तथा। असत्कृत्यपरित्यागो उपायान्तरवर्जनम् ॥ ... आनृशंस्यं सतां सङ्गः पारमैकान्त्यहेतवः — भवसं. ५।१९

श्रवणं तु गुरोः पूर्वं मननं तदनन्तरम्। निदिध्यासनमित्येतत्पूर्णबोधस्य कारणम् — शु. र. ३।११

श्रवणं नास्ति मे सिद्धेर्मननं च
चिदात्मनि — ते. बिं. ३।४६
श्रवणाङ्गुष्ठयोगेनान्तर्हृदयाकाश-
शब्दमाकर्णयन्ति — मैत्रा. ६।२२
श्रवणादेवं प्रतिपद्यन्ते — २ प्रणवो. १७
श्रवणायापि बहुभिर्यो न लभ्यः
शृण्वन्तोऽपि बहवो यं न विद्युः — कठो. २।७
श्रातास्त इन्द्रसोमाः — चित्स्यु. ३।१
श्राद्धकर्ता परश्राद्धं यत्तु भुञ्जीत
लोलुपः । नष्टं भवति तच्छ्राद्धं
रौरवं नरकं व्रजेत् — इतिहा. ४१
श्राद्धं दत्त्वा च भुक्त्वा च अध्वानं
योऽधिगच्छति । पितरस्तस्य
तन्मासं भवन्ते पांसुभोजनाः — इतिहा. ३४
श्राद्धं दत्त्वा च भुक्त्वा च भार-
मुद्वहते द्विजः । पितरस्तस्य
तन्मासं भवन्ते भारपीडिताः — इतिहा. ३३
श्राद्धं दत्त्वा च भुक्त्वा च संक्रमं
न समाचरेत् । पितरस्तस्य
तन्मासं भवन्ते रेतभोजनाः — इतिहा. ३०
श्राद्धं दत्त्वा च भुक्त्वा च सपङ्क्तिः
सहभोजनम् । षण्मासान्पितरो-
ऽश्नन्ति कर्तुरुच्छिष्टभोजनम् — इतिहा. ३१
श्राद्धं भुक्त्वा पुनः श्राद्धं भुञ्जीया-
ज्ञोभमोहितः । नष्टं भवति
तच्छ्राद्धं रौरवं नरकं व्रजेत् — इतिहा. ३२
श्राद्धे सप्त पवित्राणि दौहित्रः
कुतपस्तिलाः (उच्छिष्टं
शिवनिर्माल्यं वमनं मृतकर्पटम्) — इतिहा. ५६
श्राम्यत्येव वाक्, श्राम्यति चक्षुः,
श्राम्यति श्रोत्रम्.. — बृह. १।५।२१
श्रियं च लक्ष्मीं च पुष्टिं च कीर्तिं
चानृण्यताम् — महाना. १४।५
श्रियं देवीमुपह्वये श्रीर्मा देवी-
र्जुषताम् [श्रीसू. ३ — ऋ.खि.५।८७।३
श्रियं लक्ष्मीमौपलामम्बिकां गां
षष्ठीं च यामिन्द्रसेनेत्युदाहु-
स्तां विद्यां ब्रह्मयोनिं सरूपा-
मिहायुषे शरणं प्रपद्ये — नृ. पू. ३।४
श्रियं वासय मे कुले मातरं
पद्ममालिनीम् [श्रीसू.११+ऋ. — खि. ५।८७।११
श्रिया देयम् । ह्रिया देयम् ।
भिया देयम् । संविदा देयम् — तैत्ति. १।११।३
श्रिया हैवाऽभिषिच्यते — सूर्यता. ३।१
[+नृ. पू. १।३+४।३
श्रीकृष्ण रुक्मिणीकान्त गोपी-
जनमनोहर । संसारसागरे मग्नं
मामुद्धर जगद्गुरो — गो. पू. ४।१४
श्रीकृष्णाख्यं परं ब्रह्म गोपिकाः
श्रुतयोऽभवन् । एतत्सम्भोग-
सम्भूतं चन्दनं गोपिचन्दनम् — गोपीचं. २९
(ॐ) श्रीकृष्णाय गोविंदाय
गोपीजनवल्लभाय ॐ तत्सद्भू-
र्भुवः सुवस्तस्मै वै नमो नमः — गोपालो. ३।३
(ॐ) श्रीकृष्णाय देवकीनन्द-
नाय ॐ तत्सद्भूर्भुवः सुवस्तस्मै
वै नमो नमः — गोपालो. ३।९
(ॐ) श्रीकृष्णाय रामाय ॐ
तत्सद्भूर्भुवः सुवस्तस्मै वै
नमो नमः — गोपालो. ३।७
(ॐ) श्रीकृष्णायानिरुद्धाय
ॐ तत्सद्भूर्भुवः सुवस्तस्मै
वै नमो नमः — गोपालो. ३।५
श्रीकृष्णो भगवान् नारायणः
परमात्मा पुरुषोत्तमः त्रिगुण-
रहितः स्वयम् — वि. सि. ३
श्रीकृष्णो वै परमं दैवतम् — गो. पू. १।१
श्रीगणपतेरेनं मन्त्रराजमन्योन्या-
भावात् प्रणवरूपस्यास्य पर-
मात्मनोऽङ्गानि जानीते, स
जानाति — ग. शो. ५।१
(ॐ)श्रीगुरुः सर्वकारणभूता शक्तिः — भावनो. २
श्रीचूर्णं श्रीकरं दिव्यं श्रियश्चाङ्गे
समुद्भवम् । पुण्ड्रं च यस्य मध्ये
तु धार्यं मोक्षार्थिभिः स्मृतम् — ऊर्ध्वपुं. ४
(ॐ) श्रीगोपालाय निर्मलस्व-
रूपाय ॐ तत्सद्भूर्भुवः
सुवस्तस्मै वै नमो नमः — गोपालो. ३।११

श्रीतुलस्यै विद्महे विष्णुप्रियायै धीमहि। तन्नो अमृता प्रचोदयात् तुलस्यु. ३
श्रीतुलस्यै स्वाहा विष्णुप्रियायै स्वाहा। अमृतायै स्वाहा तुलस्यु. २
श्रीदेवी त्रिविधं रूपं कृत्वा भगवत्सङ्कल्पानुगुण्येन लोकरक्षणार्थं रूपं धारयति सीतो. ९
श्रीपरमधाम्ने स्वस्ति चिरायुष्योत्तम इति स्कन्दो. १३
श्रीपर्वतं शिरस्स्थाने केदारं तु ललाटके। वाराणसी महाप्राज्ञ भ्रुवोर्घ्राणस्य मध्यमे जा. द. ४।४८
श्रीभूमिर्नीलात्मिका भद्ररूपिणी प्रभावरूपिणी सोमसूर्याग्निरूपा भवति सीतो. ८
श्रीमत्पुरुषसूक्तार्थं पूर्णानन्दकलेवरम्। पुरुषोत्तमविख्यातं परं ब्रह्म भवाम्यहम् मुद्गलो. शीर्षकं
श्रीमदूर्जितमेव वा भ. गी. १०।४१
श्रीमन्नारायणचरणौ शरणं प्रपद्ये त्रि.म.ना.७।१०
श्रीमन्नारायणाकारमष्टाक्षरमहाशयम्। स्वमात्रानुभवात्सिद्धमात्मबोधं हरिं भजे आत्मप्र.शीर्षकं
श्रीमन्नारायणाष्टाक्षरानुस्मरणेन गायत्र्याः शतसहस्रं जप्तं भवति तारसा. ३।९
श्रीमन्नारायणे मय्यचला भक्तिश्च भवति वासुदे. १७
श्रीमन्नारायणो ज्योतिरात्मा नारायणः परः। नारायणपरं ब्रह्म नारायण नमोऽस्तु ते त्रि.म.ना. ७।११
श्रीमहालक्ष्म्यै नम इति सप्ताक्षरो मन्त्रः ना.पू.ता.२।१
श्रीमहाविष्णवे तुभ्यं नमो नारायणाय च। गोविन्दाय च रुद्राय हरये ब्रह्मरूपिणे ना.पू.ता. ३।५
श्रीमानजो धीमाननिर्देश्यः सर्वसृक् सर्वस्यात्मा मैत्रा. ७।१
श्रीरामचन्द्रसेवक ॐ ह्रां ह्रां ह्रां आसय आसय लाङ्गूलो. ८
श्रीरामतापिनीयार्थं भक्तध्येयकलेवरम्। विकलेवरकैवल्यं श्रीरामब्रह्म मे गतिः रा. पू. शीर्षकं
श्रीरामतारकपरब्रह्मविश्वरूपदर्शन..स्थलजलाग्निमर्मभेदिन् सर्वशत्रून् छिन्धि छिन्धि लांगूलो. ३
श्रीरामसन्निधौ मौनी मन्त्रार्थमनुचिन्तयन्। व्याघ्रचर्मासने स्थित्वा स्वस्तिकाद्यासनक्रमात्॥ ...अभ्यर्च्य वैष्णवे पीठे जपेदक्षरलक्षकम् रामर. ४।५
श्रीरामसान्निध्यवशाज्जगदा(नन्द) धारकारिणी। उत्पत्तिस्थितिसंहारकारिणी सर्वदेहिनाम्॥ सीता भगवती ज्ञेया मूलप्रकृतिसंज्ञिता [सीतो. ४+ रामो. १।५,६
श्रीरामस्य मनुं काश्यां जजाप वृषभध्वजः रामो. ता. ३।४
श्रीरामः शरणं मम (अष्टारमन्त्रः) रामर. २।३८
श्रीरामः सामात्मकोऽपि अकारः। श्रीकृष्णः अर्धमात्रात्मकोऽपि राधो. २।२
श्रीरामो ब्रह्म तारकम् रामर. १।६
श्रीरिति लक्ष्मीरिति लक्ष्यमाणा भगवतीति विज्ञायते सीतो. ९
श्रीर्मे भजतु, अलक्ष्मीर्मे नश्यतु महाना. ५।८
श्रीर्ह वा एषां स्त्रीणां यन्मलोद्वासाः, तस्मान्मलोद्वाससं यशस्विनीमभिक्रम्योपमंत्रयेत बृह. ६।४।६
श्रीलक्ष्मीर्वरदा विष्णुपत्नी वसुप्रदा हिरण्यरूपा सौभाग्य. ४
श्रीवत्सकौस्तुभवनमालाङ्कितवक्षसं...निरतिशयाद्वैतपरमानन्दलक्षणमादिनारायणं ध्यायेत् त्रि.म.ना.७।१४
श्रीवत्सकौस्तुभोरस्कं मुक्तामणिविभूषितम्।...एवं ध्यायेन्महाविष्णुमेवं वा विनयान्वितः ध्या. बिं. २८
श्रीवत्सस्य स्वरूपं तु वर्तते लाञ्छनैः सह। श्रीवत्सलक्षणं तस्मात्कथ्यते ब्रह्मवादिभिः गोपालो. २।२७

श्रीविष्णुं सर्वेश्वरं भजन्ति यज्ञोप. १
श्रीवैष्णवा भुवनमाशु पवित्रयन्ति सुदर्श. १३
श्रीश्च लक्ष्मीश्च पुष्टिश्च कीर्तिं
चानृण्यतां ब्रह्मण्यं बहुपुत्रताम्।
श्रद्धामेधे प्रज्ञा तु जातवेदः
सन्ददातु स्वाहा महाना. १४।६
श्रीसखि त्वं सदानन्दे मुकुन्दस्य
सदा प्रिये। वरदाभयहस्ताभ्यां
मां विलोकय दुर्लभे ! तुलस्यु. ५
श्रीसरस्वतिरूपा पदक्रममन्त्र-
ब्राह्मणकल्पशरीरा सावित्री
गोत्रे ब्रह्मदेया भवति सन्ध्यो. २३
श्री पावका नः सरस्वती वाजे-
भिर्वाजिनीवती। यज्ञं वष्टु
धिया वसु [सरस्व. १०+ ऋ.मं. १।३।१०
श्री श्री सोऽहमर्कमहमहं ज्योतिरहं
शिवः। आत्मज्योतिरहं शुक्रः
सर्वज्योतीरसोऽस्म्यहम् वनदु. १२२
श्रुतं चाश्रुतं चानुभूतं चाननुभूतं
च सच्चासच्च सर्वं पश्यति प्रश्नो. ४।५
श्रुतं मे गोपाय [तैत्ति. १।४।१+ ना. प. ४।४५
श्रुतं मे मा प्रहासीः श्वेत. शां.पा.
श्रुतं श्रुतमेवार्थमनुशृणोति देश-
दिगन्तरैश्च प्रत्यनुभूतं पुनः
पुनः प्रत्यनुभवति प्रश्नो. ४।५
श्रुतं सर्वमसद्विद्धि वेदं सर्वम-
सत्सदा। शास्त्रं सर्वमसद्विद्धि,
ह्यहं सत्यचिदात्मकः ते. बिं. ३।५०
श्रुतꣳ ह्येव मे भगवद्दृशेभ्यः
[छांदो. ४।९।३+ ७।१।३
श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः
परमं पदम् भवसं. ३।५
श्रुतिविप्रतिपन्ना ते भ. गी. २।५३
श्रुतिशास्त्राण्यहम्। मन्त्रोऽहम् अद्वै. भा. २
श्रुतिस्मृतिसदाचारधारणध्यान-
कर्मणः। गुरूपया व्याख्यया
व्याताच्छ्रयति श्रेष्ठपण्डिताम् अक्ष्युप. १४
श्रुतेनापिहिता गुहा इतिहा. १६

श्रुतो विस्तरशो मया भ. गी. ११।२
श्रुत्याचार्योपदेशेन मुनयो यत्पदं
ययुः। तत्स्वानुभूतिसंसिद्धं
स्वमात्रं ब्रह्म भावये मैत्रे. शीर्षकं
श्रुत्या यदुक्तं परमार्थमेव तत्संशयो
नात्र ततः समस्तम्। श्रुत्या
विरोधे न भवेत्प्रमाणं भवेद-
नर्थाय विनाप्रमाणम् ब्र. वि. ३२
श्रुत्युत्पन्नात्मविज्ञानप्रदीपो बाध्यते
कथम्। अनात्मतां परित्यज्य.. वराहो. २।४९
श्रुत्वा दृष्ट्वा न कम्पेत शोकहर्षौ
त्यजेद्यतिः ना. प. ४।१०
श्रुत्वाऽन्येभ्य उपासते भ. गी. १३।२६
श्रुत्वाऽप्येनं वेद न चैव कश्चित् भ. गी. २।२९
श्रुत्वा स्पृष्ट्वा च भुक्त्वा च दृष्ट्वा
घ्रात्वा च यो नरः। न हृष्यति
ग्लायतिवासविज्ञेयोजितेन्द्रियः ना. प. ३।३९
श्रुत्वा स्पृष्ट्वा च भुक्त्वा च दृष्ट्वा
ज्ञात्वा शुभाशुभम्। न हृष्यति
ग्लायति यः स शान्त इतिकथ्यते महोप. ४।३२
श्रूयते प्रथमाभ्यासे नादो नाना-
विधो महान्। वर्धमाने तथा-
भ्यासे श्रूयते सूक्ष्मसूक्ष्मतः ना. बिं. ३३
श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ
सम्परीत्य विविनक्ति धीरः।
श्रेयो हि धीरोऽभिप्रेयसो
वृणीते प्रेयोमन्दोयोगक्षेमाद्वृणीते कठो. २।२
श्रेयस्त्वं मनसा प्राप्तं तावत्तत्त्वस्य
का कथा अमन. २।५६
श्रेयः परमवाप्स्यथ भ. गी. ३।११
श्रेयान् द्रव्यमयाद्यज्ञात् भ. गी. ४।३३
श्रेयान् वस्यसोऽसानि स्वाहा तैत्ति. १।४।९
श्रेयान् स्वधर्मो विगुणः [भ. गी. ३।३५+१८।४७
श्रेयो धीरोऽभिप्रेयसो..(मा.पा.) कठो. २।२
श्रेयो भोक्तुं भैक्ष्यमपीह लोके भ. गी. २।५
श्रेयोविघ्नाः सर्वे प्रलयं यान्ति त्रि.म.ना. ५।४
श्रेयो हि ज्ञानमभ्यासात् भ. गी. १२।१२
श्रेष्ठं सर्वधातममित्याचामति छांदो. ५।२।७

श्रेष्ठा सर्वगता ह्येषा तृतीया
भूमिकाऽत्र हि — अक्ष्युप. ३२
श्रोतव्यमेवाप्येति यः श्रोतव्य-
मेवास्तमेति — सुबालो. ९।२
श्रोतव्यस्य श्रुतस्य च — भ. गी. २।५२
श्रोता मन्ता द्रष्टा देष्टा घोष्टा
विज्ञाता प्रज्ञाता । सर्वेषां
भूतानामन्तरपुरुषः स म
आत्मेति विद्यात् — ३ ऐत. २।४।८
श्रोता मन्ता द्रष्टा देष्टा स्प्रष्टा
घोष्टा विज्ञाता प्रज्ञाता सर्वेषां
पुरुषाणामन्तःपुरुषः स
आत्मा विज्ञेय इति — त्रि. ता. ५।१
श्रोता घ्राता रसयिता नेता कर्ता
विज्ञानात्मा पुरुषः — १ आत्मो. २
श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र
त्वम्पदेरितम् — शु. र. ३।६
श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणास्तद्वृत्तयः — पैङ्गलो. २।४
श्रोत्रपतिर्विज्ञानपतिः, एतत्ततो
भवति — तैत्ति. १।६।२
श्रोत्रमध्यात्मं शब्दश्रवणमिती-
न्द्रियाण्यन्वभवन् — २ प्रणवो. ३
श्रोत्रमयः पृथ्वीमय आपोमयः — बृह. ४।४।५
श्रोत्रमस्मात्सर्वाञ्छब्दानभि-
विसृजते — कौ. त. ३।४
श्रोत्रमाकाशे वायौ त्वगग्नौ चक्षु-
रप्सु जिह्वा पृथिव्यां घ्राणमिति — शारीरको. १
श्रोत्रमात्मनि चाध्यस्तं स्वयं
पशुपतिः पुमान् । अनुप्रविश्य
श्रोत्रस्य ददाति श्रोत्रतां शिवः — पा. ब्र. १६
श्रोत्रमुदक्रामदशृण्वन्नश्नन्पिबन्नास्तैव — १ ऐत. १।४।४
श्रोत्रमुद्गीथमुपासाञ्चक्रिरे तद्धा-
सुराः पाप्मना विविधुः — छांदो. १।२।५
(अथ ह) श्रोत्रमूचुस्त्वं न उद्गायेति
तथेति तेभ्यः श्रोत्रमुदगायद्यः
श्रोत्रे भोगस्तं देवेभ्य आगायत् — बृह. १।३।५
श्रोत्रमेव ब्रह्मणश्चतुर्थः पादः — छांदो. ३।१८।६
श्रोत्रमेवाप्येति यः श्रोत्रमेवास्तमेति — सुबालो. ९।२
श्रोत्रमेवायतनमाकाशः प्रतिष्ठानन्त
इत्येनदुपासीत — बृह. ४।१।५
श्रोत्रमेवास्या एकमङ्गमुदूढं, तस्य
शब्दः परस्तात्प्रतिविहिता
भूतमात्रा — कौ. त. ३।५
श्रोत्रयोः शब्दग्रहणं, जिह्वायाः... — ना. प. ६।३
श्रोत्रस्य श्रोत्रं मनसो मनो यद्वा-
चो ह वाचꣳ स उ प्राणस्य
प्राणश्चक्षुषश्चक्षुरतिमुच्य धीराः
प्रत्यास्माल्लोकादमृता भवन्ति — केनो. १।२
श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः — बृह. ४।४।१८
श्रोत्रं चक्षुः स्पर्शनं च — भ. गी. १५।९
श्रोत्रं च श्रोतव्यं च नारायणः — सुबालो. ६।१
श्रोत्रं ते मयि जुहोम्यसौ स्वाहा — कौ. त. २।४
श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका
चैव पञ्चमम् — दुर्वासो. २।१३
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं चैव
तु पञ्चमम् (षोडश विकाराः) — शारीरको. १३
श्रोत्रं दैवꣳ श्रोत्रेण हि तच्छृणोति — बृह. १।४।१७
श्रोत्रं नाम देवतावरोधिनी सा मे-
ऽमुष्मादिदमवरुन्धां तस्यैवस्वाहा — कौ. त. २।३
श्रोत्रं परस्तान्मन आरुन्धे — कौ. त. २।२
श्रोत्रं प्राविशद्दशयदेव — १ ऐत. १।४।६
श्रोत्रं मे त्वयि दधानीति पिता,
श्रोत्रं ते मयि दध इति पुत्रः — कौ. त. २।१५
श्रोत्रं लोको मनो ज्योतिः, यो..
पुरुषं विद्यात्... — बृह. ३।९।१३
श्रोत्रं वाव सम्पत् — छांदो. ५।१।४
श्रोत्रं वै महः, स शब्देनातिग्रहेण
गृहीतः श्रोत्रेणहिशब्दाञ्छृणोति — बृह. ३।२।६
श्रोत्रं वै ब्रह्म — बृह. ४।१।५
श्रोत्रं वै सम्पत् — बृह. ६।१।४
श्रोत्रं वै सम्राट् परमं ब्रह्म — बृह. ४।१।५
श्रोत्रं शृण्वत् सर्वे प्राणा अनु-
शृण्वन्ति — कौ. त. ३।२
(यः) श्रोत्रं संश्रावयितृ संश्रावयितृ-
मान्भवति (प्राणस्य ब्रह्मणः) — कौ. त. २।१
श्रोत्रं सर्वैः शब्दैः सहाप्येति
(पुरुषं) [कौ. त. ३।३+ ४।१९

श्रोत्रं होत्रकाम, तत्संवत्सरं प्रोष्य (आगत्य)पर्येत्योवाच... [छांदो. ५।१।१०+	बृह. ६।१।१०
श्रोत्रः प्रातिश्रुत्कस्तेजोमयोऽमृतमयः पुरुषः	बृह. २।५।६
श्रोत्राक्षिकटिगुल्फप्राणगलस्फिग्देशेषु व्यानः सञ्चरति	शांडि. १।४।७
श्रोत्रादीनि ज्ञानेन्द्रियाणि	शारीरको. ९
श्रोत्रादीनीन्द्रियाण्यन्ये	भ. गी. ४।२६
श्रोत्राद्दिशः (निरभिद्यन्त)	२ ऐत. १।४
श्रोत्राद्वायुश्च प्राणश्च हृदयात्सर्वमिदं जायते	सुबालो. १।५
श्रोत्राय स्वाहाऽऽयतनाय स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति...	बृह. ६।३।२
श्रोत्रियस्य चाकामहतस्य, ते ये शतं मनुष्यगन्धर्वाणामानन्दाः	तैत्ति. २।८
श्रोत्रियस्य चाकामहतस्य ते ये शतं देवगन्धर्वाणामानन्दाः	तैत्ति. २।८
श्रोत्रियस्य...ते ये शतमाजानजानां देवानामानन्दाः	तैत्ति. २।८
श्रोत्रियस्य...ते ये शतं देवानामानन्दाः	तैत्ति. २।८
श्रोत्रियस्य...ते ये शतं कर्मदेवानां देवानामानन्दाः	तैत्ति. २।८
श्रोत्रियस्य...ते ये शतं पितॄणां चिरलोकलोकानामानन्दाः	तैत्ति. २।८
श्रोत्रियस्य...ते ये शतमिन्द्रस्यानन्दाः	तैत्ति. २।८
श्रोत्रियस्य...ते ये शतं प्रजापतेरानन्दाः	तैत्ति. २।८
श्रोत्रियस्य...ते ये शतं बृहस्पतेरानन्दाः	तैत्ति. २।८
श्रोत्रियस्य दारेण नोपहासमिच्छेत्	बृह. ६।४।१२
श्रोत्रियस्य...स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः	तैत्ति. २।८
श्रोत्रियं ब्रह्मनिष्ठं स्वगुरुं गच्छेद्यथाविधि	रुद्रहृ. ३५
श्रोत्रियान्नं न भिक्षेत श्रद्धाभक्तिबहिष्कृतम् । व्रात्यस्यापि गृहे भिक्षेच्छ्रद्धाभक्तिपुरस्कृते	१ सं.सो.२।६४
श्रोत्रे आघारौ (शारीरयज्ञस्य)	प्रा. हो. ४।२
श्रोत्रे चित्तस्य संयमाद्यमलोकज्ञानम्	शांडि. १।७।५२
श्रोत्रेण सर्वाञ्छब्दानाप्नोति	कौ. त. ३।४
श्रोत्रेण सृष्टा दिशश्च चन्द्रमाश्च	१ ऐत. १।७।५
श्रोत्रेण हि तच्छृणोति	बृह. १।४।१७
श्रोत्रेण हि शब्दाञ्छृणोति	बृह. ३।२।६
श्रोत्रे तृप्यति चन्द्रमास्तृप्यति	छांदो. ५।२०।२
श्रोत्रे पक्षसी चक्षुषी युक्ते	१ ऐत. ३।८।६
श्रोत्रे हीमे सर्वे वेदा अभिसम्पन्नाः	बृह. ६।१।४
श्रोष्याम्यहमिति श्रोत्रम्	बृह. १।५।२१
श्रौताश्रौतेषु धारणम् । वेदोक्तविधिना श्रौतं तद्रहितमश्रौतम्	लिङ्गोप. २
श्रौते स्मार्ते च विश्वासो यत्तदास्तिक्यमुच्यते	जा. द. २।६
श्लक्ष्णं बलवदिन्द्रस्य	छांदो. २।२२।१
श्लेष्मणो रसः । रसाच्छोणितम् । शोणितान्मांसम् । मांसान्मेदः । मेदसः स्नावा । स्नावोऽस्थीनि । अस्थिभ्यो मज्जा । मज्जातो रेतः	निरुक्को. १।२
श्लेष्ममूत्रपुरीषेषु दुर्गन्धे जन्मसम्भवे । व्याधिशोकगणे घोरे ममत्वं हि शरीरके	दुर्वासो. २।८
श्लेष्मादि धनञ्जयकर्म	शांडि. १।४।९
श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि	बृह. ४।१।२
श्वयोनिं वा सूकरयोनिं वा चाण्डालयोनिं वा पापाचारा गच्छन्ति	छांदो. ५।१०।७
श्वशुरान् सुहृदश्चैव	भ. गी. १।२६
श्वःकार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् । नहि प्रतीक्षते मृत्युः कृतं वाऽस्य न वा कृतम्	अवसं. १।१८
श्वानेन सागरे पीते निःशेषेण मनो भवेत्	ते. बिं. ६।९६
श्वानो वैनदद्युर्वैयाऽसि	बृह. ३।९।२५

श्वासद्वयलयेनापि कूर्मवातादि-
वायवः । न वर्तन्ते च साधूनां
बन्धं कुर्वन्ति धातवः अमन. १।३७

श्वासमात्रलयेनापि तेन प्राप्या
हि वायवः अमन. १।३६

श्वाससूत्रसमोपेतमिन्द्रियालय-
सङ्कुलम् । त्रोटयित्वा मनोजालं
मीनवज्जायते सुखी अमन. २।८५

श्वासोछ्वासविहीनस्तु निश्चितं मुक्त
एव सः अमन. २।५८

श्वासोच्छ्वासात्मकः प्राणः षड्भिः
प्राणैः पलं स्मृतम् । पलैः
षष्टिभिरेव स्याद्घटिका
कालसम्मिता अमन. १।३३

श्वित्री कुष्ठी तथा चैव कुनखी...
एते गुणा न वक्तव्याः श्राद्धकर्म-
बहिष्कृताः (ब्राह्मणाः) इति. ७२–७६

श्वेतास्तु ब्राह्मणा ज्ञेयाः क्षत्रिया
रक्तवर्णकाः । पीतास्तु वैश्या
विज्ञेयाः कृष्णाः शूद्रा उदाहृताः रु. जा. ९

श्वेतकेतु-ऋभु-निदाघ-ऋषभ-
दुर्वासःसंवर्तकदत्तात्रेयरैवतक-
वदव्यक्तलिङ्गः ना. प. ३।८७

श्वेतकेतुर्ह वा आरुणेयः पाञ्चालानां
परिषदमाजगाम बृह. ६।२।१

(ॐ) श्वेतकेतुर्हारुणेय आस तं
ह पितोवाच छांदो. ६।१।१

श्वेतकेतुर्हारुणेयः पञ्चालानां
समितिमेयाय छांदो. ५।३।१

श्वेतकेतो यन्नु सोम्येदं महामना
अनूचानमानी... छांदो. ६।१।२

श्वेतकेतो वस ब्रह्मचर्यं, न वै
सोम्यास्मत्कुलीनोऽननूच्य
ब्रह्मबन्धुरिव भवतीति छांदो. ६।१।१

श्वेतमेवाप्येति, यः श्वेतमेवास्तमेति सुबालो. ५।१२

श्वेतमृद्देवि पापघ्ने विष्णुदेहंसमुद्भवे ।
...धारणान्मुक्तिदा भव ऊर्ध्वपुं. ३

श्वेतं रश्मिं बोभुज्यमानम् चित्त्यु. ११।९

श्वेतः खुरविषाणाभ्यां मुखे पुच्छे
च पाण्डुरम् । रोहितो यस्तु
वर्णेन स लीलो वृष उच्यते इतिहा. ९६

श्वेतो रश्मिः परि सर्वं बभूव चित्त्यु. ११।१०

श्वोभावा मर्त्यस्य यदन्तकैतत्
सर्वेन्द्रियाणां जरयन्ति तेजः ।
अपि सर्वं जीवितमल्पमेव तवैव
वाहास्तव नृत्तगीते कठो. १।२६

ष

षट्कोणेषु तारया हंसः सोऽहमिति सूर्यता. ६।१

षट्चक्रवासिनि वागीश्वरि
जिह्वाग्रे वस हंसषोढो. २

षट्चक्राणि परिज्ञात्वा प्रविशेत्
सुखमण्डलं (खे)
[यो. शि. ६।७४+ योगकुं.३।९,१२

षट्चक्रं षोडशाधारं त्रिलक्ष्यं
व्योमपञ्चकम् । स्वदेहे यो न
जानाति तस्य सिद्धिः कथं भवेत् यो. चू. ३

षट्त्रिंशतं गले दद्याद्बाह्वोः
षोडश षोडश (रुद्राक्षान्) रु. जा. १६

षट्पत्रं चक्रं भवति नृ. पू. ५।२

षट्शतानि दिवारात्रौ सहस्राण्येक-
विंशतिः । एतत्सङ्ख्यान्वितं
मन्त्रं जीवो जपति सर्वदा ॥
अजपा नाम गायत्री योगिनां
मोक्षदा सदा यो. चू. ३२

षट्शतान्यधिकान्यत्र सहस्राण्येक-
विंशतिः । अहोरात्रवहैः
श्वासैर्वायुमण्डलघाततः...
तत्पृथ्वीमण्डले क्षीणे वलिरा-
याति देहिनाम् वराहो. ५।३,४

षट्शास्त्राणि जायन्ते पुरुषोत्तमात् सि. त्रि. २

षट्सु पत्रेषु षडक्षरं सुदर्शनं भवति नृ. पू. ५।२०

षट्स्वरारूढेन बीजेन, षडङ्गं
रक्ताम्बुजसंस्थितम् सूर्यो. २
षडक्षरं वा एतत्सुदर्शनं महाचक्रं नृ. पू. ५।९
षडर्णोऽयं महामन्त्रः सर्व-
सिद्धिप्रदायकः सूर्यता. २।४
षडाश्रयमिति कस्मात् ? मधुरा-
म्ललवणतिक्तकटुकषाय-
रसान्विन्दतीति गर्भो. १
षडूर्मिरहितः षड्भावविकारशून्यः
सत्यवाक्...गिरिकन्दरेषु
वसेदेक एव द्वौ वा चरेत्
ग्रामं त्रिभिर्नगरं चतुर्भिर्ग्राम-
मित्येकश्चरेत् ना. प. ७।२
षडूर्मिषड्भावेत्यादिसर्वदोषरहितं...
करतलामलकवत्साक्षादपरोक्षी-
कृत्य कृतार्थतया कामरागादि-
दोषरहितः...एवमुक्तलक्षणो
यः स एव ब्राह्मण इति व. सू. उ. ९
षड्ज-ऋषभ-गान्धार-मध्यम-
पञ्चम-धैवतनिषादाश्चेतीष्टा-
निष्ट-शब्दसंज्ञाः प्रणिधाना-
दशविधा भवन्ति गर्भो. १
षड्जमध्यमसंवाद्या वेदान्
गायन्ति सामगाः गान्धर्वो. ७
षड्जोऋषभगान्धारो मध्यमः पञ्चम-
स्तथा । धैवतोऽथ निषादश्च
स्वराः सप्त प्रकीर्तिताः गान्धर्वो. ३
षड्भावविकृतिश्चास्ति जायते
वर्धतेऽपि च । परिणामं क्षयं
नाशं षड्भावविकृर्ति विदुः वराहो. १।८
षड्भिर्मासैस्तु युक्तस्य नित्यमुक्तस्य
देहिनः । अनन्तः परमो गुह्यः
सम्यग्योगः प्रवर्तते मैत्रा. ६।२८
षड्भिः संवत्सरैर्भूमेरखण्डं लय-
संस्थितः । वायुतत्त्वस्य सिद्धिः
स्याद्वायुतत्त्वमयो भवेत् अमन. १।७७
षड्भूमिकाचिराभ्यासाद्भेदस्यानु-
पलम्भनात् । यत्स्वभावैक-
निष्ठत्वं सा ज्ञेया तुर्यगा गतिः वराहो. २।१०

षड्भैश्च परित्यक्तः स्वाश्रमोक्त-
विधिं चरन् । वनितादिषु वा-
क्कर्ममनोभिर्निःस्पृहः शुचिः रामर. ४।२
षड्रात्रविलयेनापि महाबुद्धिः
प्ररोहति अमन. १।५६
षड्रात्रीर्दीक्षितो भवति सहवै. १२
षड्वक्त्रमपि रुद्राक्षं कार्तिकेयाधि-
दैवतम् । तद्धारणान्महाश्रीः
स्यान्महदारोग्यमुत्तमम् रु. जा. २९
षड्वा ऋतवः, ऋतुभिः सम्मितंभवति नृ. पू. ५।२
षड्वा ऋतवः संवत्सरः सहवै. १२
षड्वान्तराणि वलयानि भवन्ति नृ. षट्च. ४
षड्विकारविहीनोऽस्मि षट्कोश-
रहितोऽस्म्यहम् मैत्रे. ३।१८
षड्विंशकश्च पुरुषः पेशुरक्षः
शिवागमे । सप्तविंश इति
प्रोक्तः शिवः सर्वजगत्पतिः शिवो. १।१४
षड्विंशको महाविष्णुः सदा
द्रष्टा भवति सामर. १०१
षड्विंशदङ्गुलिर्हंसः प्रयाणं कुरुते
बहिः । वामदक्षिणमार्गेण
प्राणायामो विधीयते यो. चू. ९३
षड्विंशः परमात्माऽहमिति निश्चया-
न्मुक्तो भवति मं. ब्रा. १।५
षड्वै नारसिंहानि चक्राणि भवन्ति नृ. षट्च. १
षड्वै बाह्यानि वलयानि भवन्ति नृ. षट्च. ६
षड्वै मध्यमानि वलयानि भवन्ति नृ. षट्च. ५
षड्वीमे लोकाः षड्वा ऋतवो भवन्ति ग. पू. ३।१
षण्ढोऽथ विकलोऽप्यन्धो बालक-
श्चापि पातकी । पतितश्च परद्वारी
वैखानसहरद्विजौ...एते नार्हन्ति
सन्न्यासमातुरेण विना क्रमम् ना. पै. ३।३
षण्णवतितत्त्वतन्तुवद्व्यक्तं चित्सूत्र-
त्रयचिन्मयलक्षणं चिद्ग्रन्थि-
बन्धनम् पा. ब्र. ३
षण्णां योगे षोढा भवेत् षोढोप. २
(अथ) षण्डः पतितोऽङ्गविकलः
स्त्रैणो बधिरोऽर्भको मूकः
पाषण्डश्चक्री लिङ्गी (कुष्ठी)

स

स आगच्छति तिल्यं वृक्षं तं ब्रह्मगन्धः प्रविशति — कौ. त. १।५
स आगच्छत्यारं ह्रदं तन्मनसाऽत्येति — कौ. त. १।४
स आजगाम गौतमोयत्रप्रवाहणस्य जैवलेरास — बृह. ६।२।४
स आजगाम जैवलिं प्रवाहणं परिचारयमाणं... — बृह. ६।२।१
स आत्मन्येवात्मानं परंब्रह्म पश्यति — नृसिंहो. ६।३
स आत्मा तत्त्वमसि [छांदो. ६।८।७+९।४+
[१०।३+११।३+१२।३+ १३।३+१४।३
[+१५।३+१६।३
स आत्मानमभिध्यायन् बह्वीः प्रजा असृजत् — मैत्रा. २।६
स आत्मा परमेश्वरः — महो. ४।११८
स आत्मा प्रजापतेः सभां वेश्म प्रपद्ये यशोऽहं भवामि — छांदो. ८।१।१
स आत्मा स विज्ञेय ईश्वरग्रासस्तुरीयः — नृसिंहो. १।६
सआत्मासविज्ञेयः[माण्डू.७+नृ.पू.४।२ — रामो. २।४
स आत्मा विज्ञेयः — गणेशो. ५।७
स आदित्यस्तदेतदोजोऽन्नाद्यमित्युपासीत — छांदो. ३।१३।१
स आदित्यꣳ स वैश्वदेवꣳ सामाभिगायति — छां. २।२४।११
स आदित्यः कस्मिन्प्रतिष्ठित इति चक्षुषीति — बृह. ३।९।२०
स आदित्येन चक्षुषा भाति च तपति च — छांदो. ३।१८।५
स आदित्यो विष्णुश्चेश्वरश्च — ब्रह्मो. ३
स आदिनारायणोऽहमेव — त्रि.म.ना. ८।६
स आद्यः सोऽक्षरः सोऽनन्तः सोऽव्ययो महान्पुरुषः — गणेशो. २।४
स आपः प्रदुघे उभे इमे अन्तरिक्षमथो सुवः — महाना. १।९
स आप्तोर्यामेण सर्वैः क्रतुभिर्यजते — ग. शो. ५।३
स आयुर्यशःकीर्तिज्ञानैश्वर्यवान्भवति — नृ. पू. १।३
स आहाद्राक्षमिति तत्सत्यं भवति — बृह. ४।१।४

स इतः प्रयन्नेव पुनर्जायते तस्य तृतीयं जन्म — २ ऐत. ४।४
स इत्येकमक्षरं, तीत्येकमक्षरं, यमित्येकमक्षरं, प्रथमोत्तरेऽक्षरे सत्यं मध्यतोऽनृतं तदेतदनृतमुभयतः सत्येन परिगृहीतꣳ सत्यभूयमेव भवति — बृह. ५।५।१
स इत्येकमेव परं ब्रह्म विभ्राजते निर्वाणम् — त्रि. ता. ५।१
स इदं विश्वं भुवनं विचष्टे — ३ऐत. १।६।७
स इदं सर्वमभ्यपवयत यदिदं किञ्च — १ ऐत. २।२।४
स इदं सर्वं पाप्मनो त्रायते यदिदं किञ्च — १ ऐत. २।१।६
स इदꣳ सर्वमभिप्रागाद्यदिदं किञ्च — १ ऐत. २।२।३
स इदꣳ सर्वं भवति — बृह. १।४।१०
स इदं सर्वं मध्यतो दधे यदिदं किञ्च — १ ऐत. २।१।२
स इदं सर्वं स मे ददातु — चित्यु. ७।४
स इदित्था बोभवीदाशयध्यै — बा. मं. १८
स इद्देवो ऋतमन्व (?त्य) यन्तं प्रभीमकर्मातपसोऽपविद्धात् — बा. मं. ४
स इन्द्रः स इन्दुः स सूर्यः स वायुः सोऽग्निः स ब्रह्मायम् (गणेशः) — गणेशो. २।१
स इममेवात्मानं द्वेधाऽपातयत्... — बृह. १।४।३
स इमाँल्लोकानसृजत (परमात्मा) — २ ऐत. १।२
स इरामयो यद्धीरामयस्तस्माद्धिरण्मयः — १ ऐत. १।३।१
स इह कीटो वा पतङ्गो वा शकुनिर्वा शार्दूलो वा सिंहो वा मत्स्यो वा परः श्वा पुरुषो वाऽन्यो वैतेषु स्थानेषु प्रत्याजायते... — कौ. त. १।२
स ईक्षत कतरेण प्रपद्या इति — २ ऐत. ३।११
स ईक्षत कथं न्विदं मदृते स्यादिति — २ ऐत. ३।११
स ईक्षत यदि वाचाऽभिव्याहृतं यदि प्राणेनाभिप्राणितं...यदि शिश्नेन विसृष्टमथ कोऽहमिति — २ ऐत. ३।११
स ईक्षत लोकान्नु सृजा इति — २ ऐत. १।१

स ईक्षतेमे नु लोका लोकपालान्नु सृजा इति — २ ऐत. १।३
स ईक्षतेमे नु लोकाश्च लोकपालाश्चान्नमेभ्यः सृजा इति — २ ऐत. १।३
स ईक्षांचक्रे यस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि — प्रश्नो. ६।३
स ईयतेऽमृतो यत्र कामम्५ हिरण्मयः पुरुष एकहं५सः — बृह. ४।३।१२
स ईश्वरो भवति — गणेशो. ५।८
स ई पाहि य ऋजीषी (तरुत्रः) तरुद्रः स श्रियं लक्ष्मीमौपलामम्बिकां गाम्। षष्ठीं च यामिन्द्रसेनेत्युदाहुस्तां विद्यां ब्रह्मयोनिस्वरूपाम् [नृ.पू.३।४+ — ग. पू. २।३
स उक्थेन यजते — नृ. पू. ९।१४
स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते — बृह. ३।२।११
स उत्क्रामन् म्रियमाणः पाप्मनो विजहाति — बृह. ४।३।८
स उत्तमः पुरुषः — छांदो. ८।१२।३
स उद्गाता, स मुक्तिः, साऽतिमुक्तिः — बृह. ३।१।५
स उद्गीथः प्रति स्त्री सह शेते — छांदो. २।१३।१
स उद्गीथोऽङ्गारा भवन्ति — छांदो. २।१२।१
स उद्गीथो विद्योतते, स्तनयति स प्रतिहारः [छांदो. २।३।१+ — २।१५।१
स उपपातकमहापातकेभ्यः पूतो भवति — ना.उ.ता. ३।१
स उ प्राणस्य प्राणः — केनो. १।२
स उल्बावृतो गर्भो दश वा नव वा मासानन्तः शयित्वा यावद्वाऽथ जायते — छांदो. ५।९।१
स उ ह तूष्णीमेव शिश्ये, तत उ हैनं यष्ट्या विचिक्षेप — कौ. त. ४।१८
स ऊर्जमुपजीवतीति प्रश५सा — बृह. १।५।२
स ऊर्जमुपजीवतीति श्लोकाः — बृह. १।५।१
स ऋग्भिर्ऋग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्यः सा प्रथमः पादो भवति — नृसिंहो. ३।२
स ऋग्भिर्ऋग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्यः सा साम्नः प्रथमो पादो भवति — नृ. पू. २।१
स ऋचोऽधीते स यजूंष्यधीते स सामान्यधीते सोऽथर्वणमधीते — नृ. पू. ९।१५
स एक आजानजानां देवानामानन्दः — तैत्ति. २।८
स एक आजानदेवानामानन्दः — बृह. ४।३।३३
स एक इन्द्रस्यानन्दः — तैत्ति. २।८
स एक एव वरोहवैद्वितनुर्नारायणोऽखिलब्रह्माण्डाधिपतिरेकः — राधिको. ३
स एकधा भवति, त्रिधा भवति — छांदो. ७।२६।२
स एकः कर्मदेवानामानन्दः ये कर्मणा देवत्वमभिसम्पद्यन्ते — बृह. ४।३।३३
स एकः पञ्चविंशतिः पुरुषः — महो. १।२
स एकः कर्मदेवानां देवानामानन्दः — तैत्ति. २।८
स एकः पितॄणां चिरलोकलोकानामानन्दः — तैत्ति. २।८
स एकः पितॄणां जितलोकानामानन्दः — बृह. ४।३।३३
स एकः प्रजापतिलोक आनन्दः — बृह. ४।३।३३
स एकः प्रजापतेरानन्दः — तैत्ति. २।८
स एकः श्रेष्ठश्च सर्वशास्ता स एव वरिष्ठश्च — शरभो. ५
स एकः स य एवंवित् — तैत्ति. २।८
स एकाकी नर एव — चतुर्वे. १
स एकाकी न रमते — महो. १।१
स एकैकः साधारः साधिष्ठानो नाधिष्ठानः कं कं कस्मै पदे पदे पातः पादाय पादिते स्वाहा — पारमा. ५।१०
स एको गन्धर्वलोक आनन्दः — बृह. ४।३।३३
स एको देवगन्धर्वाणामानन्दः — तैत्ति. २।८
स एको देवः शिवरूपी दृश्यत्वेन विकासते — त्रि. ता. १।५
स एको देवानामानन्दः — तैत्ति. २।८
स एको बृहस्पतेरानन्दः — तैत्ति. २।८
स एको ब्रह्मण आनन्दः — तैत्ति. २।८
स एको ब्रह्मलोक आनन्दः — बृह. ४।३।३३

स एको मनुष्यगन्धर्वाणामानन्दः तैत्ति. २।८

स एको मानुष आनन्दः तैत्ति. २।८

स एको रुद्रो ध्येयः सर्वेषां सर्वसिद्धये शरभो. ८

स एतदेव रूपमभिसंविशत्ये· तस्माद्रूपादुदेति छांदो. ३।७।३ [+८।३+९।३+१०।३

स एतमानुष्टुभं मंत्रराजमपश्यत् ग. पू. १।६

स एतमानुष्टुभं षट्पदं मन्त्रराजं कथयाञ्चक्रे ग. पू. १।११

स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिति २ ऐत. ३।१३

स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत २ ऐत. ३।१२

स एतमेवंविद्वांश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते छांदो.४।७।४,४

स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते प्रश्नो. ५।५

स एतं देवयानं पन्थानमाप-(सा-) द्याग्निलोकमागच्छति, स वायुलोकं स वरुणलोकं, स आदित्यलोकं, स इन्द्रलोकं, स प्रजापतिलोकं, स ब्रह्मलोकम् कौ. ब्र. १।३

स एतं प्राञ्चं ग्रावाणमात्मन एव समुदपारयत् तेनैनामभ्यसृजत् बृह. ६।४।२४

स एतं भुसुण्डः कालाग्निरुद्रमगमत् बृ. जा. १।३

स एतं मंत्रराजं नारसिंहमानुष्टुभमपश्यत्तेन वै सर्वमिदमसृजत यदिदं किञ्च नृ. पू. १।१

स एतं मंत्रराजं नारसिंहमानुष्टुभं प्रतिगृह्णीयात् स मृत्युं तरति, स पाप्मानं तरति, स संसारं तरति नृ. पू. २।१

स एतान्पाशान् प्रमुंचन् प्रवेदः सहवै. ९

स एताश्चोपनिषद्भैवस्वतेन्तरे सगुणं ब्रह्म विधिनाऽऽनन्दैकरूपं पुरुषोत्तमरूपेण मथुरायां वसुदेवसद्मन्याविर्भाविष्यति गोपीचं. २७

स एतास्तिस्रो देवता अभ्यतपत्, तासां तप्यमानानांरसान्प्रा· बृहदग्नेर्ऋचो वायोर्यजूंषि सामान्यादित्यात् छांदो. ४।१७।२

स एतांस्तेजोमात्राः समभ्याददानः बृह. ४।४।१

स एतां त्रयीं विद्यामभ्यतपत्तस्यास्तप्यमानाया रसान्प्रावृहद्भूरित्यृग्भ्यो भुवरिति यजुर्भ्यः स्वरिति सामभ्यः छांदो. ४।१७।३

स एतेन प्रज्ञाने-(प्रज्ञे-)नात्मनास्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गेलोके सर्वान्कामानाप्त्वाऽमृतः समभवत् [२ऐत.५।४+ आ. प्र. १

स एतेन रूपेण सर्वा दिशो विष्टोऽस्मि १ ऐत. २।३।४

स एतेभ्यो भगवान्नीललोहितः प्रोवाच सदानं. १

स एनमविदितो न भुनक्ति बृह. १।४।१५

स एनं यजमानमहरहर्ब्रह्म गमयति प्रश्नो. ४।४

स एनान् ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इदं मानवमावर्तं नावर्तन्ते छांदो. ४।१५।६

स एव कर्माणि करोति देवो ह्येको गणेशो बहुधा निविष्टः हेरम्बो. १०

स एव काद्रवेयो...महावायोरहङ्कारं निराचकार सङ्कर्षणो. १

स एव कालातीतः स एवाखिलकर्मातीतः त्रि.म.ना. १।५

स एव काले भुवनस्य गोप्ता विश्वाधिपः सर्वभूतेषु गूढः श्वेताश्व. ४।१५

स एव गुणातीतः स एव कालातीतः त्रि.म.ना. १।५

स एव चिरन्तनः पुरुषः प्रणवाद्यखिलमन्त्रवाचकवाच्य आद्यन्तशून्य आदिदेशकालवस्तुतुरीयसंज्ञानित्यपरिपूर्णः त्रि.म.ना. १।५

स एव जगद्गुरुः स एवाहं विद्धि प. हं. प. ११

स एव जपकोट्या नादमनुभवति हंसो. ६

स एव जाग्रत्परितृप्तिमेति कैव. १२

स एव जातः स जनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतोमुखः [श्वेता.२।१६+अ.शिरः.३।६+ बटुको. २१
स एव जीवः स्वपिति प्रबुद्धः कैव. १४
स एव ज्योतिषां ज्योतिः स एव परमेश्वरः । स एव हि परब्रह्म तद्ब्रह्माहं न संशयः स्कन्दो. ५
स एव तुरीयं ब्रह्म त्रि.म.ना. १।५
स एव तुरीयातीतः स एव विष्णुः त्रि.म.ना. १।५
स एव द्विविधः प्रोक्तः सहितः (कुम्भकः) केवलस्तथा योगकुं. १।२०
स एव द्विविधो बिन्दुः पाण्डरो लोहितस्तथा ध्या. बि. ८६
स एव नित्यकूटस्थः स एव वेदपुरुष इति विदुषो मन्यन्ते प. हं. २
स एव नित्यतृप्तः प. हं. प. ११
स एव नित्यपरिपूर्णः पादविभूतिवैकुण्ठनारायणः त्रि.म.ना. २।६
स एव नित्यपूतः स एव वैराग्यमूर्तिः स एव ज्ञानाकारः स एव वेदपुरुष इति ज्ञानिनोमन्यन्ते तुरीया. २
स एव नित्यं सकलाः समूर्तयः सुरतास्त्वनन्तास्ते जयन्तो वियति क्षयाणां तत्तत्सवित्रे हरते पराय स्वाहा पारमा. ९।१०
स एव परमेश्वरः [त्रि.म.ना.१।५+ स्कन्दो. ५
स एव परंज्योतिः, स एव मायातीतः त्रि.म.ना. १।५
स एवबहुधाजायमानःसर्वान्परिपाति सङ्कर्षणो. १
स एव भगवान् शेषयुगे तुरीयेऽपि ब्राह्मण्यां जायमानो रामानुजो भूत्वा सर्वा उपनिषद् उद्दिधीर्षति सङ्कर्षणो. ३
स एव भगवान् ब्रह्मा सर्वलोकपितामहः महो. ५।१९८
स एव भगवान्युगसन्धिकाले शरदभ्रसन्निकाशो रौहिणेयो वासुदेवः सर्वाणि गदाद्यायुधशास्त्राजन्यमण्डलान्निराचिकीर्षति भूभारमखिलं निचखान सङ्कर्षणो. २
स एव भगवान्युगसन्धिकाले स्वेन रूपेण युगे युगे तेनैव जायमानः ∴..चातुर्वर्ण्यधर्मान्प्रवर्तयति सङ्कर्षणो. २
स एव भगवान् विष्णुर्नारायण उदाहृतः । दासभूतमिदं तस्य ब्रह्मादिसकलं जगत् भवसं. २।४१
स एव मन्त्रराजो भवति ना.पू.ता. २।१
स एव मायातीतः स एव गुणातीतः त्रि.म.ना. १।५
स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम् कैव. १।१२
स एवमास्थाय शरीरमेकम् । मायामयं मोहयतीव सर्वम् हेरम्बो. ९
स एव यस्य प्रसीदति तस्य करतलावकलितं धाम राधिको. ५
स एव योगी स गुरुः स सेव्यः अमन. २।४३
स एव लययोगः स्यात् १ यो. त. २४
स एव वा एषशुद्धःपूतःशून्यः(आत्मा) मैत्रा. २।४
स एव विदितादन्यस्तथैवाविदितादपि । अन्येषामिन्द्रियाणां तु कल्पितानामपीश्वरः पा. ब्र. १८
स एव विष्णुः स एव समस्तब्रह्मवाचकवाच्यः त्रि.म.ना. १।५
स एव विष्णुः स प्राणः, स कालोऽग्निः, स चन्द्रमाः [कैव.८+ कालिको. ७
स एव वेदपुरुष इति विदुषो मन्यन्ते प. हं. २
स एव वेदपुरुषो महापुरुषो यस्तच्चित्तं मय्येवावतिष्ठते प. हं. प. ११
स एव शिवयोगीति कथ्यते भावनो. १०
स एव सत्योपाधिरहितः स एव परमेश्वरः त्रि.म.ना. १।५
स एव सर्वभूतात्मा नर इत्यभिधीयते । यः परः प्रकृतेः प्रोक्तः पुरुषः पञ्चविंशकः भवसं. २।३२
स एव सर्वं यद्भूतं यच्च भव्यं सनातनम् । ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये कैव. १।९
स एव सर्वो भुवनस्य साक्षी हेरम्बो. ७

स एव संसारतारणाय गुरुमाश्रित्य कामादि त्यक्त्वा... नहि मदन्यदिति जातविवेकः ...परिपक्वो भवति — मं. ब्रा. २।७

स एव साक्षाद्विज्ञानी स शिवः स हरिर्विधिः — महो. ४।७६

स एव स्वीकृतवैराग्यात् कर्मफलजन्मालं संसारबन्धनमलमिति विमुक्त्यभिमुखो निवृत्तिमार्गप्रवृत्तो भवति — मं. ब्रा. २।७

स एव हि परब्रह्म तद्ब्रह्माहं न संशयः — स्कन्दो. ५

स एव हि महादेवः स एव हि महाहरिः — स्कन्दो. ४

स एवं जीवस्त्रिविधो भवति — सामर. ९८

स एवंवित्सर्वेषां भूतानामात्मा भवति — बृह. १।५।२०

स एवंविद्वानस्माच्छरीरभेदादूर्ध्व उत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वाऽमृतः समभवत् — २ ऐत. ४।६

स एवाग्निः सलिले सन्निविष्टः, तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय — श्वेताश्व. ६।१५

स एवात्मा भवति (गणेशः) — गणेशो. ५।७

स एवाद्य स उ श्व इति — बृह. १।५।२३

स एवाद्य स उ श्व एतद्वै तत् — कठो. ४।१३

स एवाधस्तात् स उपरिष्टात् — छांदो. ७।२५।१

स एवान्तःकरणसम्भिन्नबोधोऽस्मत्प्रत्ययावलम्बनस्त्वंपदवाच्यो भवति — पैङ्गलो. ३।१

स एवायं पुरुषः स्वयमेव समाराधनतत्परोऽभूत् — सामर. ३

स एवायं पुरुषः स्वरमणार्थं स्वस्वरूपं प्रकटितवान् — सामर. ३

स एवायं मया तेऽद्य — भ. गी. ४।३

स एवाव्यक्तोऽनन्तो नित्यो गोपालः — गोपालो. २।४

स एवाहमस्मि [छांदो.४।११।१+ १२।१+१३।१

स एवाहं विद्धि — प. हं. प. ११

स एवेद५ सर्वम् — छांदो. ७।२५।१

स एवेदमावरीवर्ति भूतम् — अ.शिरः. ३।१४

स एवैष बालाकिर्य एवैष चन्द्रमसि पुरुषस्तमेवाहं ब्रह्मोपास इति — कौ. त. ४।३

स एष इन्द्रः सर्वे यद्गायत्री उद्गीथो वसवः प्रातः सवनमिति — शौनको. २।४

स एष इव एव लोकादयं स लोकः सम्प्रतिष्ठितः — संहितो. ४।१

स एष इह प्रविष्ट आनखाग्रेभ्यः — बृह. १।४।७

स एष कोशो वसुधानस्तस्मिन् विश्वमिद५ श्रितम् — छांदो. ३।१५।१

स एष गिरिश्चक्षुः श्रोत्रं मनो वाक् प्राणस्तं ब्रह्मगिरिरित्याचक्षते — १ ऐत. १।८।२

स एषचैतस्मादर्वाञ्चोलोकाः(मा.पा.) — छां.उ. १।७।६

स एषं जगदाविर्भावतिरोभावहेतुः — सङ्कर्षणो. ३

स एष जीवेनात्मनाऽनुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति — छांदो. ६।११।१

स एष देवः कृतभावभूतः स्वयं विशुद्धो विरजः प्रकाशते — रुद्र. हृ. ४०

स एष देवोऽम्बरगश्च चक्रे, अन्येऽभ्यधिष्ठेत तमो निरुन्ध्यः। हिरण्मयं यस्य विभाति सर्वं, व्योमान्तरे रश्मिमिवांशुनाभिः — एका. उ. ८

स एष निरञ्जनोऽकामत्वेनोज्जृम्भते — त्रि. ता. १।५

स एष नेति नेतीति व्याख्यातं निह्नुते यतः। सर्वमग्राह्यभावेन हेतुनाऽजं प्रकाशते — अद्वैत. २६

स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो नहि सज्जते [बृह.३।९।२६+४।२।४+४।४।२२ +४।५।१५

स एष परमानन्दोऽप्यानन्दो ब्रह्म तत्परम् — २ देव्यु. ३६

स एष परोवरीयानुद्गीथः — छांदो. १।९।२

स एष पाङ्क्तो यज्ञः पाङ्क्तः पशुः पाङ्क्तः पुरुषः पाङ्क्तमिद५ सर्वं यदिदं किञ्च तदिद५ सर्वमाप्नोति — बृह. १।४।१७

स एष पुरुषः पञ्चविधः — १ ऐत. ३।३।२

स एष पुरुषः समुद्रः सर्वं लोकमति १ ऐत. ३।३।१

स एष प्रहितां संयोगोऽध्यात्मम् १ ऐत. १।५।१

स एष प्राणस्त्रेधा विहितः बृह. १।२।३

स एष भस्म ज्योती रुद्राक्ष इति रु. जा. ४४

स एष मुमुक्षुभिर्ध्येयः सङ्कर्षणो. ३

स एष मृत्युश्चैवामृतं च १ ऐत. १।८।४

स एष मोक्षप्रदः; एतत्स्मृत्या
सर्वेभ्यः पाप्मभ्यो मुच्यते सङ्कर्षणो. ३

स एष यज्ञः पञ्चविधोऽग्निहोत्रं
दर्शपूर्णमासौ चातुर्मास्यानि
पशुः सोमः १ ऐत. ३।३।४

स एष यज्ञानां सम्पन्नतमो यत्सोमः १ ऐत. ३।३।४

स एष ये चामुष्मात्पराञ्चो
लोकास्तांश्चाप्नोति छांदो. १।७।७

स एष ये चामुष्मात्पराञ्चो
लोकास्तेषां चेष्टे छांदो. १।७।८

स एष ये चैतस्मादर्वाञ्चो लोका-
स्तेषां चेष्टे छांदो. १।७।६

स एष रसानां रसतमः परमः
परार्ध्योऽष्टमो य उद्गीथः छांदो. १।१।३

स एष वाचश्चित्तस्योत्तरोत्तरि-
क्रमो यद्यज्ञः १ ऐत. ३।३।४

स एष वायुः पञ्चविधः–प्राणो-
ऽपानो व्यान उदानः समानः १ ऐत. ३।३।३

स एष विसुकृतो विदुष्कृतो ब्रह्म
विद्वान्ब्रह्मैवाभिप्रैति कौ. त. १।४

स एष वैश्वानरो विश्वरूपः प्राणो-
ऽग्निरुदयते प्रश्नो. १।७

स एष सङ्कल्पः, सङ्कल्पमुपास्वेति छांदो. ७।४।२

स एष सर्वभूतान्तरात्माऽपहत-
पाप्मा दिव्यो देव एको
नारायणः [सुबालो. ७।२+ अध्यात्मो. १

स एष सर्वस्येशानः सर्वस्याधि-
पतिः सर्वमिदं प्रशास्ति
यदिदं किञ्च बृह. ५।६।१

स एष सर्वस्यै त्रयीविद्याया आत्मा कौ. त. २।६

स एष सर्वात्मकः, स एष...ध्येयः सङ्कर्षणो. ३

स एष सर्वेभ्यः पाप्मभ्य उदितः,
उदेति छांदो. १।६।७

स एष सर्वेषां मोक्षदश्चासीत् मुद्गलो. २।३

स एष संवत्सरसमानश्चक्षुर्मयः
श्रोत्रमयश्छन्दोमयो मनोमयो
वाङ्मय आत्मा ३ ऐत. २।३।५

स एष संवत्सरः प्रजापतिः
षोडशकलः बृह. १।५।१४

स एष ह्योङ्कारश्चतुरक्षरश्चतुष्पाद-
श्चतुश्शिराश्चतुर्मात्रः स्थूलमेत-
द्ध्रस्वदीर्घप्लुत इति अ. शिखो. १

स एषोऽकलोऽमृतो भवति प्रश्नो. ६।५

स एषोऽक्षरसम्मानश्चक्षुर्मयः...
वाङ्मय आत्मा ३ ऐत. २।२।३

स एषोऽक्षरोऽनन्तः रामो. ३।२

स एषोऽग्निर्दिविश्रितः सौरः काला-
ख्योऽदृश्यः सर्वभूतान्यत्ति मैत्रा. ६।२

स एषोऽग्नेरिव प्रज्वलतो रथस्ये-
वोपशब्दितस्तं यदा न शृणुया-
त्तदप्येवमेव विद्यात् ३ ऐत. २।४।६

स एषोऽनन्तः परोवरीयो हास्य
भवति छांदो. १।९।२

स एषोऽन्तरे हृत्पुष्कर एवाश्रितो-
ऽन्नमत्ति मैत्रा. ६।१

स एषोऽन्तश्चरते बहुधा जायमानः मुण्ड. २।२।६

स एषोऽप्सु प्रतिष्ठितो यत्र क्व
चैति तदेव प्रतितिष्ठति बृह. १।२।३

स एषोऽश्वरथः प्रष्टिवाहनो मनो
वाक्प्राणसंहतः ३ ऐत. १।१।३

स एषोऽसपत्नो न सपत्नो नास्य
सपत्नो भवति बृह. १।५।१२

स एषोऽसुः, स एष प्राणः, स एष
भूतिश्चाभूतिश्च १ ऐत. १।८।३

स एषोऽहः सम्मानश्चक्षुर्मयः...
वाङ्मय आत्मा ३ ऐत. २।१।३

स ऐक्षत यदि वा इममभिमंस्ये
कनीयोऽन्नं करिष्ये बृह. १।२।५

स ऐक्षत यदिह वाव इम-
मभिमंस्ये... (मा. पा.) बृ. उ. १।२।५

स ओतः प्रोतश्च विभुः प्रजासु महाना. २।३

स ओमिति वा होद्गामीयते स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छति छांदो. ८।६।५
स ओमित्येतदक्षरमपश्यत् २ प्रणवो. २
सकलतीर्थानि जायन्ते पुरुषोत्तमात् सि. वि. २
सकलब्रह्माण्डमण्डलं स्वप्रकाशं ध्यायेत् भावनो. १
सकलभुवनमाता सन्ततं श्री:श्रियैन: सौभाग्य. २
सकलविलीनतमोमयाभिमान: अ. पू. २।१६
सकलवेदशास्त्रसिद्धान्तरहस्य-जन्माभ्यस्तात्यन्तोत्कृष्टसुकृत-परिपाकवशात्सद्भि: सङ्गोजायते त्रि.म.ना. ५।४
सकलस्य वा एतद्रूपं यत्संवत्सर: मैत्रा. ६।१५
सकलं निष्कलं चैव पूर्णत्वाच्च तदेव हि यो. शि. १।१९
सकलं निष्कलं सकलनिष्कलं चेति शांडि. ३।१।२
(अथ) सकल: साधारोऽमृत-मयश्चतुरात्मा नृसिंहो. ३।३
सकलात्मकाय भीमकर पिङ्गलाक्ष ...स्थलजलाग्निमर्ममेदिन्सर्व-शत्रून् छिन्धि छिन्धि लाङ्गूलो. ३
सकले निष्कले भावे सर्वत्रात्मा व्यवस्थित: ध्या. बिं. ८
सकले सकलो भावो निष्कले निष्कलस्तथा ब्र. वि. ३९
सकलोपनिषन्मय: ना. प. ८।५
सकषायं विजानीयात् समप्राप्तं न चालयेत् अद्वैत. ४४
सकामभिर्जायते तत्र तत्र । पर्याप्त-कामस्य कृतात्मनस्तु इहैव सर्वे प्रविलीयन्ति कामा: मुंड. ३।२।२
सकाम्या निष्काम्या देवानां सर्वेषां भूतानां भवति गोपालो. १।१५
सकाम्या मेरो: शृङ्गे यथा सप्त पुर्यो भवन्ति, तथा निष्काम्या: सकाम्या भूगोपालचक्रे सप्त पुर्यो भवन्ति गोपालो. १।१९

स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिप: [श्वेता. ६।९+ भवसं. २।४३
सकारं च हकारं च जीवो जपति सर्वदा ब्र. वि. १६
सकार: खेचरी प्रोक्त: यो. चू. ८२
सकार: सत्यममृतं प्राप्ति: सोमश्च कीर्त्यते सीतो. २
सकारो ध्यायते जन्तुर्हकारो हि भवेद्ध्रुवम् यो. चू. ८३
स कालेनेह महता भ. गी. ४।२
स कालोऽग्नि: स चन्द्रमा: कालिको. ७
स किं म एतदुपतपसि योऽहमनेन न प्रेष्यामीति छांदो. ३।१६।७
सकुसुको विकुसुको निर्ऋचो यश्च निस्स्वन: सहवै. ५
सकृज्जप्त्वैव शुचि: स पूत: कर्मण्यो भवति अ.शिर:. ३।१६
सकृज्ज्ञानेन मुक्ति: स्यात् सम्य-ग्ज्ञाने स्वयं गुरु: ते. बिं. २।४३
स कृत्वा राजसं त्यागं भ. गी. १८।८
सकृदुच्चारितमात्र: स एष ऊर्ध्व-मन्नमतीत्योङ्कार: अ.शिखो. १
सकृदुच्चारितं येन शिव इत्यक्षर-द्वयम् । बद्ध: परिकरस्तेन मोक्षोपगमनं प्रति शिवो. १।१८
सकृद्दिवा हैवास्मै भवति य एतामेव ब्रह्मोपनिषदं वेद छांदो. ३।११।३
सकृद्दिवा हैवास्मै भवति य एवं विद्वानेतेन.. संधत्ते १ सं.सो. ११३
सकृद्दिवा हैवास्य भवति । य एवं विद्वानेतेनात्मानं सन्धत्ते कठश्रु. ११
सकृद्विभात-सदानन्दानुभवैक-गोचरो ब्रह्मवित्तदैव भवति मं. ब्रा. २।६
सकृद्विभातो ह्येवैष धर्मो धातु-स्वभावत: अ. शां. ८१
सकृद्विभातो ह्येवैष ब्रह्मलोक: छांदो. ८।४।२
सकृं तु दीर्घतपसा मुक्तमप्यति-बद्धवत् अ. पू. १।५६

सक्ताः कर्मण्यविद्वांसः भ.गी. ३।२५
सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत । अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि [ना. पू. ता. ४।६+ ऋ.मं.१०।७१।२
स क्रतून् कल्पयति चित्य. ७।३
स खलु त एतं प्रजापतिर्या इदमेकमन्नमक्षितायुः पुरुषो वाचमीश्वरोऽभिजायते संहितो. ५।१
स खलु ब्रह्मा सृष्टश्चिन्तामापेदे २ प्रणवो. १
स खल्वेवं यो विद्वान् सोपनयनादूर्ध्वमेतानि प्राग्वा त्यजेत् आरुणि. ४९
स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसम्पद्यते, न च पुनरावर्तते छांदो. ८।१५।१
सखा मा गोपायेति दण्डं परिग्रहेत् १ सं. सो. २।९
सखा मा गोपायौजः सखायोऽसीन्द्रस्य वज्रोऽसि वार्त्रघ्नः शर्म मे भव यत्पापं तन्निवारय [आरुणि.३+ना. प. ४।४९+ प. हं. प. ६
सखेति मत्वा प्रसभं यदुक्तं भ.गी. ११।४१
स गणेश अव्यक्तः गणेशो. २।३
स गणेश आत्मा विज्ञेयः गणेशो. १।४
स गणेशो महान्भवति गणेशो. २।२
सगद्गदं भीतभीतः प्रणम्य भ.गी. ११।३५
सगुणनिर्गुणत्वमेत्य एकोऽपि ब्रह्मप्रणवः तुरीयो. २
सगुणनिर्गुणस्वरूपं ब्रह्म त्रि.म.ना. १।३
सगुणनिर्गुणरूपो भवति त्रि.म.ना. २।६
सगुणं ध्यानमेतत्स्यादणिमादिगुणप्रदम् । निर्गुणध्यानयुक्तस्य समाधिश्च ततो भवेत् १ यो.त. १०५
सगुणं मूर्तिध्यानं, निर्गुणमात्मयाथात्म्यम् शांडि. १।८।३
सगुणान् समतीत्यैतान् भ.गी. १४।२६
सगुणो विराट्प्रणवः, संहारो निर्गुणप्रणवः, उभयात्मकोत्पत्तिप्रणवः ना. प. ८।३
सगुणो विराट्प्रणवः तुरीयो. १
स गुरुः सर्वेषां मन्त्राणामुपदेष्टा भवति नृ. पू. ५।८
स गोपाञ्जीवानात्मत्वेन सृष्टिपर्यन्तमालाति गोपालो. २।३
स ग्रामाद्ग्रामं पृच्छन् पण्डितो मेधावी गान्धारानेवोपसम्पद्येत छांदो. ६।१४।२
स घोषो धार्तराष्ट्राणां भ. गी. १।१९
सङ्करस्य च कर्ता स्यां भ. गी. ३।२४
सङ्करो नरकायैव भ. गी. १।४२
सङ्कर्षणाच्च प्रद्युम्नो मनोभूतः स उच्यते ना. महो. ३०
सङ्कल्पत्वं हि बन्धस्य कारणं तत्परित्यज अ. पू. ५।१०२
सङ्कल्पनं स्पर्शनदृष्टिमोहैर्ग्रासाम्बुवृष्ट्या(चा)त्मविवृद्धिजन्म । कर्मानुगान्यनुक्रमेण देही स्थानेषु रूपाण्यभिसम्प्रपद्यते [श्वेता. ५।११+ भवसं. २।२४
सङ्कल्पनं मनो विद्धि सङ्कल्पस्तत्र विद्यते । यत्र सङ्कल्पनं तत्र मनोऽस्तीत्यवगम्यताम् महो. ४।५२
सङ्कल्पनं हि सङ्कल्पः स्वयमेव प्रजायते । वर्धते स्वयमेवाशु दुःखाय न सुखाय यत् महो. ५।१८१
सङ्कल्पनिश्चयस्मरणाभिमानानुसन्धानास्तद्विषयाः पैङ्गलो. २।४
सङ्कल्पपादपं तृष्णालतं छित्त्वा मनोवनम् । विततां भुवमासाद्य विहरामि यथासुखम् १ सं.सो.२।५४
सङ्कल्पप्रभवान् कामान् भ. गी. ६।२४
सङ्कल्पमनसी भिन्ने न कदाचन केनचित् । सङ्कल्पजाते गलिते स्वरूपमवशिष्यते महो. ४।५३
सङ्कल्पमात्रकलनेन जगत्समग्रं सङ्कल्पमात्रकलने हि जगद्विलासः । सङ्कल्पमात्रमिदमुत्सृज निर्विकल्पमाश्रित्य मामकपदं हृदि भावयस्व वराहो. २।४९

सङ्कल्पमात्रसम्भवो बन्धः निरा. उ. २१
सङ्कल्पमूलध्यानादिचिन्ताशत-
समाकुलाः । क्लेशेनापि न
विन्दन्ति प्राप्तव्यं स्थानमीप्सितम् अमन. २।३८
सङ्कल्पमेव यत्किञ्चित्तत्तन्नास्तीति
निश्चिनु तै.बिं. ५।१०५
सङ्कल्परहितोऽस्म्यहम् मैत्रे. ३।७
सङ्कल्पसङ्क्षयवशाद्गलिते तु चित्ते
संसारमोहमिहिका गलिता भवन्ति महो. ५।५३
सङ्कल्पात्मकानि सङ्कल्पे प्रतिष्ठितानि छांदो. ७।४।२
सङ्कल्पादिकं मनो बन्धहेतुः,
तद्वियुक्तं मनो मोक्षाय भवति मं. ब्रा. २।८
सङ्कल्पादेवास्य गन्धमाल्ये समु-
त्तिष्ठतस्तेन गन्धमाल्यलोकेन
सम्पन्नो महीयते छांदो. ८।२।६
सङ्कल्पादेवास्य गीतवादिते समु-
त्तिष्ठतस्तेन गीतवादितलोकेन
सम्पन्नो महीयते छांदो. ८।२।८
सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति,
तेन पितृलोकेन सम्पन्नो
महीयते छांदो. ८।२।१
सङ्कल्पादेवास्य भ्रातरः समु-
त्तिष्ठन्ति, तेन भ्रातृलोकेन
सम्पन्नो महीयते छांदो. ८।२।३
सङ्कल्पादेवास्य मातरः समुत्तिष्ठन्ति,
तेन मातृलोकेन सम्पन्नो महीयते छांदो. ८।२।२
सङ्कल्पादेवास्य सखायः समु-
त्तिष्ठन्ति तेन सखिलोकेन
सम्पन्नो महीयते छांदो. ८।२।५
सङ्कल्पादेवास्य स्वसारः समु-
त्तिष्ठन्ति तेन स्वसृलोकेन
सम्पन्नो महीयते छांदो. ८।२।४
सङ्कल्पादेवास्यान्नपाने समुत्तिष्ठत-
स्तेनान्नपानलोकेन सम्पन्नो
महीयते छांदो. ८।२।७
सङ्कल्पादेवास्य स्त्रियः समुत्तिष्ठन्ति,
तेन स्त्रीलोकेन सम्पन्नो महीयते छांदो. ८।२।९
सङ्कल्पाशानुसन्धानवर्जनं चेत्प्रति-
क्षणम् । करोषि तदचित्तत्वं
प्राप्त एवासि पावनम् महो. ४।६

सङ्कल्पाः कल्पतरवः भावनो. २
सङ्कल्पाद्वाव भूयोऽस्तीति तन्मे
भगवान्ब्रवीतु छांदो. ७।४।३
सङ्कल्पोऽध्यवसायश्च अभिमानो-
ऽवधारणा (मनोधर्माः) वराहो. १।१२
(यः) सङ्कल्पाध्यवसायाभिमान-
लिङ्गः प्रजापतिर्विश्वाक्षः [मैत्रा.+ २।५+४।५
सङ्कल्पो वाव मनसो भूयान् छांदो. ७।४।१
संक्लेशस्योपलब्धेश्च परतन्त्रा-
श्रितता मता अ. शां. २४
सङ्कोचविकासात्मकमहामाया-
विलासात्मक एव सर्वोऽप्य-
विद्याप्रपञ्चः त्रि.म.ना. ३।३
सङ्गत्यागं विदुर्मोक्षं सङ्गत्यागा-
दजन्मता । सङ्गं त्यज त्वं
भावानां जीवन्मुक्तो भवानघ अ. पू. ५।४
सङ्गरहितोऽभ्यानयत् गो. पू. ३।१०
सङ्गस्तेषूपजायते भ. गी. २।६२
सङ्गं त्यक्त्वा करोति यः भ. गी. ५।१०
सङ्गं त्यक्त्वाऽऽत्मशुद्धये भ. गी. ५।११
सङ्गं त्यक्त्वा धनञ्जय भ. गी. २।४८
सङ्गं त्यक्त्वा फलं चैव भ. गी. १८।९
सङ्गं त्यक्त्वा फलानि च भ. गी. १८।६
सङ्गात् सञ्जायते कामः भ.गी. १८।६२
सङ्गीततालयवाद्यवशं गताऽपि
मौलिस्थकुम्भपरिरक्षणधी-
र्नटीव (पुङ्खानुपुङ्खविषयेक्षण-
तत्परोऽपि ब्रह्मावलोकनधियं
न जहाति योगी) वराहो. २।८२
सङ्ग्रामं न करिष्यसि भ. गी. २।३३
सङ्घातश्चेतना धृतिः भ. गी. १३।६
सङ्घाताः स्वप्नवत्सर्वे आत्ममाया-
विव(स-)र्जिताः अद्वैत. १०
स चक्षुषः पंक्तिं पुनाति अ.शिरः. ३।१६
स चतुर्भिश्चतुर्भिरक्षरैरष्टौ वसू-
नजनयत् अव्यक्तो. ६
स चन्द्रमसमागच्छति बृह. ५।१०।१
स चन्द्रमाः स नक्षत्राणि स
चराचरात्मकं जगत् गान्धर्वो. २

स च प्राणायामप्रत्याहारधारणाध्यानसमाधियोगानुमानात्मचिन्तकवटकणिका वा — १ आत्मो. ३
स च पादनारायणो जगत्स्रष्टुं प्रकृतिमजनयत् — मुद्गलो. २।४
स च मे न प्रणश्यति — भ. गी. ६।३०
स च यो यत्प्रभावश्च — भ. गी. १३।४
स च सर्वस्मान्महिम्नो ज्यायान् — मुद्गलो. २।३
स चाक्षुषः पुरुषः, दर्शनाय चक्षुः — छांदो. ८।१२।४
स चानन्तकोटिब्रह्माण्डानामुदयस्थितिलयाद्यखिलकार्यकारणजालपरमकारणकारणभूतो महामायातीतस्तुरीयः परमेश्वरो भवति — त्रि.म.ना. २।६
स चानन्तमहामायाविलासानामधिष्ठानविशेषनिरतिशयाद्वैतपरमानन्दलक्षणपरब्रह्मविलासविग्रहो भवति — त्रि.म.ना. २।६
स चानन्तशीर्षा पुरुष अनन्ताक्षिपाणिपादो भवति — त्रि.म.ना. २।६
स चानन्त्याय कल्पते [श्वेता.५।९+ — भस्मं. २।३९
स चापि तत्प्रत्ययवद्यथोक्तमथास्य मृत्युः पुनरेवाह तुष्टः — कठो. १।१५
स (ओङ्कारः) चाष्टधा भिद्यते—अकारोकार-मकारार्ध-मात्रा-नाद-बिन्दु-कला-शक्तिश्चेति — ना. प. ८।२
स चा:४ शिक्य पुरोवाचोपनिषत् — महाना. ७।६
सचेतनो निचेतनो भवति, सर्वे भवति — गणेशो. २।२
सचेताः प्रकृतिं गतः — भ.गी. ११।५१
सच त्यच्चाभवत् — तैत्ति. २।६
सच सद्धेतुकंनास्ति सद्धेतुकमसत्कुतः — अ. शां. ४०
(सः) सचासच सर्वं पश्यति — सुबालो. ४।२
सचासच सर्वं पश्यति सर्वः पश्यति — प्रश्नो. ४।५
सच्चित्सुखपरिपूर्णतास्मरणं गन्धः — भावनो. ८
सच्चिदानन्दघनज्योतिरभवत् — नृसिंहो. ६।१
सच्चिदानन्दघनज्योतिर्भवति — नृसिंहो. ६।१
सच्चिदानन्दपूर्णात्मसुभवात्मकं सच्चिदानन्दपूर्णात्मानं परं ब्रह्म सम्भाव्याहमित्यात्मानमादाय मनसा ब्रह्मणैकीकुर्यात् — नृसिंहो. ४।२
सच्चिदानन्दपूर्णात्मा सर्वप्रेमास्पदोऽस्म्यहम् — ब्र. वि. १०८
स चिदानन्दमद्वैतं सच्चिदानन्दमद्वयम् — ते. बिं. ६।१
सच्चिदानन्दमात्मानमद्वितीयं ब्रह्म भावयेत् — व. सू. ९
सच्चिदानन्दमात्रमेकरसं पुरमेव ब्रह्म मकारेण जानीयात् — नृसिंहो. ५।७
सच्चिदानन्दमात्रं हि सच्चिदानन्दमन्यकम् — ते. बिं. ६।२
सच्चिदानन्दमात्रः स स्वराड्भवति — नृसिंहो. ७।१,४
सच्चिदानन्दमात्रोऽहं स्वप्रकाशोऽस्मि चिद्घनः — ब्र. वि. १०९
सच्चिदानन्दमात्रोऽहमनुत्पन्नमिदं जगत् [ते. बिं. ६।५८, — ६३,७१
सच्चिदानन्दमात्रोऽहमिति निश्चित्य तत्त्यज — ते. बिं. ६।१०७
सच्चिदानन्दमेव त्वं सच्चिदानन्दकोऽस्म्यहम् — ते. बिं. ६।३
सच्चिदानन्दरूपमिदं सर्वं सद्धीदं सर्वं सत्सदिति चिद्धीदं सर्वं काशते प्रकाशते चेति — नृसिंहो. ७।३
सच्चिदानन्दरूपं तदवाङ्मनसगोचरम् — अ. पू. ४।२९
सच्चिदानन्दरूपाय सर्वधीवृत्तिसाक्षिणे । नमोवेदान्तवेद्याय ब्रह्मणेऽनन्तरूपिणे — व. सू. शीर्षकं
सच्चिदानन्दरूपाय ज्ञानायामिततेजसे। ब्रह्मस्वरूपाय नारायण नमोऽस्तु ते — ना. उ. २।१
सच्चिदानन्दरूपोऽस्य परमात्मार्थ उच्यते । व्यञ्जनं निष्कलं ब्रह्म प्राणो मायेति च स्वरः — रामर. ५।५
सच्चिदानन्दलक्षणः । सर्वतीर्थस्वरूपोऽस्मि परमात्मास्म्यहं शिवः — मैत्रे. ३।१२
सच्चिदानन्दलहरी महात्रिपुरसुन्दरी बहिरन्तरनुप्रविश्य स्वयमेकैव विभाति — बह्वृचो. २

सच्चिदानन्दविग्रहः (श्रीरामः) मुक्तिको. १।४
सच्चिदानन्दस्वरूपपरवस्तु भवति ना.पू.ता. १।१
[सुखमिति च–] सच्चिदानन्द-
स्वरूपं ज्ञात्वाऽऽनन्दरूपा
या स्थितिः सैव सुखम् निरा. उ. १७
सच्चिदानन्दस्वरूपं ब्रह्मैव अद्वयता. ६
सच्चिदानन्दस्वरूपाय महात्मने... ना.उ.ता. २।३
सच्चिदानन्दं स्वप्रकाशं ब्रह्म त्रि.म.ना. १।३
सच्चिदानन्दात्मकाः स्युर्विष्णौ
नित्ये प्रकल्पिताः ना.पू.ता. ५।७
(तथैव) सच्चिदानन्दात्मोपासकः
सर्वपरिपूर्णाद्वैतपरमानन्दलक्षणे
परब्रह्मणि नारायणे मयि
सच्चिदानन्दात्मकोऽहमजोऽहं
परिपूर्णोऽहमस्मीति प्रविवेश त्रि.म.ना. ८।३
सच्छब्दवाच्यमविद्याशबलं ब्रह्म त्रि. ब्रा. १
सच्छब्दः पार्थ युज्यते भ. गी. १७।२६
स छन्दोभिश्छन्नो यच्छन्दोभि-
श्छन्नस्तस्माच्छन्दांसीत्याचक्षते
छादयन्ति ह वा एनं छन्दांसि १ ऐत. १।६।१
स जन्मान्तरितान् पापान्नाशयति रामो. ४।४
स जाग्रत्स्वप्नसुषुप्त्यवस्थाः प्राप्य
घटीयन्त्रवदुद्विग्नो जातो
मृत इव स्थितो भवति पैङ्गलो. २।६
स जातः३४ सादुत जामिशंसात्
ज्यायसःश१४सादुत वा कनीयसः सहवै. ३
स जातीयप्रवाहश्च विजातीयति-
रस्कृतिः। नियमो हि परानन्दः... ते. बिं. १।१८
सजातीयविशेषविशेषितं निरवयवं
निराधारं निर्विकारं...शाश्वतं
परमं पदं निरतिशयानन्दा-
नन्ततडित्पर्वताकारमद्वितीयं
स्वयम्प्रकाशमनिशं ज्वलति त्रि.म.ना. ७।७
सजातीयं न मे किञ्चिद्विजातीयं
न मे क्वचित् ते. बिं. ३।४७
स जातो अत्यरिच्यत [ऋ. मं.+ १०।९०।५+
[वा.सं.३१।५+ साम. ६।४।७
[अथर्व. १९।६।९+ चित्त्यु. १२।३
स जातो भूतान्यभिव्यैख्यत्
किमिहान्यं वावदिषदिति १ ऐत. ३।१३

स जातो यावदायुषं जीवति तं
प्रेतं दिष्टमितोऽग्नय एव हरन्ति
यत एवेतो यतः सम्भूतो भवति छांदो. ५।९।२
स जायमानउपजायमानो द्वादश
त्रयोदश उपमासः कौ. त. १।२
स जीवति मनो यस्य मनने-
नोपजीवति महो. ३।१३
स जीवति यावज्जीवत्यथ यदा
म्रियते बृह. ६।२।१३
स जीवन्मुक्तो भवतीत्याह
भगवन्नारायणो ब्रह्माणम् दत्तात्रे. ३।१
स जीवः शिव उच्यते यो. शि. १।११
स जीवः केवलः शिवः मैत्रे. २।१
सजोषा इन्द्र सगणो मरुद्भिः
सोमं पिब वृत्रहञ्छूर विद्वान् महाना. ५।११
सज्जन्ते गुणकर्मसु भ.गी. ३।२९
स ज्ञायते येन तदस्तदोषं शुद्धं परं
निर्मलमेकरूपम् । सन्दृश्यते
वाप्यवगम्यते वा तज्ज्ञानम-
ज्ञानमतो यदन्यत् भवसं. २।५५
स ज्येष्ठाज्येष्ठव्यवधानरहितः(विष्णुः) प. हं. प. ११
सञ्चरन्वनमार्गेण शुचौ देशे परि-
भ्रमन् । वायुभक्षोऽम्बुभक्षो
वा विहितैः कन्दमूलकैः ॥
स्वशरीरे समाप्याथ पृथिव्यां
नाश्रु पातयेत् कुण्डिको. ३
सञ्चारधर्मरहिते मयि स्वप्नो
न विद्यते वराहो. २।६१
सञ्चितकर्मणि चित्तसंयमात् पूर्व-
जातिज्ञानम् शांडि. १।७।५२
सच्छब्दवाच्यमविद्याशबलं ब्रह्म त्रि. ब्रा. १।१
सञ्छिन्नाध्यायिन आचार्याः
पूर्वे बभूवुः २ प्रणवो. १६
'सञ्ज्ञानमनन्तं ब्रह्म' इत्यादि-
वाक्यविचारः मठाम्ना. ७
सञ्ज्ञार्थं तान् ब्रवीमि ते भ. गी. १।७
सञ्ज्ञानमाज्ञानं विज्ञानं प्रज्ञानं
मेधा दृष्टिर्धृतिर्मतिर्मनीषाजूतिः

स्मृतिः सङ्कल्पः क्रतुरसुः कामो वश इति...प्रज्ञानस्य नामधेयानि   २. ऐत. ५।२

स त एष रसो यच्चक्षुः, सतो ह्येष रसः   बृ. उ. २।३।४

स तज्ज्ञो बालोन्मत्तपिशाचवज्जडवृत्त्या लोकमाचरेत्   मं. ब्रा. ५।२

स तत एव निववृते, नैतदशकं विज्ञातुं यदेतद्यक्षमिति   केनो. ३।६,१०

सततमनुभवेऽहं तौ बलातिब(लेशौ)लान्तौ   सावित्र्यु. ११

सततमात्माभ्यासरतो भवेत्   अमन. २।४७

सततं कीर्तयन्तो मां   भ. गी. ९।१४

सततं पूजयेद्विष्णुं दिवारात्रं न पूजयेत्   शांडि. १।७।३८

सततं ब्रह्मवादिनाम्   भ.गी. १७।२४

सततं ह्येतद्ब्रह्मोग्रत्वाद्वीरत्वान्महत्त्वाद्विष्णुत्वाज्ज्वलत्वात्सर्वतोमुखत्वान्नृसिंहत्वाद्भीषणत्वाद्भद्रत्वान्मृत्युमृत्युत्वान्नमामित्वादिति   नृसिंहो. ७।५

स तत्र तपसा ब्रह्मचर्येण श्रद्धया सम्पन्नो महिमानमनुभवति   प्रश्नो. ५।३

स तत्र परमं तप आस्थायादित्यमीक्षमाण ऊर्ध्वबाहुस्तिष्ठति [मैत्रा. १।२+   मैत्रे. १।२

स तत्र पर्येति जक्षन्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनꣳ स्मरन्निदꣳ शरीरꣳ..   छांदो. ८।१२।३

स तदभिमानी स्पष्टवपुः सर्वस्थूलपालकोविष्णुःप्रधानपुरुषोभवति   पैङ्गलो. १।३

स तन्मयो ह्यमृत ईशसंस्थो ज्ञः सर्वगो भुवनस्यास्य गोप्ता   श्वेता. ६।१७

स तपस्तप्त्वा इदꣳ सर्वमसृजत्   तैत्ति. २।६

स तपस्तप्त्वा स मिथुनमुत्पादयते   प्रश्नो. १।४

स तपोऽतप्यत [प्रश्नो. १।४+   तैत्ति.२।६+३।१
[-५+नृ.पू.१।१+ग.पू.१।२+   बृ. जा. १।३

स तया वाचा तेनात्मनेदꣳ सर्वमसृजत   बृह. १।२।५

स तया श्रद्धया युक्तः   भ. गी. ७।२२

स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं ताꣳ होवाच किमेतद्यक्षमिति   केनो. ३।१२

स तस्या आद्यैर्द्वादशभिरक्षरैर्ब्राह्मणमजनयत्   अव्यक्तो. ६

स तं परं पुरुषमुपैति दिव्यम्   भ. गी. ८।१०

सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनꣳ स्वपितीत्याचक्षते   छांदो. ६।८।१

सतां हि सत्यं तस्मात्सत्ये रमन्ते   महाना. १६।१२

सति दीप इवालोकः सत्यर्क इव वासरः। सति पुष्प इवामोदश्चिति सत्यं जगत्तथा ॥ प्रतिभासत एवेदं न जगत् परमार्थतः   महो. ५।१०७

सति वज्रासने पादौ कराभ्यां धारयेदृढम्...कन्दंतत्रप्रपीडयेत्   योगकुं. १।४८

सतीषु युक्तिष्वेतासु हठान्नियमयन्ति ये। चेतसो दीपमुत्सृज्य विचिन्वन्ति तमोऽञ्जनैः   मुक्तिको. २।४६

स तूष्णीं मनसा ध्यायन्कथमिमेऽन्नाद्याः स्युः   ग. पू. १।३,६

स तेजस्वतो लोकान्भास्वतोऽपहततमस्कानभिसिद्ध्यति   छांदो. ७।११।२

स तेजस्वी, स मे ददातु   चित्त्यु. ७।४

स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसम्पद्यते   प्रश्नो. ५।३

स ते प्राणा वाऽऽपो गृहीत्वा हृदयमन्वालभ्य जपेत्   प्रा. हो. १।१२

स तेषां तुर्यभागेनकर्मेन्द्रियाण्यसृजत्   पैङ्गलो. १।४

स तेषां सत्त्वतुरीयभागेन ज्ञानेन्द्रियाण्यसृजत्   पैङ्गलो. १।४

स तेषां सत्त्वांशं चतुर्धा कृत्वा भागत्रयसमष्टितः पञ्चक्रियावृत्त्यात्मकमन्तःकरणमसृजत्   पैङ्गलो. १।४

सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषेति उपैनं तदुपनमति यत्कामो भवति [बृ. जा. १।२+   नृ. पू. १।१

सतोऽसत्ता स्थिता मूर्ध्नि रम्याणां मूर्ध्न्यरम्यता। सुखानां मूर्ध्नि दुःखानि किमेकं संश्रयाम्यहम् महो. ६।२४
सतो ह्येष रसः बृ. उ. २।३।४
सत्कर्मपरिपाकतो बहूनां जन्मनामन्ते नृणां मोक्षेच्छा जायते पैङ्गलो. २।९
सत्कर्मपरिपाकात्तु स्वविकारं चिकीर्षति। कोऽहं कथमयं दोषः संसाराख्य उपागतः योगकुं. ३।२८
सत्कारमानपूजार्थं भ.गी. १७।१८
सत्कुलभवोपनीतः सम्यगुपनयनपूर्वकं...शान्तो दान्तःसन्न्यासी... देहत्यागं करोति स मुक्तो भवति ना. प. १।१
सत्ता ब्रह्म न चापरा पा. ब्र. ४९
सत्तामात्रप्रकाशैकप्रकाशं भावनातिगम् (परमात्मानं ध्यायेत्) मैत्रे. १।१४
सत्तामात्रस्वरूपोऽहं शुद्धमोक्षस्वरूपवान् ते. बिं. ३।३०
सत्तामात्रं चित्स्वरूपं प्रकाशं व्यापकं तथा। एकमेवाद्वयं ब्रह्म गोपालो. २।१४
सत्तामात्रं हीदं सर्वं सदेव पुरस्तात्सिद्धम् नृसिंहो. ९।६
सत्ता सर्वपदार्थानां नान्या संवेदनादृते महो. ५।४७
सत्तासामान्यकोटिस्थेद्रागित्येव पदे यदि। पौरुषेण प्रयत्नेन बलात्सन्त्यज्य वासनाम्॥ स्थितिं बध्नासि सत्त्वज्ञ क्षणमप्यक्षयात्मिकाम्। क्षणेऽस्मिन्नेव तत्साधु पदमासादयस्यलम् अ. पू. ४।७४
सत्तासामान्यपर्यन्ते यत्तत्कलनयोज्झितम्। पदमाद्यमनाद्यन्तं तस्य बीजं न विद्यते अ. पू. ४।६८
सत्तासामान्यमेवैकं भावयन्केवलं विभुः। परिपूर्णः परानन्दी तिष्ठापूरितदिग्भरः अ. पू. ४।६७
सत्तासामान्यरूपे वा करोषि स्थितिमादरात्। तत्किञ्चिदधिकेनेह यत्नेनाप्नोषि तत्पदम् अ. पू. ४।७६
सत्तु व्यापकतयाऽस्ति, तेजोमयी चित् सामर. ९७
सत्परानन्दरूपोऽस्मि चित्परानन्दमस्म्यहम् ते. बिं. ३।८
सत्पुण्डरीकमयनं मेघाभं वैद्युताम्बरम्।..चिन्तयंश्चेतसा कृष्णं मुक्तो भवति संसृतेः गो. पू. १।५
सत्यकामः सत्यसङ्कल्पः (आत्मा) सोऽन्वेष्टव्यः [छांदो.८।१।५+ ७।१,३
सत्यकामोऽगुणो ह्येष बृहद्धामाऽयमीश्वरः २ देव्यु. २६
सत्यकामोहजाबालोजाबालां...(मा.) छांदो. ४।४।१
सत्यकामो ह जाबालो जबालां मातरमामंत्रयाञ्चक्रे ब्रह्मचर्यं भवति विवत्स्यामि किं गोत्रोऽहमस्मीति छांदो. ४।४।१
सत्यचिद्घनमखण्डमद्वयं सर्वदृश्यरहितं निरामयम्। यत्पदं विमलमद्वयं शिवं तत्सदाऽहमिति मौनमाश्रय वराहो. ३।६
सत्यज्ञानं सात्त्विकम्, धर्मज्ञानं राजसम्, तिमिरान्धं तामसम् शारीरको. ९
सत्यज्ञानानन्दपूर्णलक्षणं तमसः परम्। ब्रह्मानन्दं सदा पश्यन्कथं बध्येत कर्मणा वराहो. २।१६
सत्यज्ञानानन्दं परिपूर्णं सनातनमेकमेवाद्वितीयं ब्रह्म पैङ्गलो. १।१
सत्यज्ञानानन्दानन्तस्वरूपं (आत्मानमपरोक्षीकृत्य) वज्रसू. उ. ९
सत्यज्ञाने निबध्यन्ते पुरुषाः पाशबन्धनैः। मन्त्रावाच्च विमुच्यन्ते ज्ञानिनः पाशपञ्जरात् शिवो. १।१३
सत्यत्वमस्ति चेत्किञ्चिदसत्यं न च सम्भवेत् ते. बिं. ५।२२
सत्यत्वेन जगद्भानं संसारस्य प्रवर्तकम् २ आत्मो. ४
सत्यभामा धरेति वै कृष्णो. १५
सत्यभूयमेव भवति नैनं विद्वांसमनृतं हिनस्ति बृह. ५।५।१

सत्यमभवत्, यदिदं किञ्च तैत्ति. २।६
सत्यमवादिषं, तन्मामावीत् तैत्ति. १।१२
सत्यमविनाशि। अविनाशि नाम
देशकालवस्तुनिमित्तेषु विन-
श्यत्सु यन्नविनश्यतितदविनाशि सर्वसारो. ६
सत्यमस्तिकर्तव्यमकर्तव्यमौदासीन्य-
नित्यात्मविलापनहोमः भावनो. ६
सत्यानन्दरूपोऽहं चिद्घनानन्द-
विग्रहः। अहमेव परानन्दः ते. बिं. ६।५९
सत्यमिति सत्यलोकः गायत्री. २
सत्यमिति सत्यवचा राथीतरः तैत्ति. १।९।१
सत्यमीशानं ज्ञानमानन्दमद्वयम् जा. द. ९।३
सत्यमूढं स्वतस्सिद्धं शुद्धंबुद्धमनो-
दृशम्। एकमेवाद्वयं ब्रह्म नेह
नानास्ति किञ्चन अध्यात्मो. ६३
सत्यमेकं ललिताख्यं वस्तु तदद्वितीय-
मखण्डार्थं परं ब्रह्म बह्वृचो. ३
सत्यमेव जयते, नानृतं; सत्येन
पन्था विततो देवयानः मुण्ड. ३।१।६
सत्यमेव परंब्रह्म, सत्यंज्ञानमनन्तं ब्रह्म त्रि.म.ना. ३।३
सत्यमों सत्यमों सत्यमोम् अ.शिरः. ३।१६
सत्यवज्ञाति तत्सर्वं रज्जुसर्पवदा-
स्थितम्। तदेतदक्षरं सत्यं
तद्विज्ञाय विमुच्यते रुद्रहृ. ३४
सत्यवाक्छुचिरद्रोही...स्थिरमति-
र्नानृतवादी गिरिकन्दरेषु वसेत् ना. प. ७।२
सत्यवाग्ज्ञानवैराग्याभ्यां विशिष्ट-
देहावशिष्टो वसेत् (यतिः) ना. प. ६।१
सत्यविज्ञानमात्रोऽहं सन्मात्रा-
नन्दवानहम् ते. बिं. ३।४१
सत्यसङ्कल्प आत्मारामः कालत्रया-
बाधितनिजस्वरूपः त्रि.म.ना. १।५
सत्यसङ्कल्पः सत्यकामः मैत्रा. ७।७
सत्यसिद्धयोगो मठः निर्वाणो. ३
सत्यस्य सत्यमनु यत्र युज्यते तत्र
देवाः सर्व एकं भवन्ति १ ऐत. ३।८।१
सत्यस्य सत्यम् [बृह. २।१।२०+ मैत्रा. ६।३२
सत्यस्यात्मा विद्युत आत्मा तेजस
आत्मेति वा अहमेतमुपास इति कौ. त. ४।१७

सत्यहविरध्वर्युः चित्त्यु. ५।१
सत्यं च नारायणः ना. उ.ता. १।५
सत्यं चानृतं च तैत्ति. २।६+
[छांदो. १।२।३+७।२।१+७।६
सत्यं च स्वाध्यायप्रवचने च तैत्ति. १।९।१+
सत्यं ज्ञानमनन्तमानन्दं सर्वो-
पाधिविनिर्मुक्तं कटकमुकुटा-
द्युपाधिरहितसुवर्णघनवद्विज्ञान-
चिन्मात्रस्वभावात्मा यदा
भासते तदा त्वंपदार्थः सर्वसारो. ६
सत्यं ज्ञानमनन्तं च...वेदान्त-
श्रवणं [जा. द. २।९+ दर्शनो. १।३२
सत्यं ज्ञानमनन्तं ब्रह्म तैत्ति. २।१।१
[सर्वसारो. ६+ना. उ. १।५ त्रि.म.ना. ३।३
सत्यं ज्ञानमनन्तम् गान्धर्वो. १
सत्यं ज्ञानमनन्तं अपरं ब्रह्माह-
मेव तत् वराहो. ३।२
सत्यं ज्ञानमनन्तं हि यज्ज्ञात्वा-
ऽमृतमश्नुते गान्धर्वो. ४
सत्यं ज्ञानं सच्चिदानन्दरूपं ध्याये-
द्देवं तन्महो भ्राजमानम् शु. र. २।५
सत्यं तदेतत्पण्डिता एव पश्यन्ति नृसिंहो. ९।९
सत्यं तु पञ्चमे मासे परं ब्रह्म चतुर्थके मृत्युलां. ३
सत्यं त्वेव विजिज्ञासितव्यमिति
सत्यं भगवो विजिज्ञासे छांदो. ७।१६।१
सत्यं नाम मनोवाक्कायकर्मभिर्भूत-
हितयथार्थाभिभाषणम् शांडि. १।१।३
सत्यं परं परं सत्यं सत्येन न
सुवर्गाल्लोकाच्च्यवन्ते कदाचन महाना. १६।१२
सत्यं प्राणो हंसः शास्त्वाऽच्युतो
विष्णुर्नारायणः मैत्रा. ७।७
सत्यं प्रियहितं च यत् भ.गी. १७।१५
सत्यं ब्रह्म प्रभुर्हि सः ते. बिं. ६।३५
सत्यं ब्रह्मेति सत्यं ह्येव ब्रह्म बृह. ५।४।१
सत्यं रसः स्वादुतमो रसानाम् इतिहा. ४४
सत्यं वद, धर्मं चर, स्वाध्याया-
न्मा प्रमदः तैत्ति. १।११।१
सत्यं वदन्त्यनृतमुद्वहन्ति क्षीरं
पिबन्ति मधु ते पिबन्ति। सोमं

पिबन्त्यमृतेन सार्धं मृत्योः पर-
स्तादमृता भवन्ति इतिहा. ७
सत्यं वदिष्यामि ऐतरे. शां.
[तैत्ति. १।१।१+१।१२ कौषी. शां.
सत्यं वाचः प्रतिष्ठा, सत्ये सर्वं प्र-
तिष्ठितं, तस्मात्सत्यं परमं वदन्ति महाना. १७।१
सत्यं विज्ञानमनन्तं ब्रह्म यस्मिन्नि-
दमोतं च प्रोतं च शांडि. २।२
सत्यं वै चक्षुरक्षिण्युपस्थितो हि
पुरुषः सर्वार्थेषु वदति मैत्रा. ६।६
सत्यं वै तद्रसमापो ज्योती
रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् वनदु. १२१
सत्यं वै तद्रसमापो ज्योती रसो-
ऽमृतं ब्रह्म भूर्भुवः सुवरोम् महाना.११।१०
सत्यं शाण्डिल्य परं ब्रह्म निष्क्रिय-
मक्षरमिति शांडि. ३।१।२
सत्यं श्रैष्ठ्यं व्याहृतीनां तथैव
प्रज्ञानं सप्तमं जीवानाम् इतिहा. ४४
सत्यं सत्यं ह्यमृतः सम्बभूव गुह्यका. ७४
सत्यं सम्मार्जनं स्मृतम् शिवो. १।२५
सत्यं सूक्ष्मं परिपूर्णमद्वयं (ब्रह्म) नृसिंहो. ९।९
सत्यं ह्यीत्थं पुरस्तादयोनि नृसिंहो. ९।६
सत्यं ह्यीन्द्रः स होवाच मामेव
विजानीहि कौ. ब. ३।१
सत्य९ ह्येव ब्रह्म बृह. ५।४।१
सत्यः सत्यं पुण्यमासीत् पुण्यो
वा दैविकं सत्यं सत्त्वमार्षं
सत्यं सत्त्वं सत्पथाय स्वाहा पारमा. ५।१
सत्यः सूक्ष्मः संविभुश्चाद्वितीयः मैत्रे. १।११
सत्याङ्कूरो दमोद्भवः कृष्णोप. १६
स त्यागः सात्त्विको मतः भ. गी. १८।९
स त्यागीत्यभिधीयते भ.गी. १८।११
सत्यात्तत्र कदाचिन्न प्रमदितव्यं
तत्रोद्धूलनत्रिपुण्ड्राभ्याम् भ. जा. २।८
सत्यात्म प्राणारामं मनआनन्दम्,
शान्तिसमृद्धममृतम् तैत्ति. १।६।४
सत्यादिरूपं शिवमेवंविदानो
विष्ण्वादिबुद्ध्या हीयते-
ऽज्ञानसङ्गात् सि. शि. ३

सत्यानन्दचिदात्मकं सात्त्विकं
मामकं धामोपास्व दत्तात्रे. १।१
सत्यानन्दस्वरूपोऽहं ज्ञानानन्द-
घनोऽस्म्यहम् ते. बिं. ३।३१
सत्यानन्दोऽस्म्यहं सदा ते. बिं. ३।९
सत्यानृतोपभोगार्थो द्वैतीभावो
महात्मनः मैत्रा. ७।११
सत्यान्न प्रमदितव्यम् । धर्मान्न
प्रमदितव्यम् । कुशलान्न प्रमदि-
तव्यम् । भूत्यै न प्रमदितव्यम् ।
स्वाध्यायप्रवचनाभ्यां न
प्रमदितव्यम् तैत्ति. १।११।१
सत्यामेवाप्येति यः सत्यामेवास्तमेति सुबालो. ९।७
सत्यासत्यादिहीनोऽस्मि सन्मात्रा-
न्नास्म्यहं सदा मैत्रे. ३।२३
सत्ये ज्योतिषि जुहोमि स्वाहा महाना. ११।३
सत्येन तिष्ठासेत्, सत्योऽयमात्मा सुबालो. १३।३
सत्येन न सुवर्गाल्लोकाच्च्यवन्ते
कदाचन महाना. १६।१२
सत्येन पन्था विततो देवयानः मुण्ड. ३।१।६
मस्मीत्यनवरतं ब्रह्मप्रणवानु-
सन्धानेन यः कृतकृत्यो भवति
स ह परमहंसपरिव्राट् प. हं. प. ११
स सततं सकलरुद्रमन्त्रजापी
भवति, स सकलभोगान्भुङ्क्ते,
देहं त्यक्त्वा शिवसायुज्यमेति,
न स पुनरावर्तते का. रुद्रो. ५
स सत्याभिसन्धः सत्येनात्मान-
मन्तर्धाय परशुं तप्तं प्रतिगृह्णाति,
स न दह्यतेऽथ मुच्यते छांदो. ६।१६।२
स सन्न्यासी च योगी च भ. गी. ६।१
स सन्न्यासी शिव एव सर्वदेवमयो
भवति तारोप. ४
स समानः सन्नुभौ लोकावनु-
संचरति बृह. ४।३।७
स समुद्र एव भवति (मा. पा.) छां. उ. ६।१०।१
स समृद्धकायः सन् सृष्टिकर्म
न जज्ञिवान् मुद्गलो. २।४
स सम्यग्ज्ञानं च लब्ध्वा विष्णु-
सायुज्यमवाप्नोति वासुदे. १७
स सर्वकर्मकृत् स ब्राह्मणः प. हं. प. ११
स सर्वकारणमूलं विराट्स्वरूपोभवति त्रि. म. ना.२।६
स सर्वज्ञः सर्वमेवाविवेश प्रश्नो. ४।११
स सर्वज्ञः सर्ववित् यस्य ज्ञानमयं
तपः। तस्यैषाऽऽहुतिर्दिव्या-
ऽमृतत्वाय कल्पतामिति २ सन्न्यासो. १

स सर्वभयविनिर्मुक्तः साक्षाच्छिवमयो भवेत् वज्रपं. ६

स सर्वलोकस्य शुभाशुभस्य तं वै ज्ञात्वा मृत्युमत्येति जन्तुः हेरम्बो. ८

स सर्वविद्भजति मां भ. गी. १५।१९

स सर्ववेत्ता भुवनस्य गोप्ता ताभिः प्रजानां निहिता जनानाम् । प्रोता त्वमोता विचितिः क्रमाणां प्रजापतिश्छन्दमयो विगर्भः एका. ९

स सर्ववेदव्रतचर्यासु चरितो भवति पैङ्गलो. ४।२४

स सर्वज्ञः सर्वो भवति (मा. पा.) प्रश्नो. ४।१०

स सर्वसम्पत्तिभूतं प्रथमं...महा-विद्येश्वरीविद्यां..त्रिपुरेश्वरीं॰.. त्रि. ता. २.२

स सर्वं चानिकेतः स्थिरमतिरेवं स भिक्षुः सौवर्णादीनां नैव परिग्रहेत् प. हं. ९

स सर्वा॰ लोकाञ्जित्वा ब्रह्म परं प्राप्नोति अव्यक्तो. ५

स सर्वान्वेदानधीतो भवति का. रुद्रो. ५

स सर्वा वाचो विजृम्भयति त्रि. ता. १।१५

स सर्वा॰श्च लोकानाप्नोति सर्वा॰श्च कामान्यस्तमात्मान-मनुविद्य विजानाति छांदो.८।७।१,३ [८।१२।६+पैङ्गलो. ४।२४+ महो. ६।८

स संसारं तरति, सोऽमृतत्वं च गच्छति, महती श्रियमश्नुते नृ. पू. ३।२

स संस्तुतो दैवतदेवसूनुः सुतं भृगोर्वाक्यमुवाच तुष्टः । अवेहि मां भार्गव वक्रतुण्डमनाथनाथं त्रिगुणात्मकं शिवम् ग. पू. ता. १९

स साक्षी भवति, स एव भवति, स सर्वो भवति गणेशो. ५।८

ससागरां सपर्वतां सप्तद्वीपां वसुन्धरां तत्साम्नः प्रथमं पादं जानीयात् नृ. पू. १।२

ससागरां सप्तद्वीपां सपर्वतां वसुन्धरां तत्साम्नः प्रथमं पादं जानीयात् रायस्पोषस्य दातेति ग. पू. १।१२

स साम भवति, ऋग्वै गायत्री, यजुरुष्णिक् ,अनुष्टुप् साम ग. पू. १।११

स सामभिः सामवेदो रुद्रा आदित्या जगत्याहवनीयः सा साम्न-स्तृतीयो पादो भवति नृ. पू. २।१

स सामभिः सामवेदो रुद्रादित्या जगत्याहवनीयः सा तृतीयः पादो भवति नृसिंहो. ३।२

स सिद्धिसाधनैर्योगैस्तानि साधयति क्रमात् अ. पू. ४।५

स सारः सर्वसाराणां तस्मात्सारो न विद्यते अ. पू. ४।७०

स सार्वभौमवद्व्यवहाराच्छ्रान्तो-ऽन्तर्भवनं प्रवेष्टुं मार्गमाश्रित्य तिष्ठति पैङ्गलो. २।७

स सूर्यः स चन्द्रः सुरास्ते ते असुराः (परमात्मैव) निरा. १०

स सूर्यः स वायुः सोऽग्निः स ब्रह्म गणेशो. २।१

स सूर्यो भगवान्सहस्रांशुः, तं सूर्यं भगवन्तं सर्वस्वरूपिणं निगमा बहु वर्णयन्ति सूर्यता. १।२

स सोमलोके विभूति-मनुभूय पुनरावर्तते प्रश्नो. ५।४

स सोमः कस्मिन्प्रतिष्ठित इति । दीक्षायामिति बृह. ३।९।२३

स श्रिय॰ ससृजे, ता॰ सृष्ट्वाऽध-उपास्ते बृह. ६।४।२

स श्रियं ससृजे तां सृष्ट्वाऽध उपास्ते...(मा. पा.) बृह. ६।४।२

सस्यमिव मर्त्यः पच्यते सस्य-मिवाजायते पुनः कठो. १।६

स स्वराड्भवति, तस्य सर्वेषु लोकेषु कामचारो भवति छांदो. ७।२५।२

स स्वर्गो भवति ब्रह्मचारी वेद-मधीत्य वेदोक्ताचरितब्रह्मचर्यो दारानाहृत्य पुत्रानुत्पाद्य तान-नुपाधिभिर्वितत्येष्ट्वा च शक्तितो यज्ञैः कठरु. ५

स स्वर्लोकं स महर्लोकं स जनो-लोकं, स तपोलोकं, स सत्य-

लोकं स सप्तलोकं स सर्वलोकं सर्वलोकं जयति — ग. शो. ५।२
स स्वव्यतिरेकेण नान्यद्रष्टा — प. हं. प. ११
स स्वाधीनमायः सर्वज्ञः सृष्टिस्थितिलयानामादिकर्ता जगदङ्कुररूपो भवति — पैङ्गलो. १।२
स ह अविदूर एव शवशयितमात्रेयमच्छावदमुपदर्शयन्नुवाच — छाग. २।१
स य एषोऽणिमैतदात्म्यमिदं सर्वम् — छांदो. ६।१२।३
स ह कामप्रश्नमेव वव्रे, तं हास्मै ददौ — बृह. ४।३।१
स ह कृच्छ्री बभूव स ह चिरं वसेत्याज्ञापयाञ्चकार — छांदो. ५।३।७
स ह क्षत्ताऽविदमिति प्रत्येयाय — छांदो. ४।१।८
स ह क्षत्ताऽन्विष्य नाविदमिति प्रत्येयाय — छांदो. ४।१।७
स ह गवां सहस्रमवरुरोध दश दश पादा एकैकस्याः शृङ्गयोराबद्धा बभूवुः — बृह. ३।१।१
स ह क्षत्तान्विष्याविदमिति प्रत्येयाय (मा. पा.) — छां. उ. ४।१।८
स ह गायत्रीमेव प्रतिसन्दिदेश — शौनको. १।२
सहजं कर्म कौन्तेय — भ. गी. १८।४८
(एवं) सहजानन्दे यदा मनो लीयते तदा शान्तो भवी भवति — मं. ब्रा. २।३
सहजेनामनस्केन मनश्शल्यं वियोजयेत् — अमन. २।८१
स ह तेनैव वज्रेणासुरान् पराभावयन् — शौनको. ४।४
स ह त्रिष्टुभमेव प्रतिसन्ददत् — शौनको. ३।२
स ह द्वादशवर्ष उपेत्य चतुर्विंशतिवर्षः सर्वान्वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय — छांदो. ६।१।२
स ह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै — शांतिपाठः
स ह नौ यशः । सह नौ ब्रह्मवर्चसम् — तैत्ति. शां. पा.
स ह पञ्चदशाहानि नाशाथ हैनमुपससाद — छांदो. ६।७।२
स ह पुत्रं श्वेतकेतुं प्रजि-(गाय-)घाय याजयेति — कौ. ब्र. १।१
स ह प्रजापतिरीक्षांचक्रे, हन्तास्मै प्रतिष्ठां कल्पयानीति — बृह. ६।४।२
स ह प्रणव उवाच–यदहं सर्वभवानि — शौनको. २।२
स ह प्रणवपर्यन्तदीर्घनिःस्वनतन्तुना । जहाविन्द्रियतन्मात्रजालं खग इवानिलः — अ. पू. ३।१४
स ह प्रणवमेवोवाच–पुरोगायमेवारभस्वेति — शौनको. ३।२
स ह प्रवाहणो जैवलिरुवाच भगवन्तावग्रे वदतां ब्राह्मणयोर्वदतोर्वाचं श्रोष्यामीति — छांदो. १।८।२
स ह प्रातः सञ्जिहान उवाच–न मे स्तेनो जनपदे न कदर्यो न मद्यपः । नानाहिताग्निर्नाविद्वान्न स्वैरी, स्वैरिणी कुतः — छांदो. ५।११।५
स ह प्रातः सञ्जिहान उवाच–यद्बतान्नस्यलभेमहि धनमात्रां राजासौ यक्ष्यते स मा सर्वैरार्त्विज्यैर्वृणीतेति — छांदो. १।१०।६
स ह प्रातः सभाग उदेयाय तं होवाच मानुषस्य भगवन्गौतम वित्तस्य वरं वृणीथा इति — छांदो. ५।३।६
सहमाना नाम दक्षिणा, राज्ञी नाम प्रतीची, सुभूता नामोदीची, तासां वायुर्वत्सः, स य एवमेवं वायुं दिशां वत्सं वेद न पुत्ररोदं रोदिति — छांदो. ३।१५।२
सहयज्ञाः प्रजाः सृष्ट्वा — भ. गी. ३।१०
स ह रक्षांसि यद्देवाः सप्तदश — सहवै. २५
स हरिर्वसुवित्तमः — चित्यु. ११।७
स ह वा एतस्य स्वधा न यजुषा न साम्नामर्थोऽस्ति — सूर्यता. ३।१
स ह वै देवानां चासुराणां च यज्ञौ प्रततावास्ताम् — सहवै. १

स ह व्याधिनाऽनशितुं दध्रे, त-
माचार्यजायोवाच-ब्रह्मचारि-
न्नशान, किं नु नाश्नासीति छांदो. ४।१०।३
स ह शान्तहृदय एव विरोचनो-
ऽसुराञ्जगाम तेभ्यो हैतामुप-
निषदं प्रोवाचात्मैवेह मह्य्य
आत्मा परिचर्यः... छांदो. ८।८।४
स ह श्वोभूते गा अभिप्रस्थापया-
ञ्चकार, ता यत्राभिसायं
बभूवुस्तत्राग्निमुपसमाधाय गा
उपरुध्य समिधमाधाय पश्चादग्नेः
प्राङुपोपविवेश [छांदो.४।६।१ +७।१+८।१
स ह षोडशं वर्षशतमजीवत् , प्र ह
षोडशं वर्षशतं जीवति यएवंवेद छांदो. ३।१६।७
स ह षोडशं वर्षशतं जीवति(मा.पा.) छां.उ.३।१६।७
स ह सञ्जिहान एव क्षत्तारमुवाचाङ्गारे
ह सयुग्वानमिव रैक्वमात्थेति
यो नु कथं सयुग्वा रैक्व इति छांदो. ४।१।५
स ह समित्पाणिश्चित्रं गार्ग्यायणिं
प्रतिचक्राम उपायानीति कौ. त. १।१
स ह सम्पादयाञ्चकार प्रक्ष्यन्ति
मामिमे महाशाला महाश्रोत्रियाः छांदो. ५।११।३
स ह सम्पायास्त्वमाशिषमाशिभूता-
भूतमाशिषमाशिराशीराशिरनु-
भूमिः स्वाहा पारमा. ४।५
स ह सर्वत आवसथान्मापयाञ्चक्रे छांदो. ४।१।१
स ह सर्वमेवात्मानमुपसंहृत्य शृङ्ग
एवागूहयत् शौनको. ३।४
स ह सहस्रं समा ब्रह्मचर्यमध्युवास अव्यक्तो. २
सहसैवाभ्यहन्यन्त भ. गी. १।१३
स ह स्मयमान उवाच सम्पश्यध्वा
एव मा प्रमदत छाग. २।४
स ह स्मान्यानन्तेवासिनःसमावर्त-
यंस्तं ह स्मैव न समावर्तयति छांदो. ४।१०।१
स ह स्माह पैाणिना मा मातृदः बृह. ५।१२।१
स ह स्मैभ्यः कामानागायति छांदो. १।१।१३
सहस्रकमले शक्तिः शिवेन सह
मोदते । सैवावस्था परा ज्ञेया.. योगकुं. १।८६
सहस्रकलावयवकल्याणं दृष्टमात्रेण
मोक्षदं वेषमाददे मुद्गलो. २।२
सहस्रकृत्वः प्रयुक्ताग्निष्टोमाप्तो-
र्यामादीनां फलमवाप्नोति सन्न्यो. २
सहस्रदलसंख्यातं ब्रह्मरन्ध्रे महा-
पथिम् । आधारं प्रथमं चक्रं
स्वाधिष्ठानं द्वितीयकम् यो. चू. ४
सहस्रधा नैकधा चासमत्र । मया
तवमितीदमश्रुते तदन्यथा
सद्यदि मे असद्विदुः बा. मं. १९
सहस्रपरमा देवी शतमूला
शताङ्कुरा । सर्वं हरतु मे पापं
दूर्वा दुस्स्वप्ननाशिनी महाना. ४।१
[वनदु. १५९
सहस्रपादेकमूर्ध्ना व्याप्तं स एवेद-
मावरीवर्तिभूतम् अ.शिरः. ३।१४
सहस्रबाहो भव विश्वमूर्ते भ. गी. ११।४६
सहस्रमेकं व्ययुतं षट्शतं चैव
सर्वदा । उच्चरन्पठितो हंसः
सोऽहमित्यभिधीयते ब्र. वि. ७९
सहस्रयुगपर्यन्तं भ. गी. ८।१७
सहस्ररश्मिः शतधा वर्तमानः
प्राणः प्रजानामुदयत्येष सूर्यः प्रश्नो. १।८
[+मैत्रा. ६।८+ अक्षयु. २
सहस्रशीर्षं देवं विश्वाक्षं विश्व-
शम्भुवम् । विश्वं नारायणं
देवमक्षरं परमं पदम् महाना. ९।१
सहस्रशीर्षं देवं सहस्राक्षं विश्व-
शम्भु (सम्भ) वम् [महो.१।५+ चतुर्वे. २
सहस्रशीर्षा पुरुषः सहस्राक्षः
सहस्रपात् [ऋक्.मं.१०।९०।१+ श्वेता. ३।१४
[+चित्त्यु.१२।१सुबालो. १।२+ पु. सू. १+
सहस्रसङ्ख्यया जाताः शाखाः
साम्नः परन्तप मुक्तिको. १।१३
सहस्रं दद्मस्त एतस्यां वाचि
जनको जनक इति वा उ
जना धावन्तीति कौ. उ. ४।१

सहस्रं वा यस्य वै वितानमादधानः सहस्रं वा आशिषः सहस्रं यस्य वै सासिकाः सहस्रं सहस्रायस्त्राहा पारमा. ४।७
सहस्रं समा आद्यन्तनिहितोङ्कारेण पदान्यगायत् अव्यक्तो. ३
सहस्राङ्कुरशाखात्म-फल-पल्लव-शालिनः। अस्य संसारवृक्षस्य मनोमूलमिदं स्थितम् मुक्तिको. २।३७
सहस्रारे जलज्योतिरन्तर्लक्ष्यम् मं. ब्रा. १।५
सहस्रार्णमतीवात्र मन्त्र एष प्रदर्शितः। एवमेतां समारूढो हंसयोगविचक्षणः ॥ न भिद्यते कर्मचारैः पापकोटिशतैरपि ना. बिं. ५
सहस्व मन्यो अभिमातिमस्मे रुजन्मृणन्प्रमृणन्प्रेहि शत्रून् [ऋ. मं. १०।८४।३+ वनदु. १०९ अथर्व. ४।३१।३
स ह स्वेनैव रूपेणादित्यानगच्छत् शौनको. ४।४
स ह ह्येतावस्मिञ्छरीरे वसतः कौ. त. ३।४
स हान्तत एवात्मानमुपसंहृत्य तावदेवाग्राहयत् शौनको. २।३
स हान्नमित्यभिव्याहृत्य बृहतीसहस्रं शशंस १ ऐत. २।३।१
स हापश्यत्-सर्व एव न्यूङ्खयन्तो मामभिचक्षीरन्निति शौनको. ३।३
स हापश्यदादित्यो वा उद्गीथोऽसौ खल्वादित्यो ब्रह्म शौनको. ४।३
स हापश्यन्नैतदश्नसैवसर्वारूपाण्येव-मभिचक्षीरन् शौनको. २।२
स हात्राप्यैव देवानेतद्भयं ददर्श छांदो. ८।१०।१
स हायमीक्षाञ्चक्रे यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति बृह. १।४।२
स हायस्तः पितुरर्धमेयाय छांदो. ५।३।४
स हाविपरिहृतो मेने न मेऽस्य पुत्रेण समगादिति ३ ऐत. १।१।१
सहास्मदीयैरपि योधमुख्यैः भ. गी. ११।२६
स हाहं यशसां यशः छांदो. ८।१४।१
स हाशाथ हैनमुपससाद तं ह यत्किञ्च पप्रच्छ सर्वं ह प्रतिपेदे छांदो. ६।७।४
स हि खादित्वाऽतिशेषाञ्जायाया आजहार छांदो. १।१०।५
स हि ज्येष्ठः श्रेष्ठो राजाऽधिपतिः छांदो. ५।२।६
स हि प्रज्ञानेन सम्पन्नतमो विज्ञातं वदति १ ऐत. ३।२।३
स हि सर्वकाममयः पुरुषोऽध्यवसा-यसङ्कल्पाभिमानलिङ्गो बद्धो-ऽतस्तद्विपरीतो मुक्तः मैत्रा. ६।३०
स हि स्वप्नो भूत्वेमं लोकमति-क्रामति मृत्यो रूपाणि बृह. ४।३।७
स हिंकारो मघो जायते छांदो. २।१५।१
स हीदमन्नं धियाधिया जनयते बृह. १।५।२
स हीदमन्नं पुनः पुनर्जनयते बृह. १।५।२
स हेभ्यं कुल्माषान् खादन्तं बिभिक्षे छांदो. १।१०।२
सहेलं सलीलं वा स्मरणाद्वरदानेषु चतुरा गुह्यषोढा. २
सहेश्वरो यशस्वी कल्याणकीर्ति-र्भवितोरीश्वरो ह तु पुरुषायुषः प्रैतोरिति ह स्माह १ ऐत. ३।५।२
स हैतयैव निविदा प्रतिपेदे बृह. ३।९।१
स हैतावानास यथा स्त्रीपुमांसौ सम्परिष्वक्तौ स इममेवात्मानं द्वेधा पातयत्ततः पतिश्च पत्नी चाभवताम् बृह. १।४।३
स हैतैः सर्वैरस्माच्छरीरादुत्क्रामति कौ. त. २।१४
स हैनं पप्रच्छ त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोऽसीइति बृह. ३।१।२
स हैव सन्तं न विजानन्ति देवाः इन्द्रस्यात्मानं शतधा चरन्तम् चित्सु. ११।५
स हैवालं भार्येभ्यो भवति बृह. १।३।१८
स होता स मुक्तिः साऽतिमुक्तिः बृह. ३।१।३
स होवाच-आर्तमिवेदं ते विज्ञान-मपिस्विदेनद्रोदस्योरेव पर्यायेणोपवन्वीमहि आर्षे. ४।३
स होवाचकिंमेप्रतीवाहोभविष्यतीति २ प्रणवो. ८
स होवाच किं मेऽन्नं भविष्यतीति छांदो. ५।२।१
स होवाचकिंमे वासो भविष्यतीति छांदो. ५।२।२

स होवाच–कुरुक्षेत्र एवोपसमेत्य ये बालिशास्तानुपाध्वै ते व इदं प्रवक्ष्यन्तीति छाग. ३।१

स होवाच–कैषा त्वं ब्रह्मवाग्यदसि शंसात्मानमिति अव्यक्तो. २

स होवाच–गार्गि माऽतिप्राक्षी-र्मा ते मूर्धा व्यपप्तत् बृह्. ३।६।१

स होवाच–गार्ग्य उप त्वा यानीति बृह. २।१।१४

स होवाच–गार्ग्योयएवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपास इति बृ. उ. ८।१।२

स होवाच–जनको वैदेहोऽभयं त्वागच्छतायाज्ञवल्क्य यो नो भगवन्नभयं वेदयसे बृह. ४।२।४

स होवाच–जपध्वमानुष्टुभं मंत्रराजं षट्पदं सषडक्षरम् ग. पू. १।१०

स होवाच–तपस्यन्तं सिद्धारण्ये भृगुपुत्रं पृच्छध्वमिति ग. पू. १।६

स होवाच–तां हि वै पूर्वं नारायणो यस्मिँल्लोका ओताश्च प्रोताश्च तस्यहृत्पद्माज्जातोऽब्जयोनि-स्तपस्तत्त्वा तस्मै ह वरं ददौ गोपालो. १।१४

स होवाच–त्वामेव जानीयामिति १ ऐत. २।३।४

स होवाच नारदः...निर्वैरः शान्तो दान्तः सन्न्यासी परमहंसा-श्रमेणास्खलित-स्वस्वरूपध्यानेन देहत्यागं करोतिस मुक्तो भवति ना. प. १।१

स होवाच पितरं, तत कस्मै मां दास्यसीति। द्वितीयं तृतीयं तं॰ होवाच, मृत्यवे त्वा ददामीति कठो. १।४

होवाच– प्रजापतिः स यो ह वै सावित्रस्याष्टाक्षरं पदं श्रिया-भिषिक्तं तस्साम्नोऽङ्गं वेद श्रिया हैवाऽभिषिच्यते नृ. पू. १।३

स होवाच प्रतर्दनस्त्वमेव वृणीष्व यं त्वं मनुष्यायहिततमं मन्यस इति कौ. त. ३।१

स होवाच– बहव इमेऽस्मिन्पुरुषे कामा नानात्ययाः छांदो. ४।१०।३

स होवाच–बालाकिर्य एवैष आदित्ये पुरुषस्तमेवाहमुपास इति कौ. त. ४।२

स होवाच–ब्रह्मपुत्रस्तपस्तेपे सिद्ध-क्षेत्रे महायशाः ग. पू. १।६

स होवाच– भगवंतो यदिदं सप-माध्वै यदृचोऽधीध्वै यद्यजूंषि यत्सामानि कस्यायं महिमेति छाग. १।२

स होवाच भगवान् ब्रह्मा आनन्दं ब्रह्मणो विद्वान्सच्चिदानन्द-स्वरूपो भवति ना. उ. ता. १।१

स होवाच भगवान् ब्रह्मा नारायण-यन्त्रमन्त्रावरणपूजामाचचक्षे ना. पू. ६।१

स होवाच भगवान् उपासनविधिं व्याचष्टे ना. पू. ४।११

स होवाच यदिदमिच्छाचिदिच्छा-चिद्दीक्षध्वै किं तद्येन ब्राह्मण इति छाग. १।३

स होवाच–यदेतदस्मिन्मण्डले-ऽर्चिर्दीप्यते बम्भ्रम्यमाणमिव, चाकश्यमानमिव, जाज्वल्य-मानमिव, देदीप्यमानमिव, लेलिहानं तदेव मे ब्रह्म आर्षे. ५।२

स होवाच– याज्ञवल्क्यः प्रिया बतारे नः सती बृ. उ. २।४।४

स होवाच याज्ञवल्क्यः – सो-ऽविमुक्त उपास्यः.. जाबालो. २

स होवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति बृह. २।१।१

स होवाचाजातशत्रुः सहस्रमेतस्यां वाचि दद्मो जनको जनक इति वै जना धावन्तीति बृह. २।१।१

स होवाचेन्द्रो यत्त्वामुद्गीथेनोपाव-नेष्यन्ते तेनैवते कल्पयिष्यन्तीति शौनको. ४।२

स होवाचोषस्तश्चाक्रायणो यथा विब्रूयादसौ गौरसावश्व इत्येव-मेवैतद्व्यपदिष्टं भवति बृह. ३।४।२

स होह वैतद्भगवन्मनुष्येषु (मा.पा.) प्रश्नो. ५।१

स ह्येनन्नेदिष्ठं पस्पर्श, स ह्येनं प्रथमो विदाञ्चकार ब्रह्मेति केनो. ४।३

संपूर्ण कुम्भवद्देहं कुम्भये-न्मातरिश्वना त्रि. ब्रा. २।९८

सं मा सिञ्चन्तु मरुतः समिन्द्रः
सं बृहस्पतिः सहवै. २२
संयमासंयमाभ्यां च संसारः
शान्तिमन्वगात् महो. ४।८७
संयमाग्निषु जुह्वति भ. गी. ४।२६
संयुक्तमेकतां याति तथाऽऽत्म-
न्यात्मविन्मुनिः २ आत्मो. २५
संयुक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तं
भरते विश्वमीशः । अनीशश्चात्मा
बध्यते भोक्तृभावाज्ज्ञात्वा देवं
मुच्यते सर्वपाशैः श्वेता. १।८
[+ भवसं. २।५+ ना. प. ९।७
संयोग एषां न त्वात्मभावादात्मा
ह्यनीशः सुखदुःखहेतोः ना. प. ९।१
संयोगो योग इत्युक्तो जीवात्म-
परमात्मनोः भवसं. ३।१३
संवत्सर आत्माऽश्वस्य मेध्यस्य बृह. १।१।१
संवत्सरत्रयादूर्ध्वं प्राणायामपरो नरः त्रि. ब्रा. १०२
संवत्सरत्रयेणाऽपि लयस्थस्यापि
योगिनः । तेजस्तत्त्वस्य सिद्धिः
स्यात्तोयतत्त्वमयो भवेत् अमन. १।७६
संवत्सरश्च यजमानश्च लोकाः
सोमो यत्र पवते यत्र सूर्यः मुण्ड. २।१।६
संवत्सरस्य तेजोभूतस्य भूतस्यात्म-
भूतस्य त्वमात्माऽसि कौ. त. १।६
संवत्सरं दीक्षितो भवति संवत्सरा-
देवात्मानं पुनीते सहवै. १२
संवत्सरं पयसा जुह्वदपपुनर्मृत्युं
जयतीति बृह. १।५।२
संवत्सरं मज्जो नाश्नीयात्तद्व्रतम् छांदो. २।१९।२
संवत्सरः प्रजननम् सहवै. २३
संवत्सरात्खल्वेताः प्रजाः प्रजायन्ते
संवत्सरेणेह वै जाता विवर्धन्ते
संवत्सरे प्रत्यस्तं यन्ति मैत्रा. ६।१९
संवत्सरादादित्यमादित्याच्चन्द्रमसं
चन्द्रमसो विद्युतं तत्पुरुषो-
ऽमानवः [छांदो. ४।१५।५+ ५।१०।२
संवत्सरादेवात्मानं पुनीते सहवै. १२

संवत्सरो वै प्रजापतिः, तस्यायने
दक्षिणं चोत्तरं च प्रश्नो. १।९
संवत्सरोऽसावादित्यः म. ना. १७।१२
संवर्गोऽसि पाप्मानं मे संवृङ्ग्धि कौ. त. २।७
संवर्चसा पयसा संतनूभिरगन्महि
मनसा स९ शिवेन सहवै. ५
संवर्तकोऽग्निर्मरुतो विराडेकर्षि-
र्भास्वती स्मृता सा साम्न-
श्चतुर्थः पादो भवति नृ. पू. २।१
संवादमिममद्भुतम् भ.गी. १८।७६
संवादमिममश्रौषं भ.गी. १८।७४
संविश्च सदसच्चापि चाहं
विश्वमिदं ध्रुवम् २ देव्यु. ४
संवित्संरोधनं श्रेयः प्राणादि-
स्पन्दनं वरम् अ. पू. ४।४३
संविदपेतं निरय एव मूत्रद्वारेण
निष्क्रान्तम् (शरीरं) मैत्रे. १।३
संविदा देयम् तैत्ति. १।११।३
संविदितमनोन्मन्यनुभवः मं. ब्रा. ३।१
संविद्भूयाच्च तन्मध्ये शक्तिरुद्धा
स्थिता परा । तत्र पूर्णा गिरौ
पीठे शक्तिं ध्यात्वा विमुच्यते योगरा. १८
संविद्वस्तुदशालम्बः सा यस्येह
न विद्यते । सोऽसंविदजडः
प्रोक्तः कुर्वन्कार्यशतान्यपि अ. पू. ४।९८
संविन्मात्रपरोऽस्म्यहम् १ सं.सो. २।४७
संविन्मात्रमहं महत् महो. ६।८१
संविन्मात्रस्थितश्चाहमजोऽस्मि
किमतः परम् । व्यतिरिक्तं
जडं सर्वं स्वप्नवच्च विनश्यति स्कन्दो. ३
संविन्मात्रं परं ब्रह्म तत्स्वमात्रं
विजृम्भते स्कन्दो. शीर्षकं
संविभज्य सुतानर्थे ग्राम्यकामान्
विसृज्य च कुण्डिको. ३
संविभज्य सुतानर्थैर्ग्राम्यकामा-
न्विसृज्य च । चरेत वाममार्गेण
शुचौ देशे परिभ्रमन् २ सन्न्यासो. ४
संविशत्यात्मनाऽऽत्मानं य एवं वेद नृसिंहो. २।७

संवृत्या जायते सर्वं शाश्वतं नास्ति तेन वै	अ. शां. ५७
संवेद्य वर्जितमनुत्तममाद्यमेकं संवित्पदं विकलनं कलयन् महात्मन् । हृद्येव तिष्ठ कलनारहितः क्रियां तु कुर्वन्नकर्तृपदमेत्य शमोदितश्रीः	अ. पू. ४।९१
संवेद्यसम्परित्यागात्प्राणस्पन्दनवासने । समूलं नश्यतः क्षिप्रं मूलच्छेदादिव द्रुमः	अ. पू. ४।५४
संवेद्येन हृदाकाशे मनागपि न लिप्यते । यस्यासावजडा संवित् जीवन्मुक्तः स कथ्यते	अ. पू. ४।५९
संशयात्मा विनश्यति	भ. गी. ४।४०
संशये समनुप्राप्ते ब्रह्मनिश्चयमाश्रयेत्	ते. बिं. ६।१०१
संशान्तदुःखमजडात्मकमेकसुप्तमानन्दमन्थरमपेतरजस्तमो यत् । आकाशकोशतनवोऽतनवो महान्तस्तस्मिन्पदे गलितचित्तलवा भवन्ति	अ. पू. ४।२४
संशान्तसर्वसङ्कल्पः प्रशान्तसकलेषणः । निर्विकल्पपदं गत्वा स्वस्थो भव मुनीश्वर	महो. ६।८२
संशान्तसर्वसङ्कल्पा या शिलावदवस्थितिः। जाग्रन्निद्राविनिर्मुक्तासा स्वरूपस्थितिः परा [महो.५।६+	मैत्रे. २।३०
स१ शाम्यति तन्निधनम्	छांदो. २।१२।१
संशितं मे ब्रह्म संशितं वीर्यं बलं	सहवै. ८
संशितं क्षत्रं मे जिष्णु यस्याहमस्मि पुरोहितः	सहवै. ८
संसार एव दुःखानां सीमान्त इति कथ्यते । तन्मध्ये पतिते देहे सुखमासाद्यते कथम्	महो. ६।२६
संसारदुःखानि न मां स्पृशन्ति	वराहो. ३।३
संसारदोषदृष्ट्यैव विरक्तिर्जायते सदा । विरक्तस्य तु संसारात् सन्न्यासः स्यान्न संशयः	ना. प. ६।२६
संसारनिवृत्तिमार्गप्रवृत्तिः कदापि न जायते	त्रि. म. ना.५।३
संसारपारं मुनयोऽपि यान्ति	हेरम्बो. ७
संसारमण्डलं दुःखं पच्यन्ते यत्र जन्तवः	इतिहा. १२
संसारमेव निस्सारं दृष्ट्वा सारदिदृक्षया । सन्न्यसेद्रुन्धनाशाय परं वैराग्यमाश्रितः[भवसं.१।१+	नार. पे. ३।१५
संसाररात्रिदुस्स्वप्ने शून्ये देहमये भ्रमे । सर्वमेव पवित्रं तद्दृष्टं संसृतिविभ्रमम्	महो. ६।२२
संसाराडम्बरमिदं कथमभ्युदितं मुने । कथं च प्रशमं याति किं यत्कस्य कदा वद	महो. २।१५
संसाराडम्बरमिदं कथमभ्युत्थितं गुरो । कथं प्रशममायाति यथावत्कथयाशु मे	महो. २।३०
संसाराम्बुनिधावस्मिन् वासनाम्बुपरिप्लुते । ये प्रज्ञानावमारूढास्ते तीर्णाः पण्डिताः परे	महो. ५।१७६
संसारार्णवसञ्जातं सेवितं मम मानसे । चन्द्रसूर्यविषो दिव्या ध्वजा मेरुर्हिरण्मयः	गोपालो. २।२६
संसारितोऽयमानन्दमयो रस आत्मानमानन्दमयतया प्रपद्यते	सामर. १०२
संसारे च गुहावाच्ये मायाज्ञानादिसंज्ञके । निहितं ब्रह्म यो वेद परमे व्योम्नि संज्ञिते ॥ सोऽश्नुते सकलान्कामान्क्रमेणैव द्विजोत्तमः	कठश्रु. १३
संसारेषु नराधमान्	भ. गी. १६।१९
संसिद्धिमपि गच्छेद्रियया सह ज्ञानवान्	संहितो. ३।८
संसिद्धिं परमां गताः	भ. गी. ८।१५
संसिद्धिं लभते नरः	भ. गी. १८।४५
संसिद्धोऽयं जीवसङ्घो मायोपाधिभेदेन नानाशरीरभावमाप्नोति	सामर. १००
संसिद्धौ कुरुनन्दन	भ. गी. ६।४३
संसृज्य विश्वा भुवनानि गोपाः	श्वेताश्व. ३।२
संसृज्य विश्वा भुवनानि गोप्ता	बटुको. २२

(अथ) संसृतिबन्धमोक्षयो-
विद्याविद्ये चक्षुषी उपसंहृत्य महावा. १
संस्कारसहितं धार्यम् (भस्म) बृ. जा. ३।१
संसृष्टं धनमुभयं समाकृतमस्मभ्यं
दत्तां वरुणश्च मन्युः वनदु. ११३
[ऋ. मं. १०।८४।७+ अथर्व. ४।३१।७
संस्तभ्य सिंहं स्वसुतान्गुणार्थान्
संयोज्य शृङ्गैरृषभस्य हत्वा ।
वश्यां स्फुरन्तीमसतीं निपीड्य
सम्भक्ष्य सिंहेन स एष वीरः नृसिंहो. ४।३
संस्तभ्यात्मानमात्मना भ. गी. ३।४३
संस्थितानि पूर्वाणि दारुपात्राण्यग्नौ
जुहुयात् (यतेः) कठरु. २
संहारप्रणवः सृष्टिप्रणवश्चान्त-
र्बहिश्चोभयात्मकत्वात्त्रिविधो
ब्रह्मप्रणवः ना. प. ८।१
संहाररूपा रुद्राणी भवति ना. पू. ता. २।१
संहारो निर्गुणप्रणवः तुरीयो. १
सं हास्मै पद्यते यं कामं कामयते,
य एवं वेद बृह. ६।१।४,४
सा कलहंसी सृष्ट्यादौ ब्रह्मणः
पुत्री सरस्वती सामर. ९२
सा कारणं कारणकारणाधिपा
नास्याश्च कश्चिज्जनिता न चाधिपः गुह्यका. ६८
साकारमनित्यं नित्यं निराकारं त्रि. म. ना.२।१
साकारस्तु द्विविधः सोपाधिको
निरुपाधिकश्च त्रि. म. ना.२।१
साकारः सावयवो निरवयवं
निराकारम् त्रि. म. ना.२।१
सा कालपुत्रपदवी सा महावीचि-
वागुरा । सासिपत्रवनश्रेणी या
देहेऽहमिति स्थितिः ना. प. ३।५०
साकं स एको भूतश्चरति प्रजानां
तस्मादुच्यत एकः बटुको. २०
सा काष्ठा सा परा गतिः कठो. ३।११
सा कुण्डलिनी कण्ठोर्ध्वभागे
सुप्ता चेद्योगिनां मुक्तये भवति शाण्डि.१।७।३७
साक्षाच्छक्तिर्भगवतः स्मरणमात्र-
रूपाविर्भावप्रादुर्भावात्मिका सीतो. २५
साक्षात् कथयतः स्वयम् भ. गी. १८।७५
साक्षादपरोक्षाद्ब्रह्म बृह. ३।४।२,२
साक्षाद्विधिमुखो ह्येष समाधिः
पारमार्थिकः मुक्तिको. २।५६
साक्षान्नारायणो देवः परं ब्रह्मा-
भिधीयते ना. पू. ता.५।७
(अहो) साक्षान्नारायणोऽयं
परं ब्रह्म सामर. ५४
साक्षाद्ब्रह्म गोपालपुरी भवति गोपालो. १।१५
साक्षाद्ब्रह्मस्वरूपो जगन्नाथः राधोप. ४।१
साक्षाद्ब्रह्मैव, नान्योऽस्तीत्येवं
ब्रह्मविदां स्थितिः वराहो. २।२१
साक्षाद्भूयात्तु मङ्गलम् शिवो. ७।८०
साक्षिण्येषा केवला निर्गुणा च गुह्यका. ६९
साक्षिभूते समे स्वच्छे निर्विकल्पे
चिदात्मनि । निरिच्छं प्रति-
बिम्बन्ति जगन्ति मुकुरे यथा महो. ५।५५
साक्षी चेता केवलो निर्गुणश्च श्वेता. ६।११
[+राधोप. ४।३+ब्रह्मो. १६+ गोपालो. ३।१९
साक्षी सम्पूर्णकेवलः महो. २।७३
साक्षी स्वप्रकाशः नृसिंहो. ९।६
साक्ष्यनपेक्षोऽहं निजमहिम्नि
संस्थोऽहमचलोऽहम् आ. प्र. ४
साक्ष्यविशेषोऽनन्योऽसुखदुःखो-
ऽद्वयः परमात्मा नृसिंहो. ९।७
साक्ष्यहं किञ्चिदप्यत्र न कुर्वे
नापि कारये १ अवधू. २५
साक्ष्यहं सर्वदा नित्यश्चिन्मात्रोऽहं
न संशयः सर्वसारो. ८
सा गतिर्लोक एव सः मैत्रा. ६।२४
सा गौरभवदृषभ इतरस्तां समेवा-
भवत् बृह. १।४।४
साग्निका अग्निव्रतधारकाः
कर्मजडास्तैः सह कदाचित्स-
द्धर्मालापनं न कुर्यात् सामर. २२

साऽम्र एव सुभिक्षा बभूव तान्प्रति-
गृह्य निदधौ छांदो. १।१०।५
साङ्ख्य एवावबुद्धा ये ते साङ्ख्या
योगिनः परे ब. पू. ५।४९
साङ्ख्ययोगौ पृथग्बालाः भ. गी. ५।४
साङ्ख्यं योगं समभ्यस्ये पुरुषं
पञ्चविंशकम् निरुक्तो. १।७
साङ्ख्ये कृतान्ते प्रोक्तानि भ. गी. १८।१३
सा चेदस्मै न दद्यात् काममेना-
मवक्रीणीयात्, सा चेदस्मै
नैव दद्यात्काममेनां यष्टया वा
पाणिना वोपहत्यातिक्रामेत बृह. ६।४।७
सा चेदस्मै दद्यादिन्द्रियेण ते
यशसा यश आदधामीति बृह. ६।४।८
सा चैवाग्निः, सा च सूर्यः, सा
वायुः, सा च चन्द्रमाः गुह्यका. ५२
सा जीवन्मुक्ततोदेति स्वरूपानन्द-
दायिनी महो. ४।३८
साज्यं हविरनामयं मोदमिति शिखां
यज्ञोपवीतं पितरं पुत्रं कलत्रं
कर्म चाध्ययनं मन्त्रान्तरं
विसृज्यैव परिव्रजत्यात्मवित् ना. प. ३।७७
सा तु (सुषुम्ना) मूलाधारादारभ्य
ब्रह्मरन्ध्रगामिनी भवति अद्वयता. २
सा त्वं वीरवती भव याऽस्मान्
वीरवतोऽकरत् बृह. ६।४।२८
सात्यकिश्चापराजितः भ. गी. १।१७
सा त्याज्या सर्वयत्नेन सर्वनाशे-
ऽप्युपस्थिते । स्पष्टव्या सा न
भव्येन सश्वमांसेव पुल्कसी ना. प. ३।५०
सा त्रिविधा व्याप्य तिष्ठति (माया) सामर. ९८
सात्त्विकत्वात् समष्टित्वात् साक्षि-
त्वाज्जगतामपि । जगत्कर्तुमकर्तुं
वा चान्यथा कर्तुमीशते... सरस्व. ४०
सात्त्विकमायात्मको विष्णुः पा. ब्र. २
सात्त्विक-राजस-तामस-लक्षणानि
त्रयो गुणाः शारीरको. ५
सात्त्विकं निर्मलं फलम् भ. गी. १४।१६
सात्त्विकं परिचक्षते भ. गी. १७।१७

सात्त्विकांशेन जायन्ते कर्मण्या
द्रव्यसम्पदः । रजस्तमः–
स्वरूपेण भावा यज्ञबहिष्कृताः भवसं. ४।७
सात्त्विकी ज्ञानशक्तिः । राजसी
क्रियाशक्तिः । तामसी द्रव्यशक्तिः ग. शो. ४।३
सात्त्विकी राजसी चैव भ. गी. १७।२
सात्त्विकोऽस्मि सदाऽस्म्यहम् मैत्रे. ३।६
सात्त्विक्या दिशो वायुःसूर्योवरुणो-
ऽश्विनाविति ज्ञानेन्द्रियदेवताः गणेशो. ४।४
सार्थकार्णद्वयं रामो रमन्ते यत्र
योगिनः रामर. ५।४
सा देवी त्रिधा भवति, शक्त्यासना
इच्छाशक्तिः क्रियाशक्तिः
साक्षाच्छक्तिरिति सीतो. ६
साधकः साधयेत्सर्वमिह लोके
परत्र च सूर्यता. ६।३
साधनचतुष्टयसम्पन्नः सन्न्यस्तुमर्हति ना. प. २।१
साधनचतुष्टयसम्पन्नः सर्वसंसारोपरि
मनोवाकायकर्मभिर्यथाशानिवृत्तः ना. प. १।१
साधनचतुष्टयसम्पन्नो यः सन्न्यस्यति
स एव ज्ञानसन्न्यासी १ सं. सो.२।१३
साधनसम्पन्न एव सन्न्यस्तुमर्हति १ सं. सो. २।१
साधनं प्रभवेत्पुंसां वैराग्यादि-
चतुष्टयम् वराहो. २।२
साधयन् वज्रकुम्भानि नव द्वाराणि
बन्धयेत् ब्र. वि. ७५
साधवो दीनवत्सला एवासते सामर. ३७
साधिभूताधिदैवं मां भ. गी. ७।३०
साधियज्ञं च ये विदुः भ. गी. ७।३०
साधुकारी साधुर्भवति बृह. ४।४।५
साधुत्वे नियोगं सुलभं पवित्रं
सुलभं सुकरं तद्विष्णुक्षेत्रं नारदो. १
साधुनैनमुपागादित्येव तदाहुः छांदो. २।१।२
साधुभिः पूज्यमानोऽस्मिन् पीड्य-
मानेऽपि दुर्जनैः । समभावो
भवेद्यस्य स जीवन्मुक्त इष्यते अध्यात्मो. ४७
साधुरेव स मन्तव्यः भ. गी. ९।३०

साधुवेशं समाश्रित्य जीवन्ति बहवो नराः । नरके रौरवे घोरे कर्मत्यागात्पतन्ति ते भवसं. १।५४
साध्या उत्तरत उदयन्ति तपन्ति वर्षन्ति स्तुवन्ति मैत्रा. ७।४
साधुष्वपि च पापेषु भ. गी. ६।९
साध्यानामेव तावदाधिपत्यꣳ स्वाराज्यं पर्येता छांदो. ३।१०।४
साध्या मनुष्याः पशवो वयांसि । प्राणापानौ व्रीहियवौ तपश्च मुण्ड. २।१।७
सानन्दं निश्चलं चेतस्ततः सुश्लिष्ट-मुच्यते । अतीव निर्मलीभूतं सानन्दं च सुलीनकम् अमन. २।५७
सा निशा पश्यतो मुनेः भ. गी. २।६९
सान्निध्ये विषयाणां यः समर्थो विकलेन्द्रियः । सुप्तवद्वर्तते नित्यं स भिक्षुर्मुग्ध उच्यते ना. प. ३।६८
सान्नेनोपसमाहिता प्राज्वालीत्तयै-तर्हि वेदाननुभवति छांदो. ६।७।६
सा पुनर्विकृतिं प्राप्य सत्त्वोद्रिक्ता-ऽव्यक्ताख्यावरणशक्तिरासीत् पैङ्गलो. १।२
सा प्रसिद्धाऽतिदुःखाय सुखा-योच्छेदमागता (वासना-तन्तुबद्धोऽयं लोको विपरिवर्तते) महो. ५।८७
साऽब्रवीत्तपसा मां विजिज्ञासस्वेति अव्यक्तो. २
साऽब्रवीदज्ञेयं हि तत्सौम्य तेजः । यदविज्ञेयं तदव्यक्तम अव्यक्तो. २
साऽब्रवीदहं ब्रह्मस्वरूपिणी देव्यु. १
साऽब्रवीद्बिभेमि वा एतदेभ्यो यथौजीयांसो बलीयांस इमे पराभवन्निति शौनको. ३।२
साऽब्रवीद्बिभेमि वा एतदेतेभ्यो यथौजीयांसो बलीयांस इमे परावृतन्निति शौनको. ४।२
सा ब्रह्मणः पुत्री आत्मयौवनैवास्त सामर. ९२
सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति केनो. ४।१
सा भक्तिस्त्रिविधैव भवति सामर. २
सा भावयित्री भावयितव्या भवति २ ऐत. ४।३

साम तु जानीयाद्यो जानीते सो-ऽमृतत्वं च गच्छति नृ. पू. १।५
सामतो गायत्र्युष्णिग्बृहती त्रिष्टु-ब्विद्यदेति १ ऐत. ३।४।२
सामन्तश्चेन्द्रियाक्रान्तेर्मनो मन्ये विवेकिनः महो. ५।७९
साम प्राणं प्रपद्ये [प्रवर्ग्या. १+ वा. सं. ३६।१
साम—प्राणो वै साम, प्राणे हीमानि सर्वाणि भूतानि सम्यञ्चि बृह. ५।१३।३
सामर्थ्यशक्तिः सर्वसिद्धिप्रदा भवति सौभाग्य. २६
सामवेद एवोद्यजुर्वेदो गीः ऋ-ग्वेदस्थं दुग्धेऽस्मै वाग्दोहम् छांदो. १।३।७
सामवेदस्तथा द्यौश्चाहवनीयस्तथैव च । ईश्वरः परमो देवो मकारः परिकीर्तितः ब्र. वि. ६
सामवेदेनास्तमये महीयते सूर्यता. १।५
सामवेदे ह्रस्वोदात्त एकाक्षर उकारः २ प्रणवो. १२
साम वै स्वः, स हिरण्यगर्भो भवति ग. पू. ३।१
सामहंसकूजितैरतिशोभित-मानन्दमयानन्तशिखरै-रलङ्कृतं..प्रणवाख्यं विमानं विराजते त्रि. म. ना.७।९
सामाथो यः कश्च गेष्णः स स्वरः १ ऐत. ३।६।४
सामानि यो वेद स वेद सर्वं, यो मानसं वेद स वेद ब्रह्म इतिहा. ९
सामानि सम्राड्सुरन्तरिक्षम् एका. ७
सामान्येव मधुकृतः, सामवेद एव पुष्पं, ता अमृता आपः छांदो. ३।३।१
सा माया स्ववशोपाधिः सर्व-ज्ञस्येश्वरस्य हि । वश्यमायत्व-मेकत्वं सर्वज्ञत्वं च तस्य तु सरस्व. ३९
सामैवाहं संहितां मन्य इति ३ ऐत. १।५।३
सामैश्चिदन्तो विरजश्च बाहुं हिरण्मयं वेदविदां वरिष्ठम् एका. १०
सामोत्तरः पक्षः, आदेश आत्मा तैत्ति. २।३
साम्न उद्गीथो रसः छांदो. १।१।१
साम्नः सहस्रशाखाः स्युः, पञ्च-शाखा अथर्वणः सीतो. १६

साम्नः सायुज्य९ सलोकतां जयति, य एवमेतत्साम वेद — बृह. १।३।२२
साम्नः सायुज्य५ सलोकतां जयति, य एवं वेद — बृह. ५।१३।२
साम्नामादित्यो दैवतं तदेव ज्योतिः — २ प्रणवो. २१
साम्नामेव तद्रसेन साम्नां वीर्येण साम्नां यज्ञस्य विरिष्ट५ सन्दधाति — छांदो. ४।१७।६
साम्बरा वा दिगम्बरा वा न तेषां धर्माधर्मौ, न मेध्यामेध्यौ — १ अवधू. ६
साम्बं मामव वृषभारूढं...पशुपाशविमोचकं पुरुषं... — भस्मजा. २।४
साम्येन मधुसूदन — भ. गी. ६।३३
साम्राज्यदायिनी नित्यं सर्ववेदस्वरूपिणी। महाविद्या जगन्माता मुनीनां मोक्षदायिनी — ना. पू. ता.२।३
सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवत् — बृह. १।३।१२
सायंप्रातस्तु यः सन्ध्यामस्कन्नामुपतिष्ठते। स तया पावितो देव्या ब्राह्मणः पूतकिल्बिषः — सन्ध्यो. ७
सायं प्राश्नीयात्सोऽयं सायंहोमः यत्प्रातः सोऽयं प्रातः (होमः) — कठश्रु. २१
सायं ये नोपतिष्ठन्ति ब्राह्मण्यं प्राप्य दुर्लभम्। अब्राह्मणांस्तु तान्विद्याद्यथा शूद्रास्तथैव ते — सन्ध्यो. १५
सायं सन्ध्यामुपासीत कृतवीरासनो द्विजः। कृतोत्थानस्तथा प्रातः प्राञ्जलिः सुसमाहितः — सन्ध्यो. ५
सायं सन्ध्या सरस्वती वृद्धा कृष्णाङ्गी कृष्णवासिनी — गायत्रीर. ६
सा या हीनतयाऽसम्पूर्णाऽसंसृष्टाऽसंव्यता वाक् सा पुत्र्यपशव्या — संहितो. १।३
सा या ब्रह्मणि चितिर्या व्यष्टिस्तां चितिं जयति तां व्यष्टिं व्यश्नुते — कौ. त. १७
सा या यदा मृत्युमत्यमुच्यत[मा.पा.] — बृ.ह. १।३।१२
सारमेव रसं लब्ध्वा...सुखी भवति — कठरु. २६
सारस्वतो वा एष देवो न हि पारमात्मिकः ह योऽभयो वा सर्वं सन्धुषे स्वाहा — पारमा. ३।७
सारादपि महासारं शिवोपनिषदं परम्। अल्पग्रन्थं महार्थं च प्रवक्ष्यामि जगद्धितम् — शिवो. १।८
सार्धत्रिकोटितीर्थेषु स्नात्वा गृहमुपागतः। स्वोदन्तं कथयामास ऋभुं नत्वा महायशाः — महो. ३।२
सार्धत्रिकोटितीर्थेषु स्नानपुण्यप्रभावतः। प्रादुर्भूतो मनसि मे विचारः सोऽयमीदृशः — महो. ३।३
सार्धसंवत्सरेणापि लयस्थस्यापि योगिनः। तोयतत्त्वस्य सिद्धिः स्यात्तोयतत्त्वमयो भवेत् — अमन. १।७५
सार्पाद्यं श्रविष्ठार्धान्तं सौम्यम् — मैत्रा. ६।१४
सार्वकामिकं मोक्षद्वारमृक्मयं यजुर्मयं साममयं ब्रह्ममयममृतमयं भवति — नृ. पू. ५।७
सार्वकामिकं मोक्षद्वारमुद्योगिन उपदिशन्ति — नृ. पू. ५।१
सालज्यं संस्थानमपराजितमायानं — कौ. त. १।३
सालम्बस्तु समस्तकर्मातिदूरतया करचरणादिमूर्तिविशिष्टं मण्डलाद्यालम्बनं सालंबयोगः — त्रि. म. ना.८।४
सालोक्यादिविभागेन चतुर्धा मुक्तिरीरिता — मुक्तिको. १।१७
सावधानो भव त्वं च ग्राह्यग्राहकसङ्गमे। अजस्रमेव सङ्कल्पदशाः परिहरञ्छनैः — अ. पू. ५।१०३
सावयवत्वादवश्यमनित्यं भवत्येव — त्रि. म. ना. २।१
सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्य यत्रासां दिशामन्तस्तद्गमयाञ्चकार — बृह. १।३।१०
सा वा एषा सर्वाणि छंदांसि — अव्यक्तो. ६
सा वाक् संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति — बृह. ६।१।८
सा वाक्—सोऽग्निस्तदेतद्ब्रह्मवर्चसमन्नाद्यमित्युपासीत — छांदो. ३।१३।३

(अथ) सावित्री गायत्र्या यजुषा प्रोक्ता तया सर्वमिदं व्याप्तं — नृ. पू. ४।३
सावित्री प्रवेशपूर्वकमप्सु...वेदमातरं क्रमाद्व्याहृतिषु त्रिषु प्रविलाप्य ...ब्रह्माहमस्मीति तत्त्वमस्यादि-वाक्यार्थस्वरूपानुसन्धानं कुर्वन्नुदीचीं दिशं गच्छेत् — प. हं. ९
सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्राय नेच्छन्ति — नृ. पू. १।३
सावित्रीं लक्ष्मीं यजुः प्रणवं यदि जानीयात् स्त्री शूद्रः स मृतोऽधो गच्छति — नृ. पू. १।३
सावित्र्यात्मा पाशुपतं परं ब्रह्मावधूतकम् — मुक्तिको. १।३७
सावित्र्याः सरस्वत्यभवत् — गायत्रीर. १
सा वेत्ति वेद्यं न च तस्यास्तु वेत्ता तामाहुरग्र्यां महतीं महीयसीम् — गुह्यका. ५१
सा वै देवी वाग्यया यद्यदेव वदति तत्तद्भवति — बृह. १।५।१८
सा शक्तिर्येन चालिता स्यात्स तु मुक्तो भवति [शाण्डिल्यो. १।७।३७
सा शिखा नीरैः सर्वत्रावस्थितैः कार्यं निवर्तयेत् — कठश्रु. ९
(अथ) सा शुष्यति द्वितीयां जहाति, अथ सा शुष्यति तृतीयां जहाति, अथ सा शुष्यति सर्वं जहाति, सर्वः शुष्यति — छांदो. ६।११।२
सा षोडशी सषोडशीकं पुरमध्यं बिभर्ति — त्रि. म. ना. १०
सा सत्यता सा शिवता साऽवस्था पारमात्मिकी सर्वज्ञता सा सम्तृप्तिर्न तु यत्र मनः क्षतम् — १सं. सो. २।४६
सा (सीता) सर्ववेदमयी सर्वदेवमयी — सीतो. ६
सा (वाक्) संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्तेमज्जीवितुमिति — छांदो. ५।१।८
सा साम्नश्चतुर्थपादो भवति (अकारात्मिका पृथिवी) — नृ. पू. २।१
सा साम्नस्तृतीयः पादो भवति — नृ. पू. २।१
सा साम्नः प्रथमः पादो भवति — नृ. पू. २।१
सा साम्नो द्वितीयः पादो भवति — नृ. पू. २।१
१. सृष्टिर्द्विभेदा भवति; एका संसिद्धा, अन्या साधनसिद्धा — सामर. ६
साऽस्यै तमात्मानमत्र गतं भावयति — २ ऐत. ४।२
साहङ्कारेण वा पुनः — भ. गी. १८।२४
साऽहं ब्रह्म न संसारी न मत्तोऽन्यः कदाचन। यथा फेनतरङ्गादि समुद्रादुत्थितं पुनः — जा. द. १०।६
सा हि वाचामगम्यत्वादसत्तामिव शाश्वतीम्। नैरात्मसिद्धात्म-दशामुपयातैव शिष्यते — १ सं.सो. २।२८
सा हि सर्वगता संवित् प्राणस्पदेन चाल्यते। चित्तैकाग्र्याद्यतो ज्ञानमुक्तं समुपजायते — मुक्तिको. २।४९
सा हि सर्वगता संवित् प्राण-स्पदेन बोध्यते। संवित्संरोधनं श्रेयः प्राणादिस्पन्दनं वरम् — अ. पू. ४।४३
सा हेयमीक्षाञ्चक्रे कथं नु माऽऽत्मान एव जनयित्वा सम्भवति — बृह. १।४।४
सा हैषा गयांस्तत्रे, प्राणा वै गयास्तत्प्राणांस्तत्रे — बृह. ५।१४।४
सा हैषा गायंस्तते प्राणा वै गाया-स्तान्प्राणांस्तते यद्गायंस्तते तस्माद्गायत्री नाम — गायत्र्यु. ३
सा होवाच गान्धर्वी कथं वाऽस्मासु जातो गोपालः कथं वा ज्ञातोऽसौ त्वया मुने कृष्णः — गोपालो. १।१३
सा होवाच नमस्तेऽस्तु याज्ञवल्क्य यो म एतं व्यवोचोऽपरस्मै धारयस्वेति — बृह. ३।८।५
सा होवाच—बिभेमि वा एतदेतेभ्यो यथैतत्परावृतन्निति — शौनको. १।३
सा होवाच मैत्रेयी—यन्नु म इयं भगो सर्वा पृथिवी वित्तेन पूर्णा स्यात्कथं तेनामृता स्यामिति — बृह. २।४।२
सा होवाच— यदूर्ध्वं याज्ञवल्क्य... यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं चेति — बृह. ३।८।६

सा होवाच-यद्देष पुरागा उद्देष मे भागधेयी स्यादिति शौनको. १।३

`सा ह्येव काले भुवनस्य गोप्त्री विश्वाधिपा सर्वभूतेषु गूढा। यस्यां मुक्ता ब्रह्मर्षयोऽपि देवा ज्ञात्वा तां मृत्युपाशाञ्छिनत्ति गुह्यका. ५८

सांसारिकक्रियायुक्तं ब्रह्मज्ञोऽस्मीति वादिनम्। कर्मब्रह्मोभयभ्रष्टं तं त्यजेदन्त्यजं यथा अमन. २।१०१

सांसिद्धिकी स्वाभाविकी, सहजा अकृता च या। प्रकृतिः सेति विज्ञेया स्वभावं न जहाति या अ. शां. ९

सिक्त्वा ततः स्वाभिमुखं च कृत्वा लिङ्गेऽर्पयेत्पृष्ठमध्यं दलानाम् १ विल्वो. ८

सितया शर्करयाऽभिषिच्य सर्वजीववधात्पूतो भवति भस्मजा. २।११

सितासिता च रक्ता च सर्वकामदुधा विभोः मंत्रिको. ५

सिद्धत्वासिद्धत्वाभ्यां स्वतन्त्रास्वतन्त्रत्वेन सैषा वटबीजसामान्यवदनेकवटशक्तिरेकैव नृसिंहो. ९।२

सिद्धमन्नं यदानीतं ब्राह्मणेन मठं प्रति। उपपन्नमिति प्राहुर्मुनयो मोक्षकाङ्क्षिणः १सं. सो. २।७०

सिद्धये सर्वकर्मणाम् भ. गी. १८।१३

सिद्धये सर्वभूतादि विश्वाधिष्ठानमद्वयम्। यस्मिन् सिद्धिगताः सिद्धास्तत् सिद्धासनमुच्यते ते. बिं. १।२६

सिद्धलक्ष्मी राजलक्ष्मीर्जयलक्ष्मीः सरस्वती। श्रीलक्ष्मीर्वरलक्ष्मीश्च प्रसन्ना मम सर्वदा वनदु. ४

सिद्धविद्यानामासां फलं दक्षिणावत् तारोप. ५

(ततः) सिद्धस्य कृपया योगी भवति, नान्यथा यो. शि. १।५०

सिद्धं पद्मं तथा सिंहं भद्रं चेति चतुष्टयम् १ यो. त. २९

सिद्धं हि ब्रह्म न ह्यत्र किञ्चानुभूयते नृसिंहो. ९।६

सिद्धा अपि विनश्यन्ति जीर्यन्ते दानवादयः महो. ३।५०

सिद्धानां कपिलो मुनिः भ. गी. १०।२६

सिद्धानां सिद्धलक्ष्मीर्भवति ना. पू. ता. २।१

सिद्धा नित्या महावीर्या इच्छारूपाः स्वयोगजाः। चिरकालात् प्रजायन्ते वासनारहितेषु च यो. शि.१।१५५

सिद्धान्तश्रवणंनाम वेदान्तार्थविचारः शांडि. १।२।१

सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि। नाविद्याऽस्तीह नो माया शान्तं ब्रह्मेदमक्रमम् अं. पू. ५।११२

सिद्धासने स्थितो योगी मुद्रां सन्धाय वैष्णवीम्। शृणुयाद्दक्षिणे कर्णे नादमन्तर्गतं सदा ना. बिं. ३१

सिद्धा हि ते महाभागा नरा ह्येकान्तिनोऽभवन्। तमोरजोभ्यां निर्मुक्ताः प्रवेक्ष्यन्ति च मां मुने ना. महो. ३८

सिद्धिभिर्लक्षयेत्सिद्धं जीवन्मुक्तं तथैव च यो. शि.१।१५९

सिद्धिभिः परिहीनं तु नरं बद्धं तु लक्षयेत् यो. शि.१।१६०

सिद्धिमार्गेण लभते, नान्यथा पद्मसम्भव। नानामार्गैस्तु दुष्प्रापं कैवल्यं परमं पदम् यो. शि. १।४

सिद्धिर्भवति कर्मजा भ. गी. ४।१२

सिद्धिं प्राप्तो यथा ब्रह्म भ. गी. १८।५०

सिद्धिं विन्दति मानवः भ. गी. १८।४६

सिद्धिं समधिगच्छति भ. गी. ३।४

सिद्धोऽहं बलवान् सुखी भ. गी. १६।१४

सिद्धो चित्तं न कुर्वीत चञ्चलत्वेन चेतसः यो. शि. ५।६२

सिद्धौदनं त्रिमासं तु जुहुद्भावनन्यधीः। तावज्जुहुत्पृथुकान्हि साक्षाद्वैश्रवणो भवेत् ग. पू. २।१२

सिद्ध्यन्ति सिद्धयो यास्तु कल्पितास्ताः प्रकीर्तिताः यो.शि. १।१५२

सिद्ध्यसिद्ध्योर्निर्विकारः भ. गी. १८।२६

सिद्ध्यसिद्ध्योः समो भूत्वा भ. गी. २।४८

सिंहनादं विनद्योच्चैः भ. गी. १।१२

सिन्दुरव्रातसङ्काशं रविस्थान-
स्थितं रजः। शशिस्थान-
स्थितं शुक्लं तयोरैक्यं सुदुर्लभम् योगचू. ६१
सिन्दूरवर्णः पुरुषः पुराणः हेरम्बो. ५
सिंहारूढां श्यामकान्तिं शङ्ख-
चक्रधरां हृदा। दुर्गां देवीं तथा
ध्यायेच्छरचापौ च बिभ्रतीम् वनदु. ७
सिंहो वा कुञ्जरो वाऽपि तथाऽन्यो
वा मृगो वने। नवमाहो
दुराधर्षो विश्वस्तश्च प्रजायते योगो. ७
सीता इति त्रिवर्णात्मा साक्षा-
न्मायामयी भवेत् सीतो. २
सीता भगवती ज्ञेया मूलप्रकृति-
संज्ञिता सीतो. ५
सीतारामौ तन्मयावत्र पूज्यौ
जातान्याभ्यां भुवनानि द्विसप्त रा. पू. ३।१
सीदन्ति मम गात्राणि भ. गी. १।२८
सीवनीपार्श्वमुभयं गुल्फाभ्यां
व्युत्क्रमेण तु। निपीड्यासन-
मेतच्च मुक्तासनमितीरितम् त्रि. ब्रा. २।४६
सीवनीं गुल्फदेशाभ्यां निपीड्य
व्युत्क्रमेण तु। प्रसार्य जानुनो-
र्हस्तावासनं सिंहरूपकम् त्रि. ब्रा. २।४४
(एवं) सुकृतदुष्कृते सर्वाणि च
द्वन्द्वानि कौ. त. १।४
सुखदं संविदः स्वास्थ्यं प्राण-
संरोधनं विदुः अ. पू. ४।४५
सुखदुःखदशाधीरं साम्यान्न प्रो-
द्धरन्ति यम्। निःश्वासा इव
शैलेन्द्रं चित्तं तस्य मृतं विदुः अ. पू. ४।१२
सुखदुःखबुद्ध्या श्रेयोऽन्तःकर्ता
यदा तदा इष्टविषये बुद्धिः
सुखबुद्धिरनिष्टविषये बुद्धि-
र्दुःखबुद्धिः सर्वसारो. ५
सुखदुःखमोहसंज्ञं ह्यन्नभूतमिदं
जगत् मैत्रा. ६।१०
सुखदुःखं यथा यत्तु बोद्धव्यं
तथोच्यते आयुर्वे. ४
सुखदुःखादिमोहेषु यथा संसारिणां
स्थितिः॥ तथा ज्ञानी यदा
तिष्ठेद्वासनावसितस्तदा। तयो-
र्नास्ति विशेषोऽत्र समा
संसारभावना [यो. शि. १।२२,२३
सुखदुःखे मे त्वयि दधानीति पिता,
सुखदुःखे ते मयि दध इति पुत्रः कौ. त. २।१५
सुखदुःखे समे कृत्वा भ. गी. २।३८
सुखमक्षयमश्नुते भ. गी. ५।२१
सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमती-
न्द्रियम्। एतत्क्षराक्षरातीत-
मनक्षरमितीर्यते यो. शि. ३।१५
सुखमात्यन्तिकं यत्तत् भ. गी. ६।२१
सुखमानन्त्यमुत्तमम् शिवो. ७।११८
सुखमाम्रियते नित्यं दुःखं विम्रियते
सदा। यस्य कस्य च धर्मस्य
ग्रहेण भगवानसौ अ. शां. ८२
सुखमेव लब्ध्वा करोति सुखं त्वेव
विजिज्ञासितव्यमिति छांदो. ७।२२।१
सुखरूपत्वमस्त्येतदानन्दत्वं सदा
मम (निरुपाधिकनित्यं
यत्सुप्तौ सर्वसुखात्परम्) वराहो. ३।१०
सुखरूपः स्वयम्प्रभः (आत्मा) जा. द. ५।१३
सुखसङ्गेन बध्नाति भ. गी. १४।६
सुखसंसेवितं स्वप्नं सुजीर्णमित-
भोजनम्। शरीरशुद्धिं कृत्वाऽऽदौ
सुखमासनमास्थितः॥ प्राणस्य
शोधयेन्मार्गं रेचपूरककुम्भकैः यो. शि. ५।३६
सुखस्थापितसर्वाङ्गः सुस्थिरात्मा
सुनिश्चलः। बाहुदण्डप्रमाणेन
कृतदृष्टिः समभ्यसेत् अमन. २।४९
सुखस्यानन्तरं दुःखं दुःखस्या-
नन्तरं सुखम्। न नित्यं लभते
दुःखं न नित्यं लभते सुखम् भवसं. १।१०
सुखस्यैकान्तिकस्य च भ. गी. १४।२७
सुखं त्विदानीं त्रिविधं भ. गी. १८।३६
सुखं दुःखं न जानाति शीतोष्णे
च न विन्दति। विचारं चेन्द्रि-
याणां च न वेत्ति हि लयं गतः अमन. १।२४

सुखं दुःखं भवोऽभावः भ. गी. १०।४
सुखं, बन्धात्प्रमुच्यते भ. गी. ५।३
सुखं भगवो विजिज्ञासे छांदो. ७।२२।१
सुखं मोहनमात्मनः भ. गी. १८।३९
सुखं वा यदि वा दुःखं भ. गी. ६।३२
सुखं ह्यवमतः शेते सुखं च प्रति-
बुद्ध्यते । सुखं चरति लोके-
ऽस्मिन्नवमन्ता विनश्यति ना. प. ३।४२
सुखादिं दुःखनिधनां प्रतिमुञ्चस्व
स्वां पुरम् अरुणो. १
सुखाद्यनुभवो यावत्तावत्प्रारब्ध-
मिष्यते । फलोदयः क्रियापूर्वो
निष्क्रियो नहि कुत्रचित् अध्यात्मो. ४९
सुखानां मूर्ध्नि दुःखानि किमेकं
संश्रयाम्यहम् । (सतोऽसत्तास्थिता
मूर्ध्नि रम्याणां मूर्ध्न्यरम्यता) महो. ६।२४
सुखाभ्युदयिकं चैव नैःश्रेयसिक-
मेव च । प्रवृत्तं च निवृत्तं च
द्विविधं कर्म वैदिकम् भवसं. ५।६
सुखासनवृत्तिश्चीरवासाश्चैव-
मासननियमो भवति मं. ब्रा. १।१
सुखासनस्थो दक्षनाड्या बहिस्थं
पवनं समाकृष्य केशमानखाग्रं
कुम्भयित्वा सव्यनाड्यारेचयेत् शांडि. १।७।१४
सुखासने समासीनस्तत्त्वाभ्यासं
समाचरेत् । सदाऽभ्यासेन
तत्कुर्यात्परंतत्त्वप्रकाशनम अमन. १।१६
सुखिनः क्षत्रियाः पार्थ भ. गी. २।३२
सुखिनः स्याम माधव भ. गी. १।३७
सुखेन ब्रह्मसंस्पर्शं भ. गी. ६।२८
सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्म-
चिन्तनम् । आसनं तद्वि-
जानीयादन्यत्सुखविनाशनम् ते. बि. १।२५
सुखेषु विगतस्पृहः भ. गी. २।५६
सुघोषमणिपुष्पकौ भ. गी. १।१६
सुजीर्णोऽपि सुजीर्णासु विद्वांस्त्रीषु
न विश्वसेत । सुजीर्णास्वपि
कन्थासु सज्जते जीर्णमम्बरम् १ सं. सो.२।९०
सुदर्शनदिव्यतेजोन्तर्गतः सुदर्शन-
पुरुषो यथा सूर्यमण्डलान्तर्गतः
सूर्यनारायणोऽमितापरिच्छि-
न्नाद्वैतपरमानन्दलक्षणतेजो-
राश्यन्तर्गत आदिनारायण-
स्तथा सन्दृश्यते त्रि. म. ना.१।४
सुदर्शनपुरुषो महाविष्णुरेव त्रि. म. ना. ७।४
सुदर्शनामेवाप्येति यः सुदर्शना-
मेवास्तमेति सुबालो. ९।२
सुदर्शनाय विद्महे हेतिराजाय
धीमहि । तन्नश्चक्रः प्रचोदयात् त्रि.म.ना. ७।१०
सुदामा नारदो मुनिः कृष्णोप. २४
सुदुर्दर्शमिदं रूपं भ. गी. ११।५२
सुपर्णोऽसि गरुत्मांस्त्रिवृत्ते
शिरोगायत्रं चक्षुः स्तोम
आत्मा साम ते तनू वामदेव्यम् गारुडो. १४
सुपर्णोऽसि गरुत्मान्दिवं गच्छ
सुवः पत ओमीं... गारुडो. १५
सुपुण्यं पुण्यात्मकं वितानं दाधार
देवाय स्वाहा पारमा. ६।३
सुप्तेरुत्थाय सुप्त्यन्तं ब्रह्मैकं प्रवि-
चिन्त्यताम् वराहो. २।६४
सुभगां त्रिगुणितां मुक्तासुभगां...
बीजसप्तकमुच्चार्य बृहद्भानु-
जायामुच्चरेत् कालिका. १
सुभूतेन मे सन्तिष्ठस्व ब्रह्मवर्चसेन
मे सन्तिष्ठस्व महाना. १६।११
सुमित्रा न आप ओषधयः सन्तु
दुर्मित्रास्तस्मै भूयासुर्योऽस्मा-
न्द्वेष्टि यं च वयं द्विष्मः महाना. ६।११
सुमित्रिया न आप ओषधयः
सन्तु दुर्मित्रियास्तस्मै सन्तु
[प्रवर्ग्या. २३+ वा. सं. ३६।२३
सुरभिविद्या अक्षमालाश्रुतिरिव
परमा सिद्धा सात्त्विकी राधो. २।१
सुरेशः सकलं बिभर्ति तस्मै
सुरेशाय सकलं सुपुण्यं स्वाहा पारमा. ८।१
सुलभश्चायमत्यन्तं सुज्ञेयश्चाप्त-
बन्धुवत् । शरीरपद्मकुहरे
सर्वेषामेव षट्पदः १ सं. सो.२।१४
सुवन्मह्यं पशून् विश्वरूपान् ।
पतङ्गमक्तमसुरस्य मायया (?) चित्सु. ११।१०

सुवरन्नमादित्याय दिवे स्वाहा महाना. ७।१
सुवरिति प्रतिष्ठा, द्वे प्रतिष्ठे (मा.पा.) बृह. ५।५।३
सुवरिति यजूंषि, महरिति ब्रह्म तैत्ति. १।५।२
सुवरिति व्यानः, मह इत्यन्नम् तैत्ति. १।५।३
सुवरित्यसौ लोकः, मह इत्यादित्यः तैत्ति. १।५।१
सुवरित्यादित्यः, मह इति चन्द्रमाः तैत्ति. १।५।२
सुवरादित्याय दिवे स्वाहा महाना. ७।२
सुवरादित्याय च दिवे च महते स्वाहा महाना. ७।३
सुवर्णं कालकूटमिव सभास्थलं स्मशानस्थलमिव...कारागृह-विनिर्मुक्तचोरवत्पुत्राप्तबन्धुभव-स्थलं विहाय दूरतो वसेत् (यतिः) ना. प. ७।१
सुवर्णं कालकूटमिव सभास्थलं स्मशानस्थलमिव...न देवता-र्चनम् । प्रपञ्चवृत्तिं परित्यज्य जीवन्मुक्तो भवेत् (यतिः) १सं. सो. २।७९
सुवर्णं कोशं रजसा परीवृतम् [चित्यु. ११।४+ तै.आ. ३।११।४
सुवर्णं खादित्वाऽपगिरति (दुःस्वप्ने) ३ ऐत. २।४।७
सुवर्णं घर्मं परिवेदवेनम् [चित्यु. ११।१+ तै.आ. ३।११।१
सुवर्णाज्जायमानस्य सुवर्णत्वं च शाश्वतम् । ब्रह्मणो जायमानस्य ब्रह्मत्वं च तथा भवेत् यो. शि. ४।७
सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवायमस्मिन्नन्धेऽन्धो भवति छांदो. ८।९।१
सुविभातं सकृद्विभातं पुरतोऽस्मा-त्सर्वस्मात्सुविभातमद्वयम् नृसिंहो. ९।९
सुशेवमिवक्कमसि प्रपश्यन्निस्था न कश्चोरणमाचवक्षे बा. मं. २
सुशोभनमठं नात्युच्चनीचायत-मल्पद्वारं गोमयादिलिप्तं सर्व-रक्षासमन्वितं कृत्वा तत्र वेदान्त-श्रवणं कुर्वन्योगं समारभेत् शांडि. १।५।१
सुशोभनं मठं कुर्यात्सूक्ष्मद्वारं तु निर्व्रणम् १ यो. त. ३२
सुश्लिष्टं सात्त्विकं प्रोक्तं सुलीनं गुणवर्जितम् अमन. २।९३
सुश्लिष्टं च सुलीनं च विकल्प-विषयापहम् (मनः) अमन. २।९४

सुषारथिरश्वानिव यन्मनुष्यान्नेनी-यतेऽभीषुभिर्वाजिन इव । हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः.. [१शिवसं.६+२शि.सं.५ +वा.सं. ३४।६
सुषिरं मण्डलं विदुः अ. ना. २७
सुषिरो ज्ञानजनकः पञ्चस्रोतः-समन्वितः शांडि. १।७।३९
सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दभुक्चेतोमुखः प्राज्ञ-स्तृतीयः पादः गणेशो. १।३
सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवा-(एका-) नन्दमयो ह्यानन्द-भुक्चेतोमुखः प्राज्ञस्तृतीयः पादः [माण्डू. ५+ नृ. पू. ४।२
सुषुप्तस्थानश्चतुरात्मा प्राज्ञ ईश्वर-श्चतूरूपो मकार एव नृसिंहो. २।६
सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखश्चतुरात्मा प्राज्ञ ईश्वरस्तृतीयः पादः नृसिंहो. १।३
सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा, मितेरपीतेर्वा; मिनोति ह वा इदं सर्वमपीतिश्च भवति माण्डू. ११
सुषुप्तस्थैर्यमासाद्य तुर्यरूप-मुपाययौ । निरानन्दोऽपि सानन्दः सदासच्च बभूव सः अ. पू. ३।१८
सुषुप्तं च तुरीयं च नान्यावस्थासु कुत्रचित् त्रि. ब्रा. १।१०
सुषुप्तं हृदयस्थं तु तुरीयं मूर्ध्नि संस्थितम् ना. प. ९।१३
सुषुप्तिकाले सकले विलीने तमसा-वृते । स्वरूपं महदानन्दं भुङ्क्ते विश्वविवर्जितः वराहो. २।६२
सुषुप्तिकाले सकले विलीने तमो-भिभूतः सुखरूपमेति कैवल्यो. १।१३
सुषुप्तिमात्राचतुष्टयं मकारांशं तुरीयमात्राचतुष्टयमर्धमात्रांशम् प. हं. प. १०
सुषुप्तिवद्यश्चरति स्वभावपरि-निश्चलः । निर्वाणपदमाश्रित्य योगीकैवल्यमश्नुते[त्रि.ब्रा.२।१६५+ २ अवधू. ८

सुषुप्तिसमाध्योर्मनोलयाविशेषेऽपि
महदस्त्युभयोर्भेदः । मं. ब्रा. २।६
सुषुप्ते जाग्रतमस्वप्नं (आत्मानं) नृसिंहो. २।१
सुषुप्ते सुषुप्त्यादिचतस्रोऽवस्थाः,
न त्वेवं तुरीयातीतस्य ना. प. ९।७
सुषुप्तौ सुखमात्राया भेदः
केनावलोकितः अध्यात्मो. २५
सुषुप्तौ सुषुप्त्यादिचतस्रोऽवस्थाः प. हं. प. ९
सुषुप्त्यवस्थायां प्राज्ञस्य चातुर्विध्यं
प्राज्ञविश्वः प्राज्ञतैजसः प्राज्ञ-
प्राज्ञः प्राज्ञतुरीय इति प. हं. प. ९
सुषुप्त्यैव बुद्धिपूर्वं निबोधयति मैत्रा. २।५
सुषुम्णा पश्चिमे चारे स्थिता
नाडी सरस्वती वराहो. ५।२५
सुषुम्ना कालभोक्त्री भवति शांडि. १।४।६
सुषुम्ना तु परे लीना विरजा
ब्रह्मरूपिणी । इडा तिष्ठति
वामेन पिङ्गला दक्षिणेन च क्षुरिको. १६
सुषुम्नान्तर्गतं विश्वं तस्मिन्सर्वं
प्रतिष्ठितम् । नानानाडीप्रसवगं
सर्वभूतान्तरात्मनि यो. शि. ६।१३
सुषुम्ना पिङ्गला तद्वदिडा चैव
सरस्वती + पूषा च वरुणा चैव
हस्तिजिह्वा यशस्विनी ॥
अलम्बुसा कुहूश्चैव विश्वोदरी
तपस्विनी । शङ्खिनी चैव
गान्धारा इति मुख्याश्चतुर्दश जा. द. ४।७
सुषुम्ना पूर्वभागे मेढ्रान्तं कुहूर्भवति शांडि. १।४।५
सुषुम्नापृष्ठपार्श्वयोः सरस्वतीकुहू
(?) भवतः शांडि. १।४।६
सुषुम्नाया इडा सव्ये दक्षिणे
पिङ्गला स्थिता जा. द. ४।१३
सुषुम्नायां यदा प्राणः स्थिरो
भवति धीमताम् । सुषुम्नायां
प्रवेशेन चन्द्रसूर्यौ लयं गतौ ॥
तदा समरसं भावं यो जानाति
स योगवित् यो. शि. ६।३६

सुषुम्नायां यदा यस्य म्रियते
मनसो रयः ।...भिद्यते च तदा
ग्रन्थिः...तेयान्तिपरमां गतिम् यो. शि. ६।३७
सुषुम्नायां यदा योगी क्षणार्धमपि
तिष्ठति ।...भिद्यते च तदा
ग्रंथिश्छिद्यन्ते सर्वसंशयाः यो. शि. ६।३८
सुषुम्नायां यदा हंसस्त्वध ऊर्ध्वं
प्रधावति । सुषुम्नायां यदा
प्राणं भ्रामयेद्यो निरन्तरम्...
तदासमरसंभावं यो जानाति
स योगवित् यो. शि. ६।३५
सुषुम्नायां सदा गोष्ठीं यः कश्चि-
त्कुरुते नरः । स मुक्तः सर्व-
पापेभ्यो निःश्रेयसमवाप्नुयात् यो. शि. ६।४४
सुषुम्नायाः पृष्ठभागे इडा तिष्ठति,
दक्षिणभागे पिङ्गला.. शांडि. १।४।६
सुषुम्नायाः शिवो देव इडाया
देवता हरिः जा. द. ४।३५
सुषुम्नायाः सव्यभागे इडा तिष्ठति शांडि. १।४।६
सुषुम्नायै कुण्डलिन्यै सुधायै
चन्द्रमण्डलात् । मनोन्मन्यै
नमस्तुभ्यं महाशक्त्यै चिदात्मने यो. शि. ६।३
सुषुम्नावज्रनालेन पवमानं प्रसेत्तथा यो.शि. १।११८
सुषुम्ना शाम्भवी शक्तिः यो. शि. ६।१८
सुषुम्नैव परं तीर्थं सुषुम्नैव परो
जपः । सुषुम्नैव परं ध्यानं
सुषुम्नैव परा गतिः यो. शि. ६।४५
सुष्वपे श्येनाकाशवत् प्रश्नो. १
सुसमो यः परित्यागी सोऽसं-
सक्त इति स्मृतः अ. पू. २।५
सुसंवेद्यं गुरुमतात्सुदुर्बोधमचेतसाम् यो. शि. ३।९०
सुसुखं कर्तुमव्ययम् भ. गी. ९।२
सुसूक्ष्मः सार्वः सर्वेषामन्तरात्मा
·तस्थुस्तस्थुषां जङ्गमो जङ्गमानां
विभुर्विभूनां विभवोद्भवाय स्वाहा पारमा. १।२
सुस्निग्धमधुराहारश्चतुर्थांशवि-
वर्जितः । भुञ्जते शिवसम्प्रीत्यै
मिताहारीसउच्यते [यो.चू. ४३+ योगकुं. १।३
दं सर्वभूतानां भ. गी. ५।२९

सुहृन्मित्रार्युदासीन-मध्यस्थ-
द्वेष्यबन्धुषु भ. गी. ६।९

सुहृष्टः सुदृढः स्वच्छः सुकान्तः
सुप्रबोधितः। स्वगुणेनार्जितो
भाति हृदि हृद्यो मनोमणिः महो. ५।८२

सूक्तं बतावोचतेति तत्सूक्तमभवत् १ ऐत. २।२।६

सूक्ष्म इति सूक्ष्मविदः स्थूल
इति च तद्विदः वैतथ्य. २३

सूक्ष्मतन्मात्राणि भूतानि स्थूली-
कर्तुं सोऽकामयत पैङ्गलो. १।४

सूक्ष्मत्वात्कारणत्वाच्च लयनाद्गमना-
दपि। लक्षणात्परमेशस्य लिङ्ग-
मित्यभिधीयते यो. शि. २।९

सूक्ष्मत्वात्तदविज्ञेयं भ. गी. १३।१६

सूक्ष्मभुक् चतुरात्माऽथ तैजसो
भूतराडयम्। हिरण्यगर्भः
स्थूलोऽन्तर्द्वितीयः पाद उच्यते ना. प. ८।१३

सूक्ष्मं सावित्रं स्वयमादधानः
सावित्ररूपं परमं सुपुण्यं स्वाहा पारमा. ७।७

सूक्ष्माङ्गं कर्मेन्द्रियाणि प्राणांश्च
ज्ञानेन्द्रियाण्यन्तःकरणचतुष्टयं
चैकीकृत्य...क्रमेण विलीयते पैङ्गलो. ३।१

सूक्ष्माच्च तत्सूक्ष्मतरं विभाति
[मुण्ड. ३।१।७+ गुह्यका. ३६

सूक्ष्मातिसूक्ष्मं सलिलस्य मध्ये
विश्वस्य स्रष्ट्रीमनेकाननाख्याम्।
विश्वस्य चैकां परिवेष्टयित्रीं
ज्ञात्वा गुह्यां शान्तिमत्यन्तमेति गुह्यका. ५७

सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये
विश्वस्य स्रष्टारमनेकरूपम्।
विश्वस्यैकं परिवेष्टितारं ज्ञात्वा
शिवं शान्तिमत्यन्तमेति श्वेताश्व. ४।१४

सूक्ष्मात्सूक्ष्मतरं नित्यं स त्वमेव
त्वमेव तत् कैव. १६

सूक्ष्मात्सूक्ष्मतरं ज्ञेयं तन्मे मनः
शिवसङ्कल्पमस्तु २शिवसं. १२

सूक्ष्मांशे तत्तैजसः वराहो. ४।१

सूचनात्सूत्रमित्याहुः सूत्रं नाम
परं पदम्। तत्सूत्रं विदितं येन
स विप्रो वेदपारगः ब्रह्मो. ७

सूचनात्सूत्रमित्युक्तं सूत्रं नाम
परं पदम्। तत्सूत्रं विदितं येन
स मुमुक्षुः स हि भिक्षुकः
(स विप्रो वेदपारगः) [परब्र.८+ ना. प. ३।७९

सूचिवद्गुणमादाय व्रजत्यूर्ध्वं
सुषुम्नया। उद्घाटयेत्कपाटं
तु यथा कुञ्चिकया हठात् ध्या. बिं. ६७

सूते त्रिपुरा शक्तिराद्येयं त्रिपुरा
परमेश्वरी। महाकुण्डलिनी देवी.. त्रि. ता. १।६

सूत्रमन्तर्गतं येषां ज्ञानयज्ञोपवीति-
नाम्। ते वै सूत्रविदो लोके ते
च यज्ञोपवीतिनः [ब्रह्मो.१०+ ना. प. ३।८३

सूत्रात्माऽक्षर उच्यते, अक्षरं
परमं ब्रह्म यो. शि. ३।१६

सूत्रे मणिगणा इव भ. गी. ७।७

सूदितस्वातिरिक्तारिसूरिनन्दात्म-
भावितम्। सूर्यनारायणाकारं
नौमि चित्सूर्यवैभवम् सूर्यो. शीर्षकं.

सूयते पुरुषार्थं च तेनैवाधिष्ठितं जगत् मंत्रिको. ४

सूयते सचराचरम् भ. गी. ९।१०

सूरिः सुराणां सुरसोऽप्यसुन्दः
समूह्य देवा वरदाय पित्रे स्वाहा पारमा. १०।२

सूर्य आत्मा जगतस्तस्थुषश्चे-
त्येतदुद्वैत्रो पेक्षेतोपेक्षेत १ ऐत. २।४।३

सूर्य आत्माजगतस्तस्थुषश्च [सूर्यो. ३+ ३ ऐत. २।३।३
[+ऋह्वै.१५ऋ.मं.१।११५।१+ वा. सं. ७।४२
[+तै. सं. १।४।४३।१ अथर्व. १३।२।३५

सूर्यकोटिद्युतिरथं नित्योदित-
मधोक्षजम्। हृदयाम्बुरु-
हासीनं ध्यायेद्वा विष्णुरूपिणम् त्रि.ब्रा.२।१५३

सूर्यग्रहे महानद्यां प्रतिमासन्निधौ
वा जप्त्वा सिद्धमन्त्रो भवति गणप. १४

सूर्यद्वारेण ते विरजाः प्रयान्ति
यत्रामृतः स पुरुषो ह्ययमात्मा मुण्ड. १।२।११

सूर्यमण्डलमध्येऽथ ह्यकारः
शङ्खमध्यगः ब्र. वि. ७

सूर्यमण्डलमाभाति ह्यकार-
श्चन्द्रमध्यगः — १ प्रणवो. ७

सूर्यराज्यं षोडशिना (यजति) — मैत्रा. ६।३६

सूर्यश्चक्षुर्वातः प्राणो व्यात्तमग्नि-
र्वैश्वानरः संवत्सर आत्माऽश्वस्य
मेध्यस्य — बृह. १।१।१

सूर्यश्च मा मन्युश्च मन्युपतयश्च
मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम् — महाना. ११।४

सूर्यस्त्वं ज्योतिषां पतिः — प्रश्नो. २।९

सूर्यस्यग्रहणंवत्सप्रत्यक्षयजनंस्मृतम् — ब्र. वि. ९७

सूर्यस्योपासनंकार्यंगच्छेत्सूर्यस१सदम् — सूर्यता. ६।५

सूर्यनाड्या समाकृष्य वायुमभ्यास-
योगिना । विधिवत्कुम्भकं
कृत्वा रेचयेच्छीतरश्मिना — यो. शि. १।९१

